

नं० ५३८८-घ
सिद्धान्तलेशसंग्रहः
(वेदान्त)
४०१→पत्राणि २२१+१०८+६८=
मूलकर्त्ता अप्पयदीक्षितः

वेदंत



१
सिले
टी
१

ॐ श्रीमहागणपतये नमः श्रीरामचंद्रा
य नमः श्रीकृष्णाय नमः सरस्वत्यै नमः
श्रीदक्षिणामूर्त्तिगुरवे नमः ॐ वेदवेद्यगुणा
कीर्णंकमाराध्यामलक्षितं तंदीक्षाप्रमुखै
र्वंद्यं प्रणमामीष्टसिद्धये १ श्रीकरं श्रीक
राचार्यं व्यासं नारायणात्मकं सरस्वतीं च
ब्रह्माणं प्रणमामि पुनः पुनः २ गोविंदे
नि समाकैय रक्षां पापभयान्नरः येराजः
करुणामूर्त्तिं तं गोविंदं भजेन्वहं ३ श्राप
न्नायें समाश्रित्य रक्षां प्राप सकुंडलीभां कृ
ष्णाकृष्णस्य महिषीं तां कृष्णं संश्रयेन्वहं ४
प्रकाशितवल्लनं तं प्रकृष्टगुणशालिनं
प्रणवस्योपदेष्टारं प्रणमाम्यनिशं गुरुं ५
यो मे विश्वेश्वरो हंतं विश्वेश्वरसमो गुरुः
सम्यग्ध्यात्वा स्वयं ज्योतिर्वाणीमंत्रो भजामि
तं यस्य शिष्यप्रशिष्याद्यैर्व्याप्तमेयं सांप्रतं म
ही सर्वज्ञस्य गुरोस्तस्य चरणौ संश्रये सदा
गुरोरपि गरीयान्मे यः कलाभिरलंकृतः
महैनानंदवाणाख्यस्तं वंदे श्रीमद्वारिधिं
ओतप्रोतमिदं सर्वं यस्मिन्नसाक्षिस्तवा

त्मके पर्यवस्यंतिवेदांतास्तत्राहंतदह
ं श्रीकृष्णचरणद्वंद्वंप्रणिपत्यनिबध्नतं
व्याकुर्वेग्रंथस्यसिद्धांतलेशसंग्रहसंज्ञितं
श्राचार्यचरणद्वंद्वस्मृतिर्लेखकहापिणं
मांकृत्वाकृतनेव्याख्यांनाहमत्रप्रभुर्यतः
कुमाराभ्यांविघ्नेश्वरस्कन्दाभ्यांशंक
रंशंकरस्यशिवस्यावतारत्वेपशंकराचा
र्यंभगवत्पादं तथाचशिवपुराणवचन
व्याकुर्वन्व्याससूत्रार्थंश्रुतेरर्थंयथोचि
वान् श्रुतेर्न्याय्यस्सएवार्थश्शंकरस्सवि
तानतइत्यादि व्याससंहत्वकृतंवादरायण
नारायणात्मकेनारायणस्यावतारत्वेप
तथाचवचनं द्वापरेद्वापरेविष्णुर्व्यासरू
पीमहामुनिरितितत्वन्यः पुंडरीकाक्षा
न्महाभारतकृद्भवेदित्यादिच ब्रह्मणःस
रस्वतीभर्तारंहिरण्यगर्भंशापन्नामभा
र्यावत्सापहारनिमित्तमापदं प्रामारत्नं
वस्सकोटिलाभनिमित्तंकृष्णाद्वैपदीकृ
ष्णस्यस्तुनेनस्य प्रकाशितंशिष्यशतेभ्यऊ
परिष्टंब्रह्मतत्वंयेनगुरूणामस्तनयोकृतं

१ सिं॰ले॰ टी॰ २

स्वयंज्योतिर्वाणीसंज्ञः स्वयंप्रकाशा सरस्व
तीसंज्ञः गरीयान् गुरुः इदं सर्वं यस्मिन्
सच्चित्सुखात्मकेऽद्वैते ब्रह्मणि ओतप्रोत
मथ्यस्तं वेदान्ताश्च यज्ज्ञाद्वैते विषये पर्यवस्य
ति तात्पर्येण बोधहेतवो भवन्ति तदहं ॥

ॐ स्वस्ति श्रीगणेशाय नमः अपिगतभिदा
स्वर्वाण्यार्यानुपेत्य महस्स्वया सरिदिव मही
भेदान्संप्राप्य शौरिपदोद्गता जयति भगव
त्पादश्रीमन्मुखाम्बुजनिर्गता जननहरि
णी सूक्तिर्ब्रह्माद्वयैकपरायणा १ ॥

ॐ स्वस्ति श्रीगणेशाय नमः मितिसंबंधः अद्वैते सर्व
स्य ओतप्रोतत्वोक्त्या ब्रह्मणस्सर्वाधिष्ठानत्वरूपं त
टस्थलक्षणमुक्तं सच्चित्सुखात्मक इत्यनेन सत्यज्ञा
नानंदस्वरूपात्मकं स्वरूपलक्षणमुक्तं तत्र वेदान्ता
नां पर्यवसानोक्त्योक्तरूपे ब्रह्मण्यद्वैते वेदान्ता एव
प्रमाणमित्युक्तं नाहमत्र प्रभर्यत इत्यत्र व्याख्याने
प्रभुः समर्थ इत्यर्थः चिकीर्षितस्य ग्रंथस्य निर्विघ्न
परिसमाप्तिप्रचयगमनयोस्सिद्धये भगवत्पादी
यभाष्यस्तुतिमुखेन भाष्यप्रतिपाद्यब्रह्मतत्त्वानुसं
धानलक्षणं मंगलाचरणं करोति अपिगतभिदे
ति दृष्टान्तमुखेन श्रीसूक्तिवरणारविंदगंगयोरु

संधानलक्षणमपि मंगलं करोति शौरीति शौरेर्विप
दोद्भवा सरित् महीभेदान् संख्याप्ययथा सहस्रधाप्र
थिगतभिदा नत्वा भगवत्पाद श्रीमन्नखांबुजनिर्ग
ता ब्रह्माद्वयैकपरायणा जननहरणी सूक्तिः उर्वी
वार्थान् व्याख्यातृन् व्याख्येयत्वेनोपेत्यार्थेन सहस्र
धाप्रथिगतभिदा सती जयतीति संबंधः अत्र सूक्ति
सहस्रधाप्रथिगतभिदेति सूक्तिविशेषणेन स्वग्रन्थप्र
दर्शयिष्यमाणसिद्धान्तभेदानां सर्वेषां भगवत्पाद
श्रीमन्नखांबुजनिर्गतासूक्तिरेव मूलमिति सूचित
म्प्रथिगतभिदा ग्रामभेदा सरिद्गां महीभेदान् भूप्र
देशान् शौरेः श्रीमहाविष्णोः पदोद्भवा पादांबुजनि
र्गता जयति सर्वोत्कर्षेण वर्तत इति सूक्तिः भगव
त्पादस्य श्रीमन्नखमेवांबुजं कमलं तस्मान्निर्गता
मुखेभ्रंबुजत्वारोपे कान्तिमत्त्वरूपं श्रीमत्त्वं निमित्त
मिति सूचनार्थं श्रीमदिति विशेषणं जननहरणी
जननं संसारस्तस्य जन्मबलज्ञानद्वारा हरतीति ज
ननहरणी सूक्तिः ग्रंथतोर्थतश्च निरवद्यं भाष्यं ब्र
ह्माद्वयैकपरायणा ब्रह्म च तदद्वयं च ब्रह्माद्वयं ब्र
ह्माद्वयं च तदेकं च ब्रह्माद्वयैकं परायणं परमतात्प
र्यविषयो यस्याः सूक्तेः सा ब्रह्माद्वयैकपरायणा अ
नेन विशेषणेन द्वितीयप्रपंचशून्यमेकरूपं सत्यज्ञा
नानंदलक्षणं ब्रह्म सूक्तिपदसंगृहीतस्य भाष्यात्म
कशास्त्रस्य विषय इत्युक्तं भवति जननहरणीति वि
शेषणेन शास्त्रस्य सूक्तेः प्रयोजनमित्युक्तं अर्थात्

१
सि·ले·
टी
३

3

मुक्तिकामः शास्त्रस्याधिकारी मुमुक्षोरधिकारिणश्च प्राप्य
प्राप्रभावलक्षणः संबंधश्च सूचितः १ ॥

प्राचीनैर्व्यवहारसिद्धविषयेष्वात्मैक्यसिद्धौ
परं संनह्यद्भिरनादरात्सरणयो नानाविधा
दर्शिताः तन्मूलानिह संग्रहेण कतिचित्सि
द्धान्तभेदान्धियः शुद्ध्यै संकलयामि तातच
रणव्याख्यावचःख्यापितान् २ ॥

एवं कृत्पर्थाभ्यां सार्द्धाद्धश्लोकेन भाष्यात्मकवेदान्त
शास्त्रस्य विषयादिकं कथयता ग्रंथकारेण स्वकीय
ग्रंथस्य वेदान्तशास्त्रप्रकरणत्वात्तस्यापि तदेव विष
यादीति सूचितं भवति इदानीं चिकीर्षितं प्रतिजानी
ते प्राचीनैरिति प्राचीनैराचार्यैरात्मैक्यसिद्धौ परमत्य
न्तसन्नह्यद्भिस्तात्पर्यवद्भिरात्मैक्यसिद्ध्युपायतया व्य
वहारसिद्धविषयेषु भ्रान्तिमात्रसिद्धपदार्थेषु जीवे
श्वरजगद्रूपेष्वनादरात्सरणयः प्रकारा नानाविधाः प
रस्परविरुद्धाः दर्शिताः अनादरादित्यनेन परस्परवि
रुद्धेषु जीवैकत्वनानात्वतत्प्रतिबिंबत्वादिरूपप्रका
रेष्वभिनिवेशवतामाचार्याणां भेदवादिनामिवाना
त्मत्वं स्यादिति शंका निराकृता भवति विवदितव
स्तुप्रतिपत्त्युपायतया विरुद्धनानाप्रकारप्रदर्शन
माचार्याणां न दोषाय भवति किन्त्वलंकारायैवमव

तिष्ठति प्रत्यूहाणां प्रसक्तावेव विशेषेण कस्यचित्प्रतिपत्तुः
केनचित्प्रकारेण मुक्तिसाधनब्रह्मात्मैकत्वज्ञानला
भात् तदुक्तं सुरेश्वराचार्यैः यया यया भवेत्पुंसां व्युत्प
त्तिः प्रत्यगात्मनि सा सैव प्रक्रियेह स्यात्साध्वी सा चा
नवस्थितेति व्युत्पत्तिः बोधः प्रत्यक्कूटस्थात्मा वा प्र
त्यगात्मा सर्वान्तरश्चिदात्मा तस्मिन् विषये प्रक्रिया प्र
कारः इह वेदान्तशास्त्रे साध्वी निरवद्या गुणभूता वा न
वस्थिता नानाविधा परिमले दीक्षितैरप्येतदुक्तमक
ल्पितवस्तुप्रतिपत्त्युपायतया कल्प्यमानेषु पदार्थे
षु विरोधो न दोषावहः यथा नाविकारं यती प्रतिप
त्त्युपायतया नानाप्रस्थैः कल्प्यमाना ह्रस्वत्वप्लावोदी
र्घादिनस्तत्तद्रूपास्तत्स्थूलाकारं यतीषु विरोधो न दोषा
वह इति तन्मूलान् प्राचीनप्रदर्शितनानाविधसर
णिमूलान् इह स्वग्रन्थेऽपि यः शुद्धस्वबुद्धिपरिष्का
राय वस्तुतस्तु लोकानुग्रहमेव प्रयोजनमिति वो
ध्यं नानाचरणानां परिचरणानां व्याख्यारूपैर्वचोभिः
ख्यापितान् ज्ञापितान् अनेन स्वस्य ब्रह्मविद्यामाचा
र्यादेव लब्धं दर्शयति स्वग्रन्थस्योपादेयत्वसिद्धये

नेष्टप्रपादनापेक्षान्यत्वज्ञापयो यथामति
प्रक्रियाः प्रपादयन्नेवालिखाम्यनन्ति विलक्षणान्
र् नत्वन्तावत् आत्मा वा अरे द्रष्टव्यः श्रोतव्य
इत्यधीतसाङ्गस्वाध्यायस्य वेदान्तैरापाततः

सि॰ले॰ टी॰ ५

प्रतिपन्ने ब्रह्मात्मनिसमुदितजिज्ञासस्य
तत्त्वानाय वेदांतश्रवणो विधिः प्रतीयमानः
किंविधइतिचिंत्यते तिस्रः खलु विधेयोर्विधयः
अपूर्वविधिर्नियमविधिः परिसंख्याविधि
श्चेति तत्रकालत्रयेपि कथमप्यप्राप्तस्य प्रा
प्तिफलको विधिराद्यः यथाव्रीहीन्प्रोक्षती
ति नात्रव्रीहीणांप्रोक्षणस्य संस्कारकर्मणो
विनानियोगमानांतरेण कथमपि प्राप्तिर
स्ति पक्षप्राप्तस्याप्राप्तांशापरिपूरणो वि
धिर्द्वितीयः यथाव्रीहीनवहंतीति ॥

इह संग्रहेण सिद्धांतभेदान्संकलयामीत्युक्तमेव
विहाणवत् ननु प्राचीनग्रंथसिद्धांतानामेव स्वग्रंथे
संग्रहइत्युक्तमयुक्तं प्राचीनग्रंथेषु विद्यमानस्यापि
युक्तिभिरुपपादनस्य स्वकीयसंग्रहग्रंथे तत्र तत्रो
पलंभादितिशंकांनिराकरोति नेत्थमिति स्वग्रंथे प्र
थमं श्रवणविधिर्विचार्यत इत्याह तत्र तावदिति श्र
वणविधावधिकारिणं निर्दिशति अधीतेति वेदांतै
र्जनितापातप्रतिपत्तिविषये ब्रह्माभिन्नात्मनिसस्य
कृदार्थेनोदिताऽत्यन्ताजिज्ञासानिर्णयरूपज्ञानेछा
यस्येत्यर्थः अधीतवेदस्यापिशिक्षाकल्पव्याकरणा
दीनांवेदांगानामध्ययनाभावेसति व्युत्पत्तेरभावा

ज्ञित्वात्साहेत्वभूतापातनप्रतिपत्तिरपि न संभवेदि
त्यभिप्रेत्याधीतसांगस्वाध्यायस्येत्युक्तं न च निर्दोष
वेदांतजन्यायाः ब्रह्मात्मप्रतिपत्तेः कथमापातनत्व
मिति वाच्यं नाहं ब्रह्मेति प्रत्यक्षविरोधादिशंकया
प्रमाणरूपायामपि ब्रह्मात्मप्रतिपत्तावप्रामाण्यशं
कास्पदत्वरूपस्यापातनत्वस्य संभवादिति भावः वेदां
तश्रवणेऽश्रोतव्य इति विधिः प्रतीयमान इति संबंधः
तज्ज्ञानायेति अप्रामाण्यशंकानास्पदब्रह्मात्मज्ञाना
येत्यर्थः खलप्राहेनापूर्वविधित्वादिप्रकारत्रयस्य
पूर्वतंत्रे प्रसिद्धिर्द्योत्यते कालत्रयेपीति कथमपि
दृष्टार्थत्वेनादृष्टार्थत्वेन वा केनापि प्रकारेण काल
त्रयेपि कदापि विधिं विना प्राप्तिरहितस्य प्रोक्षणादेः
प्राप्तिफलको विधिराद्यः अपूर्वविधिरित्यर्थः व्रीही
नितिद्वितीयाश्रुत्या व्रीहीणां संस्कार्यत्वावगमात्
प्रोक्षणस्य संस्कारकर्मत्वमुक्तमिति मंतव्यं नियोग
मितिविधायकशास्त्रमित्यर्थः ॥

अत्र विध्यभावेपि पुरोडाशप्रकृतिद्रव्याणां
तंडुलनिष्पत्त्याहेतोः पादेवावहननप्राप्तिर्भ
विष्यतीति न नत्वात्यर्थो यं विधिः किंत्वाद्वे
पादवहननप्राप्तौ नहदवलोकावगतका
रणत्वाविशेषान्नखविदलनादिरपि पक्षे
प्राप्नुयादिति अवहननाप्राप्तांशसंभवा

१ सि॰ले॰ टी॰ ५

5

तदेशपरिपूरणफलः द्वयोः शेषिणोरेक
स्य शेषस्य वा एकस्मिन् शेषिणि द्वयोः शे
षयोर्वा नित्यप्राप्तौ शेषिणस्तरस्य शेषान्तरस्य
वा निवृत्तिफलको विधिस्तृतीयः यथाग्नि
चयने इमामगृभ्णन्रशनामृतस्येत्यश्वा
भिधानीमादत्त इति यथा वा चातुर्मास्यान्त
र्गते हि विशेषे गृहमेधीये आज्यभागौ यज
तीति अग्निचयने ऽश्वरशनाग्रहणं गर्दभर
शनाग्रहणं चेति द्वयमनुष्ठेयं तत्राश्वरश
नाग्रहणे इमामगृभ्णन्निति मन्त्रो लिंगाद्दे
वरशनाग्रहणप्रकाशनसामर्थ्याद्रूपाद्वि
यं प्राप्नोति न तत्सामर्थ्यलब्धप्राप्तो शेषप
रिपूरणार्थो वा विधिः किं तु लिंगाविशे
षाद्गर्दभरशनाग्रहणेपि मन्त्रः प्राप्नुया
दिति तन्निवृत्त्यर्थः तथा गृहमेधीयस्य
दर्शपूर्णमासप्रकृतिकत्वादतिदेशादे
वाज्यभागौ नित्यप्राप्तावितिन तत्र विधि
स्तत्सामर्थ्यलब्धनियमार्थो वा किं त्वतिदेशा
त्प्रयाजादिकमपि प्राप्नुयादिति तन्निवृ
त्त्यर्थः ॥

पुरोडाशेति दर्शपूर्णमासयोराग्नेयादिपुरोडाशादि
द्रव्यं विहितं व्रीहयस्तत्पन्नेयागे यागानुवादेन वि
हितास्तथा च व्रीहीणामुत्पन्नशिष्टानामस्पति शिष्ट
पुरोडाशावहन्तेयागे साधनत्वायोगात् पुरो
डाशप्रकृतिद्रव्यत्वेन यागसाधनत्वपर्यवस्यति पु
रोडाशप्रकृतित्वं च व्रीहीणां तण्डुलनिष्पत्तिद्वारकं
तण्डुलनिष्पत्तिश्च स्वकारणमाक्षिपति तण्डुलनिष्प
त्तौ च कारणमन्वयव्यतिरेकाभ्यामवहननं निश्चितमि
ति विधिं विनापि विधित्सितावहननप्राप्तिरस्तीत्यर्थः
नन्ववहननस्य लोकतः प्राप्तौ तस्य लोकतएव नि
त्यप्राप्तिरपि स्यादित्यत आह किंत्वित्यादिना आद्ये
पादे इति तण्डुलनिष्पत्त्यादेपादेत्यर्थः किंत्ववहन
नाप्राप्तांशसद्भावात्तदंशपरिपूरणफल इति संबंधः
द्वयोरिति द्वयोः शेषिणोरेकस्य पूर्वस्यानित्यप्राप्तौ
प्राप्त्यन्तरस्यानिहतिफलकः एकस्मिन् शेषिणि द्वयोः
शेषयोर्नित्यप्राप्तौ प्राप्त्यन्तरस्यानिहतिफलको वा वि
धिरस्तीय इति योजना ननदिति प्राप्तत्वात्तत्प्राप्त्य
र्थः नित्यप्राप्तत्वान्न तदप्राप्तांशपूरणार्थो वेत्यर्थः
अतिदेशादेवेति प्रकृतिवद्विकृतिः कर्तव्यैवंरूपाद
त्यर्थः ननत्रविधिरिति आज्यभागौ यजतीति विधिरा
ज्यभागयोः प्राप्त्यर्थो न भवति विधिं विनाप्राप्तत्वात्
नयोरप्राप्तांशपरिपूरणार्थो वा न भवति नित्यप्राप्त
त्वात्किं तत्र विहित्यर्थ इति योजना ॥

१
सिं·ले
टीं
८
6

गृहमेधीयाधिकरणे एवंप्रद्वरीत्याऽऽदमु
दाहरणं यत्तु क्वचिदुदाहृते व्रीहिस्तु दाहृ
ते नच नियमविधावपि पक्षप्राप्ताववहन
नस्याप्राप्तांशपरिपूरणेऽकृते तदवकृष्ट
त्वात्पाक्षिकस्यायनान्तरस्य नखविदलना
देर्निवृत्तिरपि लभ्यत इति निवृत्तिफलक
त्वाविशेषान्नियमपरिसंख्ययोः फलतोऽवि
वेको न युक्त इति शंक्यं विधिनावहननि
यमं विनाप्युपलभ्यस्य नखविदलनादेर्नि
वर्तयितुमशक्यत्वात्तयाऽप्राप्तांशपरिपूरणा
रूपस्य नियमस्य प्राप्त्यस्याहितेयावहनन
गतत्वेन प्रत्यासन्नत्वात्तस्यैवानियमवि
धिफलत्वोपगमात् तदनुनिष्पादित्वात्प्रावि
धेयगतत्वेन विप्रकृष्टायास्तन्निवृत्तेः सं
निकृष्टफलसंभवे फलत्वानौचित्यात् ए
वं विविक्तास्तति सष्टुविधेर्विधास्व किं विधेः
स्ववर्णविधिराम्नीयेन तत्र प्रकटार्थकारादे
यः केचिदाहुः अपूर्वविधिरयमप्राप्तत्वात्

नत्वाज्यभागौ यजतीति विधेरतिदेशप्राप्तेन रांगक

लापपरिसंख्यापकत्वेन सिद्धांतइत्यत आह ग्रहमे
धीयाधिकरणेति नियमविधावपीतिपरिसंख्यावि
धाविवानियमविधावपीत्यर्थः तदवरुद्धत्वादिति
अवहननेनैवावरुद्धत्वान्नखदलनिष्पत्त्यादेः पक्षप्राप्त
त्वादित्यर्थः फलतइति नियमविधेः पक्षेप्राप्ताव
हननादिक्रियाविधायकत्वात् परिसंख्याविधेश्चनि
त्यप्राप्तक्रियादिविधायकत्वान्नियमपरिसंख्याविध्योः
स्वरूपतो विवेकलाभेपि फलतोभेदो नयुक्तइत्यर्थः
नियमस्यानियमविधिफलत्वोपगमेहेतुद्वयमाह
प्राप्त्यभावादित्यादिना प्रत्यासन्नत्वादितिविधिं प्रतिप्र
त्यासन्नत्वादित्यर्थः विधेयक्रियागतत्वेप्रत्यासन्नत्वे
हेतुः इतरनिवृत्त्यपेक्षया प्रथमोपस्थितत्वरूपेप्रा
प्यमेहेतुमाह विधितइत्यादिना अशक्यतयेत्यनेन
इतरनिवृत्तेर्नियमविधिफलत्वानुपगमेहेतुद्व
यमाह तदनुनिष्पादित्वाइत्यादिना अप्राप्तांशपरि
पूरणोपस्थित्यनंतरमुपस्थितत्वादित्यर्थः अनेनवि
लंबितोपस्थितिकत्वमेकोहेतुरुक्तइतिमंतव्यं द्विती
येहेतौ विप्रकृष्टत्वेहेतुमाह अविधेयेति व्याहतिर्नी
मानतुहेयतामनेगतावा साचानियेपनखविदल
नादिगतेत्यर्थः इदानींप्रकृतेश्रवणविधिविचारमारभ
ते एवमिति अप्राप्तत्वादिति ब्रह्मसाक्षात्कारं प्रतिवेदा
न्तश्रवणस्य साधनतायामानांतरादनधिगतत्वेना
प्राप्यर्थत्वादित्यर्थः ॥

नहि वेदांतश्रवणं ब्रह्मसाक्षात्कारे हेतुरित्य
त्रान्वयव्यतिरेकप्रमाणमस्ति लोके कृत
श्रवणस्यापि बहुशस्तदनुत्पत्तेः अकृतश्र
वणस्यापि गर्भगतस्य वामदेवस्य तदुत्पत्ते
रुभयतो व्यभिचारात् नवा श्रवणमात्रं श्रो
तव्यार्थसाक्षात्कारे हेतुरिति शास्त्रान्तरे गृही
तः सामान्यनियमोऽस्ति येनात्र विशिष्टहेतु
त्वग्राहकाभावेऽपि सामान्यमुखेनैव हेतुत्वं
ग्राह्यत इति शंकोत्तन गांधर्वादिशास्त्रश्रवण
स्य षड्जादिस्वरसाक्षात्कारे हेतुत्वाभ्युपगमे
ऽपि कर्मकांडादिश्रवणात्तदर्थधर्मादिसा
क्षात्कारादर्शनेन व्यभिचारात् तस्मादपूर्व
विधिरेवायं ॥

ननु मानांतरादनधिगतत्वमसिद्धमन्वयव्यतिरेका
भ्यां तदवगतिसंभवात् तथाहि वेदांतश्रवणे सति
ब्रह्मसाक्षात्कारोत्पद्यते असति च तस्मिन्नोत्पद्यत इ
ति तत्राह नहीति तदनुत्पत्तेरिति साक्षात्कारानुत्पत्ते
रित्यर्थः वामदेवस्येति तथाच श्रुतिर्गर्भ एवैतच्छया
नो वामदेव एवमुवाचेति एवं पूर्वोक्तप्रकारेण एत
द्ब्रह्मज्ञानजन्मनाश्वकीयां मुक्तिमुवाचेत्यर्थः ननु गां
धर्वशास्त्रश्रवणे षड्जादिस्वरसाक्षात्कारस्तदभावेन

दभावइति दृष्टं न च श्रोतव्यार्थविशेषस्य साक्षात्का
रं प्रति गांधर्वशास्त्रविचारात्मकस्य श्रवणविशेषस्य
कारणत्वग्रहकाले लाघवात् श्रोतव्यार्थसाक्षात्कार
त्वावच्छिन्नं प्रति श्रवणमात्रस्य कारणत्वं गृह्यते तथा
च ब्रह्मसाक्षात्कारवेदांतश्रवणयोर्विशिष्य कार्यकार
णभावग्रहाभावेपि ब्रह्मसाक्षात्कारस्यापि श्रोतव्या
र्थसाक्षात्कारत्वात् वेदांतश्रवणस्यापि श्रवणत्वा उक्त
सामान्यरूपेण श्रवणस्य ब्रह्मसाक्षात्कारहेतुत्वं प्राप्त
मेवेति नापूर्वविधिरिति नेत्याह नवा श्रवणमात्रमिति
धर्मश्रवणस्य लेशदृष्टरूपस्यालौकिकश्रेयसाध
नताविशिष्टयागादिरूपस्य वा धर्मस्य साक्षात्कारा
योग्यतया साक्षात्कारादर्शनेन उक्तसामान्यकार्यका
रणभावस्य व्यभिचारान्न लाघवावतार इति गांधर्वशा
स्त्रश्रवणस्यान्वयादिना स्वरसाक्षात्कारहेतुत्वग्रहेपि
वेदांतश्रवणस्य न ब्रह्मसाक्षात्कारहेतुत्वप्राप्तिरित्या
ह गांधर्वादीति कर्मेति श्रद्धादिपदेन हिरण्यगर्भादि
देवताप्रतिपादकवाक्यजातं गृह्यते धर्मादीत्यादिप
देन हिरण्यगर्भादिदेवता गृह्यते तस्मादिति प्राप्त
भावादित्यर्थः ॥

भाष्येपि सहकार्यन्तरविधिः पक्षेण तृतीयं त
द्वतो विध्यादिवदित्यधिकरणे विद्यासहका
रिणो मौनस्य बाल्यपांडित्यवद्विधिरेवाश्रयि
तव्यपूर्वत्वादिति पांडित्यशब्देन श्रवणं

१
सि॰ ले॰
टी॰
८

पूर्वविधिरेवाङ्गीकृत इति ॥

अत्रार्थे सम्मतिमाह भाष्येपीति भाष्येपि पूर्वविधिरेवा
ङ्गीकृत इति संबंधः अयमर्थः बृहदारण्यके श्रूयते त
स्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पा
ण्डित्यं च निर्विद्याथ मुनिरिति यस्मादतिक्रान्ता ब्राह्मणाः
श्रवणादिसाधनैरात्मानं विदित्वा जीवन्मुक्तिखजकं
सकलविक्षेपरहितं परमहंसाश्रमं प्राप्तास्तस्मादि
दानीन्तनोपि ब्राह्मणो ब्रह्मसाक्षात्कारार्थी पाण्डित्यं नि
र्विद्य बाल्येन स्थातुमिच्छेत् विचारप्रयोजकापात
रूपा बुद्धिः पण्डा सास्य संजातेति पण्डितस्तस्य कृत्यं
पाण्डित्यं श्रवणमित्यर्थः बाल्यं नाम बालस्य शिशोः
कृत्यं दंभदर्पादिराहित्यं न तु बाले प्रसिद्धं यथेष्टचेष्टा
रूपं तस्य बहिर्मुखत्वापादकत्वेन विद्याविरोधित्वा
द्दंभादिराहित्यरूपभावशुद्धिवाचकेन बाल्यपदे
न भावशुद्धिसाध्यमननं लक्ष्यते श्रवणानन्तरभा
विनस्तस्य बाल्यं च पाण्डित्यं च निर्विद्य निश्चयेन लब्ध्वा
तदुभयं सम्यगनुष्ठायेति यावत् अथानन्तरं मुनिस्त
स्यान्मननशीलो भवेदिति विधिः ध्यानमत्र मननं ध्या
ननिष्ठेत्यासादौ मुनिशब्दप्रयोगदर्शनात् ध्यानं वि
ना विचारमात्रविश्रान्ते तत्प्रयोगाच्च न ध्यानपूर्वकत्वा
यथा श्रवणे विधिरेवं मौनस्य विद्यासहकारिणो विद्यो
त्पन्नोसाधनस्य विधिरेवाश्रयितव्यः अपूर्ववादे वेति
भाष्यार्थः सूत्रार्थस्तु तद्वतः श्रवणमननजनित त

त्वनिर्णयरूपविद्यावतस्तत्त्वसाक्षात्कारार्थिनः संन्या
सिनः पाण्डित्यबाल्यापेक्षयान्तनीयं मौनमथ मुनिरि
ति वाक्येन विधीयते ननु पाण्डित्यबाल्याभ्यां निर्णीततत्त्व
साक्षात्कारार्थी ध्याने स्वयमेव प्रवर्त्तते तत्त्वसाक्षा
त्कारार्थी वरं तत्त्वगोचरश्रवणस्य संततौ न च तत्त्वसा
क्षात्कारार्थिनस्तस्यापनश्रवणादावपि स्वयमेव प्र
वृत्तिः स्यादिति तत्रापि विधिवैयर्थ्यशंका तुल्येति वा
च्यं विधिं विना वेदान्तश्रवणे प्रवृत्त्यसंभवस्य साधित
त्वात् तथा च मौनविधिवैयर्थ्यमित्यत आह पक्षेणेति मौन
स्य सहकार्यन्तरस्य विधिरंगीकर्त्तव्यः पक्षेणाप्राप्ति
सत्त्वात्साक्षात्कारार्थं ध्याने ॥

वेदान्तश्रवणस्यानित्यापरोक्षब्रह्मसाक्षा
त्कारहेतुत्वेनाप्राप्तं अपरोक्षवस्तुविषय
प्रमाणत्वावच्छेदेन साक्षात्कारहेतुत्वप्रा
प्तेः शाब्दापरोक्षवादे व्यवस्थापनात् तद
र्थमेव हि तत्प्रस्तावः ॥

स्वयमेव प्रवर्त्तमानस्यापि विषयदर्शनप्राबल्यात्
ध्यानस्य कदाचिदप्राप्तिः संभवति तथा च मौनविधे
रपूर्वविधित्वाभावेऽपि नियमविधित्वं सिध्यत्येव सति
च नियमविधौ तदतिक्रमे नियमादृष्टालाभेन साक्षा
त्कारानुदयभीत्या स्वभावप्राप्तमपि विषयदर्शनं त्य

त्वेन निवार्य ध्यानस्यैव प्रवर्तनमिति पदेनेति सूत्र
भागाभिप्रायः ननु ब्रह्मविद्याप्रधाने प्रकरणे कथं ध्या
नादिविधिर्वाक्यभेदप्रसंगादिति नेत्याह विध्यादिव
दिति अंगविधिवदित्यर्थः यथा प्रधानविधिपरे प्रक
रणे अवांतरवाक्यभेदेन प्रयाजाद्यंगविधिस्तथा ब्र
ह्मविद्यांगध्यानादिविधिरित्यर्थः उक्तरीत्या मौनवि
धेर्नियमविधित्वेऽपि नेभाष्यकृतामपूर्वत्ववचनं मौ
नविधेः पाक्षिकाप्राप्त्यभिप्रायं द्रष्टव्यं यथा सूत्रं प
क्षेणाप्राप्त्यभावादित्येव वक्तव्ये भाष्ये अपूर्वत्वादिति
वचनं श्रवणविधिरपूर्वविधिरेवेति ज्ञापनार्थमप्रा
प्तिमात्रे च दृष्टांतदार्ष्टांतिकभावो विवक्षित इति प्रक
टार्थकारादीनामाशयः अपूर्वविधित्वपक्षं दूषय
ति वेदांतश्रवणस्येति विचारविशिष्टवेदांतरूपस्य श्र
वणस्य ब्रह्मसाक्षात्कारहेतुत्वं विधिं विनापि प्राप्तमित्य
र्थः ननु वाक्यस्य कथं साक्षात्कारहेतुत्वं इंद्रियजन्य
ज्ञानस्यैव साक्षात्कारत्वादत आह अपरोक्षवस्त्विति
अपरोक्षवस्तुविषयकत्वं ज्ञानस्यापरोक्षत्वं न त्विंद्रि
यजन्यत्वं वस्त्वापरोक्ष्यं च वस्तुव्यवहारानुकूलचैत
न्याभिन्नत्वमिति शाब्दापरोक्षवादे वक्ष्यते तथा चाति
स्यापरोक्षत्वेन श्रुतिसिद्धब्रह्मरूपवस्तुविषयकत्वा
द्वेदांतजन्यज्ञानस्य साक्षात्कारत्वसिद्धिरित्यर्थः नन्व
स्मिन्पक्षे शाब्दापरोक्षवादस्य का संगतिरत आह
तदर्थमेव हीति वेदांतानां ब्रह्मापरोक्ष्यप्रमितिजनक
त्वसिद्ध्यर्थमेव तद्वादसंगतिर्नीत्यार्थमित्येतत्प्रसिद्धमित्य
र्थः ॥

नचनावगतब्रह्मप्रमाणत्वेनापातदर्शनसा
धारणब्रह्मसाक्षात्कारहेतुत्वश्रामावण्यावि
यानिहत्यर्थमिष्यमाणसत्तानिश्चयरूपत
त्साक्षात्कारहेतुत्वंश्रवणस्यनशाममितिवा
च्यं विचारमात्रस्यविचार्यमात्रनिर्णयहेतु
त्वस्यब्रह्मप्रमाणस्यतत्साक्षात्कारहेतुत्वस
वशामो विचारितवेदांतवाक्यज्ञानरूपस्यश्र
वणस्यतद्धेतुत्वशामेः नचोक्तउभयतोव्य
भिचारःसहकारिवैकल्येनान्वयव्यभिचार
स्यादोषत्वात् जातिस्मरस्यजन्मान्तरश्रवण
फलसंभवेनव्यतिरेकव्यभिचाराभावात्

नन्वपरोक्षवस्तुविषयकंप्रमाणंस्वविषयेसाक्षात्का
रहेतुरितिशास्त्रापरोक्षवादेप्रसाधनेनवेदांतानाम
पिस्वविषयेनित्यापरोक्षेब्रह्मणिअपरोक्षज्ञानसामा
न्यहेतुत्वमेवशाम्नं नतुसत्तानिश्चयरूपतत्साक्षात्का
रहेतुत्वं नह्यविचारविशिष्टवेदांतरूपश्रवणस्यैव
युक्तमन्यथाविचारानुरागापिसत्तानिश्चयप्रसंगात्
नचवाक्यजन्यसाक्षात्कारमात्रादेवाविद्यानिवृत्तिल
क्षणफलसंभवात् सत्तानिश्चयरूपत्वसाक्षात्कारस्य
नान्वेषणीयमितिवाच्यं नत्रनत्रब्रह्मोपदेशाप्रदेशे
षुयावत्संशयनिवृत्तिपुनःपुनःप्रश्नप्रतिवचनलिं

१
सि॰ले॰
टी॰
१०

10

गेन वेदांतविज्ञानसुनिश्चितार्थस्य नान्वेषणीयमिति
वाच्यं तत्र तत्र ब्रह्मोपदेशप्रदेशेषु यावत्संशयानि
वृत्ति पुनः पुनः प्रश्नप्रतिवचनैर्यो इत्यादिश्रुत्याश्रुतत्र
लणोपि यथा पूर्वं संसारानुवृत्त्यनुमिताविद्यायानि
वृत्त्यभावरूपलिंगेन च श्रवणमननध्यानशमदमभ
क्तिवैराग्यादीनां ज्ञानपरिपाकहेतूनां विपिदर्शन
लिंगेन च सतां निश्चयरूपब्रह्मसाक्षात्कारस्यैवावि
द्यानिवृत्त्यर्थमिष्यमाणत्वात् तथा च वेदांतश्रवणस्या
क्तरूपसाक्षात्कारहेतुत्वमशममेवेति शंकते न
चतावतेति वेदांतानामिति शेषः अपरोक्षवस्तुवि
षयकं प्रमाणं स्वविषये साक्षात्कारहेतुरिति प्रसाध
नमात्रेणेत्यर्थः अपरोक्षवस्तुविषयकं प्रमाणमप
रोक्षज्ञानहेतुरिति स्थिते विचारो विचार्यनिर्णयहेतु
रिति च स्थिते कार्यकारणभावद्वयमेलनेन प्रकृते
विचारविशिष्टवेदांतज्ञानरूपश्रवणं सतां निश्चय
रूपब्रह्मसाक्षात्कारहेतुरिति सिध्यतीत्याह विचार
मात्रस्येति सहकारीति चित्तैकाग्र्यरूपसहकारिवै
कल्येनेत्यर्थः उक्तकार्यकारणभावद्वयरूपप्रमाण
बलेन श्रवणस्य ब्रह्मसाक्षात्कारहेतुत्वे सिद्धे वामदे
वस्य जन्मांतरीयं श्रवणादिकं कल्पते यथा जातमा
त्रे जंतोर्दृश्यमानभोगस्य कारणं तत्प्राग्भवीयकर्म
कल्पते तद्वदतो न व्यतिरेकव्यभिचार इत्याह जाति
स्मरस्येति पूर्वस्यातिस्मरतो वामदेवस्येत्यर्थः ॥

अन्यथा व्यभिचारेण हेतुत्वबाधे श्रुत्यापादितस्या
यतनमात्रानासंभवात् घटमात्राकारे व्य
तिरेकेण त्वगिन्द्रियमिव ब्रह्ममात्राकारे
श्रवणातिरेकेणोपायान्तरमस्तीति शङ्का
यां व्यतिरेकव्यभिचारस्याप्यदोषत्वाच्च तथा
वश्रामत्वान्नाप्यैवं विधिः अत एवाहुतिरस
कृदुपदेशादित्यधिकरणभाष्ये दर्शनपर्य
वसानानि हि श्रवणादीन्यावर्त्यमानानि दृ
ष्टार्थानि भवन्ति यथावघातादीनि तण्डुल
निष्पत्त्यवसानानीति श्रवणस्य ब्रह्मदर्शना
र्थस्य दृष्टार्थतया दर्शपूर्णमासिकावघात
न्यायप्राप्तावाहस्तुपदेशः अपूर्वविधित्वे
न समन्तु ज्ञाने सर्वोपयावघातवत् अग्नि
चयने सर्वौषधस्यस्यायोगित्वावहत्यथैतद
पदस्थानीत्युपयोल्लूखलसंस्कारार्थत्वेन
विहितस्यावघातस्य दृष्टार्थत्वाभावान्नाह
तिरिति नेत्र लक्षणोऽस्यितं अतो नियमवि
धिरेवायं ॥
अन्यथेति उक्तरीत्या द्विविधव्यभिचारपरिहारानुपग
मस्यार्थः व्यभिचारनिश्चयेन हेतुत्वाभावरूपबाधति

श्रयाच्छ्रवणविधेरबोधकतापत्त्या नवाप्यपूर्वविधिर्ने
स्यादित्यर्थः ब्रह्मसाक्षात्कारे श्रवणमिव तपो विशेषा
दिकमप्युत्कृष्टजन्मप्राप्तिरूपं वा कारणांतरमस्तीति शंका
कालेवामदेवस्य कारणांतरात् ज्ञानमुत्पन्नमिति शं
कासंभवेन श्रवणस्य वामदेवे व्यतिरेकव्यभिचारज्ञा
ने श्रवणस्य साक्षात्कारहेतुत्वग्रहप्रतिबंधकं न भव
ति नचैकस्य पदार्थस्य ज्ञाने परस्परानिरपेक्षकारण
द्वयासंभवेन ब्रह्मसाक्षात्कारे कारणांतरसत्त्वशंकै
व न जायज्जायत इति वाच्यं लोके तथा दृष्टत्वादित्याह
घटेति वेदांतश्रवणस्य ब्रह्मसाक्षात्कारहेतुत्वे विधिं
विनैव प्राप्तेः फलितमाह तथाचेति श्रवणादिविधे
र्नियमविधित्वसत्त्वेवाहत्यधिकरणं संगच्छत इत्याह
अत एवेति अपूर्वविधित्वाभावादेवेत्यर्थः अत एवाह
मुपदेशा इति संबंधः दर्शनपर्यवसानानीत्यारभ्यतं
डुलनिष्पत्त्यवसानानीत्यंतस्य भाष्यस्यायं योजना दृ
ष्टार्थानि श्रवणादीन्यावर्त्यमानानि संति दर्शनपर्य
वसानानि भवंति यथावघातादीन्यावर्त्यमानानि तंडु
लनिष्पत्त्यवसानानि भवंतीति दृष्टार्थानीत्यत्र दृष्टफ
लमात्मदर्शनमेवायं भावः आत्मा वा अरे द्रष्टव्यः श्रो
तव्य इत्यादिना आत्मदर्शनोद्देशेन श्रवणादीनि विधी
यंते नत्राकि ॥

तदभावे हि यथा वस्तु किंचिच्छब्दबाधी ह्यप्रमा
णत्वस्याग्रहीते सूक्ष्मे विशेषांतरे केनचि
त्कथिते तदवगमायतस्यैव चद्वः पुनर

पिष्णियानेआपारेप्रवर्तते एवंमननमावृ
त्तितिगृह्यमाणेजीवेवेदांतैरध्ययनगृहीतै
रुपादिष्टंनिर्विशेषब्रह्मचैतन्यरूपत्वमाक
र्ण्यतदेवगमायतत्रभावयानेमननमप्रवर्ति
यानेकदाचित्स्वरूपतःप्रवर्तेतेतिवेदांतश्रव
णेप्रवृत्तिःपाक्षिकीस्यात् ॥

मेतानिसकृदनुष्ठेयानिकिंवायावदात्मदर्शनमाव
र्त्तनीतिसंशयेसकृदेवानुष्ठेयानितावताविधेयशास्त्रि
तार्थ्यात् यथाग्न्यग्निचयनेसर्वौषधस्यपूरयित्वाश्रवहं
तीतिवाक्यविहितंसर्वौषधीनामवहननमुपयेयोलू
खलसंस्कारकंपिसकृदेवानुष्ठीयतेतद्वत्तथाचसकृ
दनुष्ठितश्रवणादिजन्यमदृष्टंजन्मान्तरेब्रह्मदर्शनहे
तुरित्यपूर्ववित्सिद्धंश्रवणादिविधीनामितिप्राप्तेसिद्धा
न्तःश्रवणाद्यावृत्तिःकर्तव्याकुतःअसकृदुपदेशात्तथा
हिभृगुवल्यांभृगुंप्रतिपिताअसकृत्तपसाब्रह्मविजिज्ञा
सस्वेत्युपदिशतितपश्चालोचनंब्रह्मविचारस्तथाछां
दोग्यषष्ठाध्यायेश्वेतकेतुंपुत्रंप्रतिपिताविचारपूर्व
कमसकृत्तत्त्वमसीत्युपदिशति किंचश्रवणादिभिरा
त्मदर्शनफलेजननीयेश्रवणाद्यावृत्तिरूपदृष्टद्वारसंभ
वेअदृष्टद्वारकल्पनायोगात्तत्त्वंपदार्थयोःश्रवणाद्या
वृत्तिंविनाऽवबोधत्वाच्चतंडुलनिष्पत्तिफलकावघात
वदावृत्तिरेवनत्वग्निचयनांतर्गतावघातवदनावृत्तिस
दंतर्गतावघातस्यादृष्टार्थत्वेनवैषम्यादितिसूत्रादित

१
सि॰ ले॰
टी॰
१२

माहात्म्यपिकरणेतदसर्वे विधिवादिनां न संगच्छन्त इति नेत्रलन्तणमेकादशाध्यायः अत एवइतिप्रामत्वादित्यर्थः अस्य हेतोरेवकारार्थः सर्वविधित्वाभावेन्वयः नियमविधित्वे हेतुमाह तदभावेहीति तदभावेमनस एवसावधानेनत्रनिधानेकदाचित्पुरुषः प्रवर्तते नेति संबंधः मनसा गरप्रमाणात्मगतविक्षेपग्रहणाय मनोव्यापारएवयत्ने नप्रहतौ दृष्टांतमाह यथेति किंचिदिति रत्नादीत्यर्थः तत्रेति रत्नादावित्यर्थः तस्यैवेति नत्रव्यापारांतरइत्येवकारार्थः पुनरपिवत्तषोव्यापारेप्रवर्तत इति संबंधः प्रणिधानेयथाभवतितथा प्रवर्ततइति प्रहतिक्रियाविशेषणं प्रणिधाने तन्न रत्नादिवस्त्वभिमुखनयावचक्षुषःस्थापनमनंतरमुन्मीलनव्यापारानुकूलयत्नःप्रहतिरिति प्रणिधानप्रहत्योर्भेदः वेदांतैरिति नेहनानास्ति किंचनप्रज्ञानंब्रह्माहंब्रह्मास्मीत्यादिभिरित्यर्थः इहब्रह्मणिनानात्वात्ज्ञानज्ञेयरूपेणाभिन्नविशेषजातं किंचिदपिनास्ति प्रकृष्टंज्ञानंप्रज्ञानंनित्यस्वप्रकाशजीवचैतन्यंब्रह्माहं बुध्यादिसाक्षिभूतचिदात्माब्रह्मास्मिभवामीतिश्रुतीनामर्थः अध्ययनपदंसांगाध्ययनपरं आकर्णपरोक्षतयाज्ञात्वाश्रुतौश्रद्धयानस्तदधिगमायेत्यर्थः तत्रेति अहमितिगरप्रमाणात्मनीत्यर्थः सावधानमेकाग्र्ययथाभवतितथा ॥

अप्राप्यमनसासहेतिश्रुतिस्तु मनसैवानु

द्रष्टव्यपनेत्वग्र्यया बुद्ध्यात्यपि श्रवणेना
नवहितमनोविषये निशंकासंभवात् ॥

नन्वहमिति रस्यमाणजीवे विशेषाकारेणानन्तरं वेदां
तश्रवणस्यैव कदाचिन्मनोव्यापारे वेदान्तविचारनिरपे
क्षेऽपि प्रवृत्तिः स्यादित्यत उक्तं श्रुत्या ब्रह्मणो मनोविषयत्व
निषेधात्सोगाध्ययनवत्तन्निषेधावगतिसंभवादि
ति नेत्याह श्रुत्याद्येति स्फूर्तिरनवहितमनोविषयेति सं
बंधः वाचः सत्यज्ञानादिशास्त्राः श्रुत्याद्यशब्द्या ब्रह्मप्रति
पाद्य मनसा सह निवर्तन्ते लक्षणामाश्रयेणेत्यर्थः म
नसा सहेत्यनेन मनसोऽपि ब्रह्मणि प्राप्तिर्निषिध्यत इ
ति भावः ब्रह्मणि मनोविषयत्वनिषेधवत्तद्विषयत्व
मपि श्रुत्योच्यते तथा च श्रुत्योर्विरोधे सति मनःसहि
तबुद्धिगम्यत्वप्रतिपादकश्रुतौ बुद्धेरग्र्यत्वविशेषण
बलाद्विषयत्वनिषेधश्रुतेरनवहितमनोविषयत्व
निषेधार्थकत्वप्रतीतेस्तथा च सांगाध्ययनवदुक्त
व्यवस्थाप्रतीतिसंभवान्मनस एव व्यापारे प्रवृत्तिर्दु
र्वारेत्याह मनसैवेति अनवहितत्वमेकाग्रताशून्यत्वं
शंकासंभवादिति अग्र्यत्वविशेषणसामर्थ्येन यथोक्त
व्यवस्थानिश्चयसंभवादिति वक्तव्ये शंकासंभवादि
त्युक्तेरयमाशयः निर्गुणब्रह्मसाक्षात्कारे मनसः क
रणत्वं नास्ति औपनिषदत्वश्रुतिविरोधात्सोपाधिका
त्मसाक्षात्कारेऽपि न तस्य करणत्वं तत्साक्षात्कारस्यानि
त्यसाक्षिरूपत्वात् मनसैवानुद्रष्टव्यमित्यादौ तृतीया

१
सिं॰ ले॰
टी॰
१३

13

वाक्योत्थवृत्तिसाक्षात्कारं प्रति साधनत्वाभिप्रायेत्यादि
कं सर्वेशास्त्राणां परोक्षवादे वदन्ते तथा च वस्तुतो मनसः
करणत्वाभावात् मनस एव व्यापारेषु रूढः कदाचित्प्र
वर्त्तते मुमुक्षोरिति नियमविधिव्यावर्त्यमसंगतमेवेति

अथवा जुष्टं यदा पश्यत्यन्यमीशमस्य महि
मानमिति वीतशोक इत्यादिश्रवणाद्धि ।
आत्मज्ञानान्मुक्तिरिति निश्चयसंभवेन मुक्ति
साधनज्ञानायभिआत्मविचाररूपशास्त्रा
न्तरश्रवणेऽपि पक्षे प्रवृत्तिः स्यादित्यहितनी
यात्मपरवेदान्तश्रवणनियमविधिरस्तु

अत एव व्यावर्त्यान्तरमाह अथवेति अधीतसांगस्वा
ध्यायस्य हि तरति शोकमात्मविदित्यादिश्रुत्या आ
त्मज्ञाने मुक्तिसाधनमिति ज्ञाने भवति न च सांगाध्य
यनवतोऽपि लोके विचारमन्तरेणात्मतत्त्वज्ञानजन्मा
स्ति आत्मप्रतिपादकवेदान्तेषु नानाविधयोजनासं
भावनया तात्पर्यसंशयादेरनुभवसिद्धत्वात्तत्र मु
क्तिसाधनज्ञानार्थी तज्ज्ञानप्रतिबंधकतात्पर्यभ्रम
संशयादिनिरासाय वेदान्तविचारे प्रवर्त्तमानो यथा
वन्मीमांसाशास्त्रे प्रवर्त्तते तथैव न्यायसांख्यादिशा
स्त्रविचारेऽपि कदाचित्प्रवर्त्तेत तत्रापि तदभिमतयो
जनया वेदान्तविचारसत्वात् न च सांख्यादितर्कशा

स्वगतात्मविचारस्याद्वितीयात्मविचाररूपत्वाभावेन
तादृशात्मनिवेदांतानां तात्पर्यभ्रमसंभावनायाश्च निवर्त्त
कत्वाद्विशिष्टस्यैवमेवं न च तात्पर्यभ्रमादिहेतुत्वाच्च
न तत्रात्मज्ञानार्थिनः प्रवृत्तिः संभवतीति वाच्यं जीव
भिन्नपरमात्मज्ञानं मुक्तिसाधनमिति भ्रमेणात्रापि
प्रवृत्तिसंभवात् न च सांगाध्ययनवतो भिन्नात्मज्ञानं
मुक्तिसाधनमिति भ्रमो न संभवति ब्रह्मवल्ल्यामिव
त्मविदाप्नोति परमित्यादिवेदांतेषु जीवाभिन्नपरमा
त्मज्ञानस्य मुक्तिसाधनत्वप्रतीतिरिति वाच्यं जुष्टं य
दा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इ
ति श्रुतिगतान्यपदेन भ्रमसंभवात् यदाईशसान्नि
ध्यमात्रेण बुद्ध्यादिप्रवर्त्तकं ह्यन्यं वस्तु गत्वा बुद्ध्यादि
भ्यो भिन्नं भ्रांत्वा बुद्ध्याद्यभिन्नत्वेन चिदात्मनोऽगृहीतत्वा
त् भिन्नत्वोपदेशः सफलेन तु जीवाभिन्नमित्यर्थः जी
वब्रह्मभेदस्य प्रत्यक्षसिद्धतया उपदेशानपेक्षत्वात्
जुष्टं ऋषिसंघैः सेवितं ऋषिसंघजुष्टमिति कृत्यन
गत्यपश्यति ईशोऽहमिति साक्षात्करोति तदास्य ईश
स्य महिमानं महत्त्वोपलक्षितं स्वरूपं इति याति प्राप्नो
ति वीतशोकश्च भवतीति श्रुतेर्वास्तवार्थः ॥

इहात्मशब्दस्येदं सर्वं यदयमात्मेत्यादिप्रक
रणपर्यालोचनयाद्वितीयात्मपरत्वात्
न हि वस्तुनस्तत्साधनेनान्तरणाभावेवनिय

मविधिरिति फलयर्मः येन वेदांतश्रवण
नियमाध्यवत्वायानियमादृष्टजन्यस्वप्रति
वंधककल्मषनिहतिद्वारासन्नानिश्चयरू
पफलसाक्षात्कारस्य वेदांतश्रवणैकसाध्य
त्वस्याभ्युपगंतव्यत्वेन नत्र वस्तुतः साधनां
तराभावान्नियमविधिर्युज्यते इति आक्षेपो
न किंतु यत्र साधनांतरं तया संभावनया पक्षे
प्राप्त्या विधिस्तत्र साधनस्य पाक्षिकप्राप्ति
निवारयितुं न शक्यते नत्र नियमविधिः ॥

ननु श्रोतव्यवाक्ये आत्मविचारमात्रं प्रतीयते न त्वद्वैता
त्मविचारः ततश्च कथमनेन विधिनाभिन्नात्मविचा
रव्याहतिलाभ इत्यत आह इहेति अत्रादिपदेन आ
त्मनि दृष्टे सर्वं विदितं भवतीति प्रतिज्ञावाक्यं गृह्य
ते आत्मनस्सर्वाधिष्ठानतया सर्वात्मकत्वे हि सति
आत्मनि विदिते तद्व्यतिरिक्तं सर्वं तत्त्वतो विदितं भव
ति सर्वमात्मैवेति सामानाधिकरण्यं च सिध्यति ना
न्यथा तथा च श्रोतव्यवाक्यस्थमात्मपदमद्वितीयात्म
परमेवेति तद्विचारविधिनाभिन्नात्मविचारव्याहति
र्लभ्यत इति भावः ननु तंडुलनिष्पत्तावबहननस्ये
व नखविदलनादेरपि वस्तुतस्साधनत्वात्व्रीहीति
फलको नियमविधिर्युक्तः इहत्वद्वितीयब्रह्मसा

त्कारेऽभिन्नात्मविचारस्य न वस्तुतस्साधनत्वमस्ती
त्यतस्तत्रिहतिफलको नियमविधिर्न युज्यते नचमा
भूद्भिन्नात्मविचारस्य व्यावर्त्यत्वेनैतावता नियमविध्य
नुपपत्तिः प्रकृते त्वस्ति गुरूपनिरपेक्षविचारभाषाप्रवं
येतिहासपुराणादीनामुदाहरिष्यमाणानां सत्तानिश्च
यरूपब्रह्मसाक्षात्कारहेतुत्वसत्वेन व्यावर्त्यसंभवादि
ति वाच्यं तेषामप्यनंतरमेव वक्ष्यमाणरीत्याऽविद्या
निवर्तकसत्तानिश्चयरूपसाक्षात्कारप्रतिबंधककल्म
षनिहतिद्वारा गुर्वधीनवेदांतविचारवत्साक्षात्कार
हेतुत्वेन वस्तुतस्साधनत्वाभावात्तथा च न नियमविधि
स्संभवतीत्याशंक्याह नहीति कुलधर्म इति कुलक्रमा
गतधर्मस्य यथाऽवश्यकता तथा वस्तुतस्तत्साधनतां
तरप्राप्तेरावश्यकत्वेन हीत्यर्थः येनेति आवश्यकत्वे
नेत्यर्थः नियमार्थवत्तायेति विधित्सितगुर्वधीनवेदां
तश्रवणेनैव गुरूपनिरपेक्षविचारादिनापि सत्तानिश्च
यरूपसाक्षात्कारस्वरूपोत्पत्तिसंभवे सति गुर्वधीनवे
दांतश्रवणानियमस्यादृष्टप्रयोजनाभावान्नियमादृ
ष्टमुपेयं तस्य कल्मषनिहतिद्वारा विद्यासाधनत्वं च
कल्पनीयमेवेत्यर्थः अदृष्टजन्यत्वे कल्मषनिहतेर्वि
शेषणं स्वपदे साक्षात्कारपदं येनाशंकोनेति संबंधः

तावतैवाप्राप्तांशपरिपूरणस्य तत्फलस्य
सिद्धेः अथवा गुरुमुखाधीनाध्ययनादिव

१
सि॰ले
टी॰
१५
१६

निर्गुणस्य स्वरूपयत्नमात्रसाध्यत्वादपि वेदा-
न्तविचारान्न संभवति सत्तानिश्चयरूप-
फलापरोक्षज्ञाने किन्तु गुरुमुखाधीन-
वेदान्तवाक्यश्रवणनियमादृष्टमविद्या-
निवृत्तिं प्रतिकल्प्य तन्निरासेनोपयुज्य-
त इति तदभावेन प्राप्ति ब्रह्मविद्याम-
निवर्तयत् परोक्षकल्पमवतिष्ठेत न
वस्तुनोऽद्वयेऽज्ञाननिवृत्त्यनुपपत्तेः प्र-
तिबन्धकाभावस्य सर्वत्रापेक्षितत्वेन स-
त्यपि प्रत्यक्षविशेषदर्शने उपाधिना प्र-
तिबन्धात् प्रतिबिम्बभ्रमानिवृत्तिव-
दनिवृत्त्युपपत्तेः ॥

यत्र विधिस्तत्र साधनस्याप्राप्तिः पाक्षिकी निवारयि-
तेन प्राक्तने तत्र नियमविधिरित्यत्र हेतुमाह ना-
वत्तैवेति अप्राप्तांशप्रालाभमात्रेणैवेत्यर्थः विधित्सि-
तसाधनस्य पाक्षिकाप्राप्तौ हेतुमाह साधनान्त-
रनयेति सत्तानिश्चयरूपब्रह्मसाक्षात्कारस्य दृष्ट-
फलतयान्तस्वरूपे वेदान्तविचारवज्ञाघाप्रवं यथा-
देरप्यन्वयव्यतिरेकाभ्यामेव साधनत्वबुद्धेः संभा-
वनेन एवंकृतरीत्यावस्तुन साधनत्वाभावात्संभाव-
नयेत्युक्तं व्यावर्त्यान्तरमाह श्रुत्यैवेति मात्रपदेन

गुरुर्थ्यं वह्निद्यनेन संस्कृतब्रह्मापरोक्षज्ञानेनैवाविद्या
निवृत्तिलक्षणाफलसिद्धेः किंतदधीनश्रवणविधि
नेति शङ्कते किन्त्विति श्रवणनियमविध्यर्थवत्त्वाय
नियमादृष्टस्य ब्रह्मापरोक्षज्ञानेन स्वफलसिद्ध्यर्थम
पेक्षणीयत्वकल्पनात्तेनापरोक्षज्ञानादविद्यानि
वृत्तिसिद्धिरिति परिहरति गुरुमुखेति निरासेने
ति निरासद्वारेत्यर्थः इतीत्यनेनतत्कल्पनीयत्वेने
ति शेषः तदभावेनेति कल्मषनिरासाभावेनक
ल्मषेणेत्यर्थः कल्पितमिति तुल्यमित्यर्थः न च निय
मार्थवत्त्वायेत्यादिपूर्वग्रन्थे नियमादृष्टस्य कल्म
षनिवृत्तिद्वारा ज्ञानोत्पत्तौ हेतुत्वमुक्तमत्र चोत्पन्ने
न ज्ञानेनाविद्यानिवृत्त्यै जननीयायां तत्र प्रतिबन्ध
ककल्मषनिरासद्वारा श्रवणनियमादृष्टस्यसाध
नत्वोक्तौ पूर्वापरविरोध इति वाच्यं मतभेदेन विरोधा
भावात् नन्वेवमप्युत्पन्ना ब्रह्मविद्या स्वकार्याविद्या
निवृत्तये नियमादृष्टसापेक्षा कल्मषनिवृत्तिमपेक्ष
त इत्यत्र युक्तं प्रमात्वाच्छुक्त्यादिप्रमावदिति मत्वाशं
कते न च ज्ञानोदय इति प्रतिबन्धानुपपत्तिरिति प्र
ज्ञाननिवृत्तिरेव स्यादित्यर्थः शुक्तिप्रमास्थले अन्या
पेक्षाभावेपि प्रतिबिम्बभ्रमस्थले विशेषदर्शनस्य प्र
तिबन्धकाभावापेक्षादर्शनेन ब्रह्मविद्याया अपि त
दपेक्षोपपत्तेरिति परिहरति ॥

एवं च लिखितपाठादिनापि स्वाध्यायग्रह

१
सि·ले
टी·
७
17

णध्ययनक्रमो गुरुमुखाधीनाध्ययननियमवि
धिवत्स्वप्रयत्नमात्रपूर्वकस्यापि वेदांत
विचारस्य सम्यनिश्चयरूपफलसाधनात्का
रणत्वेनपदत्वेष्टामो गुरुमुखाधीनश्रवण
नियमविधिरयमस्तु न च तर्हि ज्ञानार्थं स
गुरुमेवाभिगच्छेदिति गुरूपसदनविधिने
व गुरुरहितविचारव्यावृत्तिसिद्धेर्विफलो
नियमविधिरिति शंक्यं ॥

प्रतिबंधकाभावस्येति यद्यपि प्रतिबंधकाभावस्य सिद्धां
तेन कुत्रापि हेतुत्वं तथापि प्रवृत्तिवद्वासामग्री कार्यहे
तुरित्युपगमादस्यैवावच्छेदकत्वात्प्रतिबंधकाभावा
पेक्षेति भावः तदनिष्टस्योपपत्तेरिति गुरुरहितविचार
साध्यविषयाप्रवियानिष्टस्याभावोपपत्तेरित्यर्थः श्रव
णनियमविधिं सदृष्टान्तमुपपादयति एवं चेति गुरुर
हितविचारस्य व्यावर्त्यस्यालाभे सतीत्यर्थः लिखितेति·
अभ्युदयनिःश्रेयसकामस्य वेदार्थानुष्ठानं विना नाभ्यु
दयादिसिद्धिः तदनुष्ठानं च वेदार्थज्ञानं विना न संभव
ति तदर्थज्ञानं च स्वाध्यायपदवाच्यवेदावाप्तिं विना न
संभवति वेदावाप्तिं प्रति च गुरुमुखोच्चारणानूच्चार
णालक्षणमध्ययनं लिखितपाठादिसाधनत्वेन लो
के प्रसिद्धं तथा चाध्ययनविधिवाक्येन वेदाध्ययनं निय

ध्यतेऽध्ययनेनैवस्वतात्पर्यावाप्तिं संपादयेदितितेनच
लिखितपाठादिव्यावृत्तिर्लभ्यते यथा तथा प्रकृतेऽपी
त्यर्थः ननु ब्रह्मविज्ञानार्थं गुर्वभिगमनं श्रूयते न च त
स्य श्रुतिजन्यब्रह्मज्ञाने साक्षात्साधनत्वमस्ति अतस्ते
न ज्ञाने जननीये द्वारापेक्षायां गुर्वधीनविचार एव यो
ग्यतया द्वारत्वेन कल्प्यते न त्वदृष्टं दृष्टद्वारसंभवे अ
दृष्टकल्पनायोगात् गुर्वभिगमनस्य गुर्वधीनविचा
रद्वारा ज्ञानसाधनत्वे अभिगमनविधिना सिद्धे तेन
व गुरुरहितविचारव्यावृत्तिसिद्धेर्निष्फलः श्रोतव्य
वाक्ये श्रवणनियमविधिरिति शंकते न चेति ब्राह्म
णो निर्वेदमायात् नास्त्यकृतः कृतेनेति पूर्ववाक्ये नि
र्दिष्टो ब्राह्मणस्य इति परामृश्यते निर्वेदं वैराग्यमा
यात् प्राप्नुयादिति यावत् केन प्रकारेणेत्यत आह अ
नित्यकृतो नित्यो मोक्षः कृतेन कर्मणा नास्तीति अतो
मोक्षे ब्रह्मज्ञानसाधनज्ञानार्थं गुरुमभिगच्छे
दित्यर्थः श्रोतव्यवाक्येन गुर्वधीनविचारे नियमिते
सति तदंगतया गुर्वभिगमनं विधीयते श्रवणविध्य

भावे तूप ॥

गुरूपसदनस्य श्रवणांगतया श्रवणावि
ध्यभावे तद्विधिरेव नास्तीति तेन तस्य वैफ
ल्यापत्तेः अन्यथाऽध्ययनांगभूतोपगम
नविधिनैव लिखितपाठादिव्यावृत्तिरित्य
ध्ययननियमोऽपि विफलः स्यात् अथवाऽ

१
सि. ले
टी.
१५

18

द्वैतात्मपरभाषाप्रबंधश्रवणस्यपक्षेप्रा
प्त्यावेदान्तश्रवणनियमविधिरस्तु नचन
म्लेच्छितवा इत्यादिनिषेधादेव तत्प्राप्तिः श्रा
द्धवत्प्रतिमोघाद्वेदान्तश्रवणमशक्यमिति
पुरुषार्थनिषेधमुल्लंघ्यापिभाषाप्रबंधेना
द्वैतंजिज्ञासमानस्यतत्रापिप्रवृत्तिसंभवेन
नियमविधेरर्थवत्त्वोपपत्तेः ॥

गमनविधेरात्मलाभाभावान्नश्रवणविधिवैफल्यापा
दकतेति परिहरति गुरूपसदनस्येति अंगविधिनाप्रया
नविधिवैफल्यापादनेप्रतिप्रसंगमाह अन्यथेति वि
धिनैवेति गुरूपगमनस्यान्तरावाप्तिंप्रति अध्ययनरूप
दृष्टद्वारसंभवेनत्यागायोगादिति भावः व्यावर्त्यान्तरमा
ह अन्यथेति नियमविधिरस्त्विति अद्वैतंजिज्ञासमानेन
वेदान्ताएवविचारणीयानभाषाप्रबंधाइतिविचारवि
षयनियमविधिरस्त्वित्यर्थः ननुम्लेच्छशाहितस्यभाषा
प्रबंधरूपाध्यक्रमशाहस्योच्चारणंपुरुषेणाकर्तव्यं अन्य
थापुरुषःप्रत्यवायीभवेदिति निषेधवलादेवश्रवणा
धिकारिणोभाषाप्रबंधव्यावृत्तिसिद्धेः किंविधिनेतिश
कते नचनेति यदिभाषानिषेधस्यज्ञानांगत्वंस्यात्तदा
तन्निषेधमुल्लंघ्यतत्रप्रवृत्तौज्ञानानुत्पत्तिभयेनतत्र
नप्रवर्ततेनत्वेतदस्तिपुरुषार्थत्वात्तन्निषेधस्यतथा

चनन्निषेधपमुल्लंघ्यापि कदाचिद्विघ्नादिश्रवणोप्रवृत्ति
संभवतीति हृदि इति शास्त्रस्तुष्यतीति ॥ उल्लंघनेहेतुमाह
अशक्यमिति अशक्यत्वे हेतुर्बुध्यतिमांद्यं ननु यस्यापि
कारिणो बुध्यतिमांद्यात् वेदांतश्रवणमशक्यं तेन प्रति वे
दांतविचारनियमविधिः कथमशक्यार्थे विध्यनुपप
त्तेरिति चेन्न मंदस्य भाष्यादिविचारासंभवेऽपि वेदांतप्र
करणविचारस्य मंदाधिकारिणोऽपि संभवात् तदुक्तं
पंचदश्यां मंदप्रज्ञं तु जिज्ञासुमात्मानंदेन बोधयेत्
बोधयामास मैत्रेयीं याज्ञवल्क्यो निजां प्रियामिति आत्मा
नंदनामकप्रकरणेनेत्यर्थः ॥

अभ्युपगम्यते हि कत्रैपि करणे युक्त्यादिं तं प्र
रुषार्थं ऽनृतवदननिषेधे सत्यपि दर्शपूर्ण
मासमध्ये क्रतुसिद्धिहेतोरंगीकृतेन निषेधो
ल्लंघनस्यापि कलंकेनतु सिद्धिं कामयमान
स्यानृतवदने प्रवृत्तिः स्यादिति पुनः क्रत्वर्थ
तयापूर्णमासप्रकरणे नानृतं वदेदिति नि
षेधश्रुतिः क्रत्वर्थतया निषेधस्यार्थवत्त्वे यद्वा
यथा मंत्रैरेव मंत्रार्थस्मृतिः साध्येति नियम
स्तन्मूलकल्पसूत्रात्मीयग्रहणकवाक्यादी
नामपि पदेशाःसत्त्या वेदांतमूलेतिहास
पुराणोपरुधेयप्रबंधानामपि पदेशामि

संभवान्नियमोयमस्तु ॥

पुरुषार्थनिषेधस्थलेष्वपिमहाफलत्वसिध्यर्थंनिषिद्धे
प्रवृत्तिस्तन्निषेधेनविधेरर्थवत्ताचमीमांसकैरपिस्वी
कृतेत्याह अभ्युपगम्यतेहीति अंगीकृतेनिषेधोल्लं
घनेयेनसतथोक्तः कुतश्चिदित्यनेनसूचितंहेतुमा
ह अविकलामिति अर्थवत्त्वमिति श्रुत्यादितमितिपू
र्वेणान्वयः आवश्यंतरमाह यद्वेति मंत्रैरेवेति अग्नि
मूर्द्धेत्यादयोमंत्राः स्मृत्यादिभिः कृतोविनियुक्ताः किमु
चारणमात्रेणादृष्टंकुर्वंतः कृत्वाउपकारंकुर्वंतिउत
दृष्टेनैवार्थस्मरणेनेतिसंदेहेकल्पसूत्रादिनापिअ
नुष्ठेयार्थस्मृतिसंभवाददृष्टार्थामंत्राइतिप्राप्तेराद्धां
तः मंत्राणामर्थप्रकाशनद्वाराकृतूपकारकत्वेदृष्टद्वा
रसंभवेदृष्टकल्पनानुपपत्तेस्तथाचफलवदनुष्ठा
नापेक्षितक्रियातत्साधनस्मरणद्वारामंत्राणांकर्मा
गत्वं नचक्रियातत्साधनस्मरणस्यमंत्रैरिवकल्पसू
त्रादिभिरपिसंभवात्तत्स्यद्वारत्वमितिवाच्यं मंत्रैरेव
मंत्रार्थः स्मर्तव्यइतिनियमविधिसंभवात् नियमस्तु
दृष्टार्थोभविष्यति तदुक्तं यत्रदृष्टंनलभ्यतेऽतः स्या
त्तत्रादृष्टकल्पनेति तथाचयथामंत्रनियमविधिना
मंत्रमूलककल्पसूत्रादिव्यावृत्तिः क्रियतेतथाअधी
तसांगस्वाध्यायेनब्रह्मजिज्ञासुनावेदांतएवविचा
र्याइतिवेदांतनियमेकृतेतन्मूलेतिहासादीनांव्या
वृत्तिर्लभ्यतइतिदृष्टांतदार्ष्टांतिकग्रंथयोरर्थः या
ज्ञिकैःप्रणीतमनुष्ठानसमवेतपदार्थसंग्राहकवा

कंग्रहणाकवाक्यं इतिहासो महाभारतं पौरुषेयप्रवं
यः प्रबोधचंद्रोदयादिः उदाहरणानि वा ॥

सर्वथानियमविधिरेवायं सहकार्यन्तरावि
धिरित्यधिकरणभाष्ये अपूर्वविधित्वोक्तिस्तु
नियमविधित्वेपि पाक्षिकाप्राप्तिसद्भावात् तद
भिप्रायेति तत्रैव पक्षेणेति पाक्षिकाप्राप्तिक
थनपरसूत्रपदयोजनेन स्पष्टीकृतमिति
विवरणानुसारिणः कृतश्रवणस्य प्रथमेश
ह्लात् निर्विचिकित्सपरोक्षज्ञानमेवोत्पद्यते
शाब्दस्य परोक्षज्ञानजननस्वाभाव्येन तस्य सा
मर्थ्यानतिलंघनात् ॥

वस्तीत्युपलक्षणमन्येषामपि व्यावर्त्यानां संभवात् त
थाहि तत्कारणं सांख्ययोगाभिपन्नमिति श्रुतौ ब्रह्मप्र
तिपत्तिद्वारा तत्प्राप्तिं प्रति उपायद्वयं निर्दिष्टं श्रवणम
ननध्यानात्मकं सांख्यशब्दार्थः प्रकृतः तृतीयपरिच्छेदेव
क्ष्यमाणो योगपदोदितः उपासनामार्गस्तु परः तत्र कृ
तेकारणं जगत्कारणत्वेनोपलक्षितं ब्रह्म सांख्ययोग
भ्यां ज्ञानद्वाराभिपन्नं प्राप्तं भिन्नत्वेन प्रत्यक्त्वेन प्राप्तमि
तिश्रुत्यर्थः तथा सगुणब्रह्मोपासनमुपासकस्य ब्रह्म

१
सि॰ ले॰
टी॰
२॰

20

लोकं गतस्य तत्त्वसाक्षात्कारद्वारा ब्रह्मप्राप्तिहेतुत्वमिति ब्र
ह्ममीमांसायां प्रसिद्धं तथा तपोविशेषादिकं साक्षात्तत्त्व
ज्ञानसाधनत्वेन पुराणादिप्रसिद्धमुदाहरंतं वंतथा च
गुरुवेदांतेषु श्रद्धावतः कुशलस्य श्रवणाधिकारिणस्त
त्त्वज्ञानार्थं मुमुक्षुयोगमार्गे संसृणो परमननं तपोविशे
षादिष्वपि वेदांतश्रवणाश्य कदाचित्प्रवृत्तिः स्यादिति
तन्निवृत्तिफलको नियमविधिः संभवति नियमविधि
पक्षमुपसंहरति सर्वथेति ननु नियमविधित्वपक्षे स
हकार्यंतरविधिरित्यधिकरणभाष्यविरोधः स्यात् तत्रा
ह सहकार्यंतरेति अपूर्वविधित्वस्य निराकृतत्वादि
तिभावः तत्रैवेति तदधिकरणभाष्य एवेत्यर्थः श्रोत
व्यवाक्येन निर्विचिकित्सपरोक्षशाब्दज्ञानोद्देशेन श्र
वणं विधीयते न तु शाब्दसाक्षात्कारोद्देशेन शाब्दस्य स्व
तः परोक्षज्ञानजनकत्वाभावात् विचारसहकृतस्या
पि शाब्दस्य क्वापि साक्षात्कारहेतुत्वादर्शनाच्च परोक्षज्ञा
नफलकोऽयं नापूर्वविधिः विधिं विनापि शाब्दज्ञा
नहेतुत्वस्य विचारे विचार्यनिर्णयहेतुत्वस्य च प्राप्तौ त
दुभयबलेन विचारविशिष्टवेदांतरूपश्रवणस्यानि
र्विचिकित्सशाब्दज्ञानहेतुत्वप्राप्तेस्साधितत्वात् किंतु पू
र्वोक्तात्पक्षप्राप्त्यादाय नियमविधिरेवेति मतमा
ह कृतश्रवणस्य प्रथममिति ॥

पश्चात्कृतमनननिदिध्यासनस्य सहका
रिविशेषसंपन्नानतत्त्वापरोक्षज्ञानेजाय

ने तत्त्वं प्रागगोचरज्ञानासमर्थस्यापीन्द्रियस्य
तत्सामर्थ्यसंस्कारसाहित्यात्प्रत्यभिज्ञानज
नकत्ववत्स्वतोऽपरोक्षज्ञानजननासमर्थ
स्यापि शब्दस्य विचारपरिभावितकामिनी
साक्षात्कारस्थले तत्समर्थत्वेन तत्प्रभावना
प्रचयसाहित्यादपरोक्षज्ञानजनकत्वयुक्ते
नतस्य शब्दस्य स्वतः स्वविषयेऽपरोक्षज्ञानज
नकत्वस्य भावनाप्रचयसहकृतज्ञानकरणा
त्वावच्छेदेन विधुरोतः करणवदपरोक्षज्ञा
नजनकत्वस्य चप्रामन्यात्पूर्ववन्नियमावि
पिरितिनदेकदेशिनः ॥

ननु मनननिदिध्यासने किं निर्विचिकित्सशाब्दपरोक्ष
ज्ञानोद्देशेनैव विधीयेते किंवा शाब्दापरोक्षंप्राप्तेनाद्यः
मननाद्यनुष्ठानात्प्राक्छ्रवणमात्रादेव तत्सिद्धेर्न द्वि
तीयः शब्दस्यापरोक्षज्ञानजननएव सामर्थ्यस्य त्वदभि
मतत्वादित्याशंक्याद्वितीयपक्षपरिग्रहेण परिहरति
पश्यादिति शाब्दनिर्विचिकित्सपरोक्षज्ञानानन्तरमित्य
र्थः कृते मनननिदिध्यासने येन सः तथोक्तः तत एवे
ति शाब्दादेवेत्यर्थः सहकारिवैचित्र्यात्कार्यवैचित्र्यदर्श
नादिति भावः तदेवोदाहरणेन दर्शयति ततोऽपीति
तत्सामर्थ्येति तत्प्रागगोचरज्ञानजननसामर्थ्यमित्यर्थः

१
सि॰ ले॰
टी॰
२१

21

शाब्दस्येति शाब्दस्यापरोक्षज्ञानजनकत्वं युक्तमित्युत्तर
ग्रंथसंबंधः ननु मनसः संस्कारस्येंद्रियसहकारित्वेन
क्लृप्ता श्रवणविधिभावनाप्रचयस्य ज्ञानकरणसहकारित्वे
न साक्षात्कारजनने सामर्थ्यं न क्वापि क्लृप्तमित्याशंक्या
ह विधुरेति तत्सामर्थ्यस्यैव साक्षात्कारजननेन क्लृप्तार्थः
नन्वेवमपि शाब्दसहकारित्वेन मननध्यानात्मकभाव
नाप्रचयस्य मानांतरेण शाब्दसाक्षात्कारं प्रति हेतुत्वा
प्राप्ते मननादिविधेरपूर्वविधित्वप्रसंग इति नेत्याह
ततश्चेति परोक्षज्ञानजनकत्वस्यापरोक्षज्ञानजनक
त्वस्य च प्राप्तत्वादिति संबंधः परोक्षज्ञानहेतुत्वस्य प्रा
प्त्यभिधानं श्रवणविधेर्नियमविधित्वार्थमिति द्रष्टव्य
विधुरेति भावनासहकृतस्य ॥

वेदांतश्रवणेन न ब्रह्मसाक्षात्कारः किं तु म
नसैव मनसैवानुद्रष्टव्यमिति श्रुतेः शा
स्त्राचार्योपदेशशमादिसंस्कृतं मन आत्म
दर्शने करणमिति गीताभाष्यवचनाच्च श्र
वणं तन्निर्विचिकित्सपरोक्षज्ञानार्थमिति
तादर्थ्येनैव नियमविधिरिति केचित् ॥

विदुरांतःकरणस्य कामिनीसाक्षात्कारहेतुत्वदर्शनस्य
लेव हि स्वतंत्रमप्यंतःकरणं बाह्यवस्तुभावनासह
कृतं सत्साक्षात्कारहेतुरिति विशिष्टकार्यकारणभा

वेदगृहीतत्वेन लाघवात् बाधकाभावाच्च भावनाप्रच
यसहकृतं ज्ञानकारणत्वावच्छिन्नमपरोक्षज्ञानेप्र
तिहेतुरिति कार्यकारणभावोऽभ्युपेत इति भावः श्र
वणाच्छब्दस्यापरोक्षज्ञानजननस्वाभाव्यमेवासिद्धं ज्ञान
मनपेक्षत्वादेः करविशेषप्रयुक्तत्वस्यानिराकरि
ष्यमाणत्वादतः शाब्दापरोक्षं प्रतिमननादेरिव श्र
वणस्यापि विधिर्नानुपपन्न इत्यस्वरसं सूचयति न
देकदेशिन इति विवरणैकदेशिन इत्यर्थः मतांतर
माह वेदान्तश्रवणेन न ब्रह्मसाक्षात्कार इति शाब्दस्याप
रोक्षज्ञानजननस्वाभाव्येनाक्रमसामर्थ्यानतिलंघना
दिति हेतुरत्रापि मन्तव्यः किं तर्हि ब्रह्मसाक्षात्का
रे करणमिति पृच्छति किं त्विति मननमेव करणमिति म
तान्तरमाह मनसैवेति क्वचित्किंचिन्मननंतरेष
ष्यकृमनसैवेति पाठोऽस्ति तदा नानुपपत्तिः तत्रैवमा
ष्यसंमतिमाह शास्त्रेति शास्त्रं तत्त्वमस्यादिवाक्यमाचा
र्योपदेशश्चाचार्यकर्तृकवाक्यार्थविवरणरूप आदि
पदेन मतिनिदिध्यासनादिसंग्रहार्थं तथा चात्र ब्रह्मसाक्षात्का
रस्य मानसत्वप्रतिपादनेन तत्कारणमनस्सहकारित
येव मनननिदिध्यासनयोर्विधिर्न तु पूर्वमतस्य वा शा
ब्दसाक्षात्कारकारणशब्दसहकारितयेति पूर्वमताद
स्य मतस्य विशेषः सूचितो भवति श्रवणे तु पूर्वमता
द्विशेषमाह श्रवणं त्विति नादर्थ्येनैवेति निर्विचि
कित्सस्य शाब्दापरोक्षज्ञानार्थत्वेनैवेत्यर्थः ॥

१
सि. ले
टी.
२२

22

अपरोक्षज्ञानार्थत्वेनैव श्रवणे नियमविधिः
दृष्टव्युत्पत्तिफलकीर्तनात् तादर्थ्यं च तस्य
करणभूतमनःसहकारित्वेनैव साक्षा
त् शब्दादपरोक्षज्ञानानङ्गीकारात् न च
तस्यानेन रूपेण तादर्थ्येन प्राप्तमित्यपूर्व
विधित्वप्रसङ्गः श्रवणेषु शब्दादिषु समा
रोपितपरस्परादिविवेकनिवृत्त्यर्थं गायवे
शास्त्रस्य श्रवणसहकृतश्रोत्रेण परस्परा
संकीर्णतयानवधार्याणां परोक्षदर्शनेन
प्रकाशमानेवस्त्वारोपितानाविवेकनिवृत्त्य
र्थं शास्त्रसद्भावेन श्रवणं तत्साक्षात्कारजन
कैन्द्रियसहकारिभावेनोपयुज्यत इत्यस्य
क्रमत्वादित्येके ॥

मतान्तरमाह अपरोक्षज्ञानेति ननु तर्करूपविचारात्म
कस्य श्रवणस्य स्वतः साक्षात्कारफलत्वायोगात्तदनुग्रा
हकप्रमाणवक्त्वं न च किमित्यपेक्षायामाह तादर्थ्यं चे
ति साक्षात्कारार्थत्वं चेत्यर्थः तस्येति वेदान्तश्रवणस्ये
त्यर्थः करणभूतेति ब्रह्मसाक्षात्कारकरणभूतेत्यर्थः न
तब्रह्मसाक्षात्कारकरणशब्दसहकारित्वेनेत्यर्थः न
र्थः नसाक्षादिति वेदान्तश्रवणस्य साक्षात्कारा
साक्षात्कारजनकत्वं नास्ति तस्य तर्करूपतया स्वतः प्रमा

णत्वाभावादितिभावः मनःसहकारित्वेनैवेत्यत्रका
रणेहेतुमाह श्रुत्यादिति नस्येति वेदान्तश्रवणस्येत्य
र्थः तेनरूपेणेति साक्षात्कारकरणमनस्सहकारित्वे
नरूपेणेत्यर्थः साक्षात्काकरणमनस्सहकारित्वेन
श्रुत्यभावेपिनत्करणेन्द्रियसहकारित्वेनश्रुतिरस्ती
त्याह श्रावणेष्विति श्रोत्रजन्यप्रत्यक्षविषयेष्वित्यर्थः
षड्जादिष्विति षड्जादयोध्वनिविशेषास्तेषुगांधर्वशास्त्र
श्रवणरहितस्यपरस्परमविवेकस्समारोपितोवर्तते
परस्परमविवेकोनामपरस्परंतादात्म्यरूपः परस्पर
यमेवतान्द्रूपश्चेतिवोध्यंगांधर्वशास्त्रविचारवतस्तु न
हिचारमहत्तु नश्रोत्रेन्द्रियेणैवषड्जादयः परस्परंवि
विक्तनयानुभूयंतेएवंमनसांतरिन्द्रियेणानुभूय
मानेषुचिदात्मप्राणशरीरादिषुपरस्परंतादात्म्या
दिरूपाविवेकः प्राणिनामनुभव ॥

वेदान्तवाक्यानामद्वितीयेब्रह्मणितात्पर्य
निर्णयानुकूलन्यायविचारात्मकंचेतोह
तिविशेषरूपस्यश्रवणस्यनब्रह्मणिप
रोक्षमपरोक्षंवाज्ञानंफलं नस्यशब्दादि
प्रमाणफलत्वात् नचोक्तरूपविचारणव
यारितात्पर्यविशिष्टशब्दज्ञानमेवश्र
वणमस्तु नस्यचज्ञानंफलंयुज्यतेइति

स्त

१
सि॰ले
टी॰
२३

23

वाक्यं ज्ञाने विध्यनुपपत्तेः श्रवणविधेर्वि
चारकर्तव्यताविधायकजिज्ञासासूत्रमू
लत्वोपगमाद्वोहापोहात्मकमानसक्रिया
रूपविचारस्यैव श्रवणत्वोचित्यात् ॥

सिद्धोऽपि यद्यारोपनिवर्तकं शास्त्रमस्ति तदा तत्स
हकृतमेतदिंद्रियमेव बुध्यादिविविक्तमात्मानं ब्रह्म
स्वरूपतया वेदांतैः प्रतीयमानं साक्षात्कारयेदिति वि
चारवान्पूर्वपक्षः घट्टादिस्वरसाक्षात्कारस्थले कार्यका
रणभावं कल्पयतीत्याह प्रकाशमान इति तच्छ्रवणं
शास्त्रश्रवणं तत्साक्षात्कारेति प्रकाशमानवस्तुसाक्षा
त्कारेत्यर्थः उपयुज्यते विविक्ततया वस्तुसाक्षात्कारहे
तुर्भवतीत्यर्थः इत्यस्येति इति उक्तप्रकारेणास्य साक्षा
त्कारकरणभूतेंद्रियसहकारित्वस्य वेदांतश्रवणे
विधिविनैव प्राप्तत्वान्नापूर्वविधित्वप्रसंग इत्यर्थः
उक्तेषु पक्षेषु शास्त्रायपरोक्षोद्देशेन वा शास्त्रपरोक्षो
द्देशेन वा श्रवणविधिरिति स्थिते इदानीं प्रतिवंध
निरासोद्देशेनैव नहि विधिरिति मतांतरमाह वेदांतवा
क्यानामिति प्रमेयासंभावनानिवृत्त्यनुकूलन्यायवि
चारात्मकमननव्यावृत्तये तात्पर्यनिर्णयानुकूलेत्यु
क्तं तन्निर्णयानुकूलन्यायाश्चोपक्रमादय इति बोध्यं
चित्तवृत्ति विशेषपदेन यत्नसाध्यक्रियारूपावृत्ति
र्विवक्षिता न तु तदसाध्यज्ञानरूपावृत्तिर्विवक्षिता

ज्ञानस्यविषययोग्यतायावक्ष्यमाणत्वात् ब्रह्मणीतिवि
षयसप्तमी तस्येतिज्ञानस्येत्यर्थः श्रादिपदं प्रत्यक्षादि
संग्रहार्थं ज्ञानोद्देशेन श्रवणं विधीयत इति मताभिमतं
श्रवणशास्त्रार्थमनूद्य निराकरोति नचोक्तरूपेति ब्रह्म
जिज्ञासासूत्रस्य साधनचतुष्टयसंपन्नेन ब्रह्मज्ञानाय
वेदांतविचारः कर्तव्य इत्यर्थः सोत्र जिज्ञासापदस्य वि
चारलक्षकत्वात् तस्य च सूत्रस्य श्रोतव्यवाक्यं मूलं तत
श्च श्रोतव्यवाक्ये यदि श्रवणं ज्ञानरूपं तदा श्रोतव्य इत्य
स्य श्रवणरूपज्ञानकर्तव्यतार्थः स्यात् तथा च जिज्ञासा
सूत्रश्रोतव्यवाक्ययोर्मूलमूलिभावो न स्यादेकार्थत्वा
भावादित्याह श्रवणविधेरिति ऊहः न्यायाभासेभ्यो नि
कृष्टन्यायानामुपादानंन्यायाभासनिराकरणमपोहः

नचविचारस्यैवतात्पर्यनिर्णयद्वारातदज्ञा
नात्पर्यभ्रमादिप्रतिबंधापरापरूपप्रतिबंधाप
विगमद्वारावाब्रह्मज्ञानेफलमस्त्वितिवाच्य
तात्पर्यज्ञानस्यशाब्दज्ञानेकारणत्वानुपग
मात् कार्येक्वचिदपिप्रतिबंधकाभावस्यका
रणत्वानुपगमाच्चतयोर्द्वारत्वानुपपत्तेः ब्र
ह्मज्ञानस्यविचाररूपातिरिक्तकारणजन्य
त्वेनप्रामाण्यस्यपरतस्त्वापत्तेश्च ॥

१
सि॰ ले॰
टी॰
२४

24

ननु सदेव सोम्येत्यादि तत्सत्यं स आत्मा तत्त्वमसीत्येतदंतं
वाक्यजातमद्वितीयवस्तुपरमद्वितीयवस्तुप्रतिपादको
पक्रमोपसंहारवत्त्वादित्येवमात्मकस्य विचारस्यानुमि
तिरूपं तात्पर्यनिर्द्धारणं साक्षात्फलं तत्द्वारा तात्पर्यभ्र
मादिरूपप्रतिबंधकनिवृत्तिर्विचारस्य फलं तन्निवृत्तौ च
वाक्यमप्रतिबद्धं सदद्वितीयब्रह्मबोधं जनयति एवञ्च
त्यंतरेष्वपीति वस्तुगतिः तथा च श्रवणस्य साक्षाद्ब्रह्म
ज्ञानफलकत्वाभावेपि परंपरया तत्फलकत्वं स्यादिति
प्राकृते नच विचारस्यैवेति अप्यर्थ एवकारस्तथा च य
था ज्ञानं शाब्दप्रमाणस्य फलं नतु तद्विचारस्यापि फल
मस्ति शाब्दप्रमाणफले ज्ञाने विचारस्यापि तात्पर्यनिर्णय
द्वारा तदर्थीनप्रतिबंधनिरासद्वारा वा हेतुत्वसंभवादि
त्यर्थः तज्जन्यत्वं विगमविशेषणं भ्रमादिरेवप्ररूढापरा
थः तात्पर्यज्ञानस्य द्वारत्वाभावे हेतुमाह तात्पर्यज्ञानस्ये
ति प्रतिबंधनिरासोपजनतेनान्यथासिद्धत्वादिति भा
वः तार्यज्ञानस्य शाब्दबोधं प्रति हेतुत्वाभावे विचारस्य
तात्पर्यनिर्णयसाध्यप्रतिबंधनिवृत्तिद्वारा शाब्दबोध
हेतुत्वं दूरापास्तमिति मत्वा प्रतिबंधकाभावस्याहेतुत्वे
हेतुमाह कार्यैकचिरपीति सत्यामपि सामग्र्यां प्रति
बंधवशात्कार्यं न जातमिति लोकव्यवहारविरोधात् प्र
तिबंधकाभावस्य सामग्र्यामंतर्भावो नांगीक्रियते किंतु
प्रतिबद्धसामग्री कार्यहेतुरिति स्वीकृत्य सामग्र्यामवच्छे
दकतया दंडत्वादिवदन्यथासिद्धिरेव स्वीक्रियत इति भा
वः तात्पर्यान्तु ॥

तस्मात्तात्पर्यनिर्णयद्वाराप्रवृत्त्यापरणयति
रात्मार्थत्वेनैव विचाररूपे श्रवणे नियमवि
धिः द्रष्टव्य इति तु दर्शनार्हत्वेन स्तुतिमात्रं
न श्रवणफलकीर्तनमिति संक्षेपः शारीर
कानुसारिणः ब्रह्मज्ञानार्थं वेदान्तश्रव
णे प्रवृत्तस्य चिकित्साज्ञानार्थं चरकसुश्रु
तादिग्रन्थश्रवणे प्रवृत्तस्येव मध्ये व्यापारां
तरेऽपि प्रवृत्तिः प्रसज्यत इति तन्निवृत्तिफ
लकः श्रोतव्य इति परिसंख्याविधिः ॥

मितिहेतुविचारात्मकानुमानस्य ग्राह्यप्रमितिहेतुत्वेहे
तुमाह ब्रह्मज्ञानस्येति अतिरिक्तेति शब्दप्रमाणाति
रिक्तेत्यर्थः परतस्त्वापत्तेरिति प्रामाण्याश्रयज्ञानस्या
तिरिक्तकारणजन्यत्वरूपं प्रामाण्यस्योत्पत्तौ परतस्त्वस्या
दित्यर्थः तच्चापसिद्धान्त इति भावः यदि श्रवणस्य न
ब्रह्मज्ञानं फलं तर्हि किमुद्देशेन तत्प्रवृत्तिरत आह तस्मा
दिति ब्रह्मज्ञानफलकत्वासंभवादित्यर्थः ननु तर्हि क
थं द्रष्टव्य इति श्रवणफलकीर्तनं तत्राह द्रष्टव्य इतीति
ति स्तुतिमात्रमिति आत्मन इति शेषः स्तुतिश्च तच्छ्र
वणादौ प्रवृत्त्यर्थेति भावः परिसंख्याविधिपदमाह ब्र
ह्मज्ञानार्थमिति ननु वाचस्पतिमते वक्ष्यमाणरीत्या वे
दान्तश्रवणस्य नित्यप्राप्तिं सिद्धां कृत्वा परिसंख्याविधि

१
सि॰ले
टी॰
२५

25

पन्नप्रहृतिर्वोच्या नयाचसन्तिज्ञानस्तुद्दिपुपश्रवणाद्वन्तु
तिष्ठन्तः कथं व्यापारान्तरं प्रसज्जेत यतस्तान्निहृतिफल
कः परिसंख्याविधिः संभवेदित्याशंक्य ब्रह्मज्ञानसाधन
त्वेन व्यापारान्तराप्रसक्तावपि भेदवासनावशाद्व्यापारा
न्तरं संभवतीति मन्दष्टान्तमाह विकित्सेति विकित्साश्रो
षयं तद्ज्ञानस्यैवैष्यकयं थेकसाध्येन तद्ज्ञानायचरकस्य
श्रुतादिसंज्ञकयत्थश्रवणाप्रहनस्यनादर्थ्येन व्यापारा
न्तराप्रसक्तावपिपथ्यादिविषयवासनावशादेव तन्प्र
सक्तिस्तद्वदित्यर्थः ॥

ब्रह्मसंस्थोऽमृतत्वमेतीति छांदोग्येन व्या
पारत्वस्य मुमुक्षूपायत्वावधारणात् संपूर्व
स्यतिष्ठतेः समाप्तिवाचितया ब्रह्मसंस्थाश
ब्दिताया ब्रह्मणि समाप्तेरनन्यव्यापारत्व
रूपत्वात् तमेवैकं जानथ आत्मानमन्यावा
चोविमुंचथेत्याथर्वणिके ठनप्रव्यापा
रान्तरप्रतिषेधाच्च ऋग्वमेराम्नेः काले
नयेद्वेदान्तचिन्तयेत्यादिस्मृतेश्च नवब्र
ह्मज्ञानानुपयोगिनो व्यापारान्तरस्य श्रवणे
नसहैकस्मिन्साध्ये समुच्चित्यप्राप्यभावा
न्नन्निहत्यर्थः परिसंख्याविधिर्ज्ञप्न इ
तिवाच्यं ॥

ननु सगुणादिग्रंथश्रवणे प्रवृत्तस्य व्यापारांतरसत्वेपि य
थाविविक्तात्मज्ञाने निष्प्रत्यूहमुत्पद्यते तथाप्यहं वेदांत
श्रवणमनुतिष्ठतो मध्ये मध्ये लौकिकवैदिकव्यापारस
त्वेपि ब्रह्मज्ञानोदयसंभवान्निष्फलः परिसंख्याविधिरि
त्याशंक्य श्रवणविध्यर्थवत्त्वाय निरंतरमनुष्ठितश्रवण
स्यैव ज्ञानसाधनत्वं न कादाचित्कस्यातो न नैष्फल्यमिति
परिहारमभिप्रेत्य यथोक्तार्थे श्रुतिस्मृतिवाक्यमुदा
हरति ब्रह्मसंस्थ इति न विद्यतेऽन्यो व्यापारो यस्य पुरुष
स्य स तथा तस्य भावस्तत्वं तस्येत्यर्थः ब्रह्मविषयकश्र
वणादिव्यापाराच्छमदमाद्युपबृंहितादन्यव्यापारशू
न्यत्वस्येति यावत् तथा च संन्यासाधिकरणभाष्यं शम
दमाद्युपबृंहितं ब्रह्मनिष्ठत्वं तस्य स्वधर्मस्तदतिक्रमे
व तस्य प्रत्यवाय इति अवधारणनिश्चयः ब्रह्मसंस्थ
पदेनायमर्थः कथं लभ्यत इत्यत आह संपूर्वस्येति न
च ब्रह्मणि समाप्तिर्नाम विदेहकैवल्यरूपो लयप्रवास्थि
तिवाच्यः तथा सति पुनरस्तत्वमेतीति भागवैयर्थ्या
पत्तेरतोऽमृतत्वप्राप्तिंप्रति ब्रह्मसंस्थता उपायत्वेन
विधीयत इति वक्तव्यमतो ब्रह्मणि समाप्तेरनन्यव्या
पारत्वे पर्यवसानं भाष्ये कृतं तथा चानन्यव्यापारत्वस्य
मुक्त्युपायत्वबोधकवाक्येनार्थान्मुमुक्षोर्व्यापारांतर
निवृत्तिः क्रियत इति भावः साक्षान्निवृत्तिबोधकवाक्य
मुदाहरति तमेवैकमिति यस्मिन्नाधारे द्यावापृथि
व्यादिसमस्तं जगदध्यस्तं तमेवाधारमेकरूपमात्मा
नं जानथ ॥

सहकार्यन्तरविधिरित्यादिसूत्रेयस्मात्पक्षेभे
ददर्शनप्राबल्यान्नप्राप्नोतितस्मान्नियमवि
धिरितितद्व्याख्यैवकृतंश्रवणस्यशास्त्रहृत्तात्मसा
क्षात्कृतकृत्यतांमन्वानस्याविद्यानिच नैक
मात्रात्कारोपयोगिनिदिध्यासनेप्रहतिनस्या
दितिश्रवणतत्साधनस्यपक्षप्राप्तिमात्रेणानिदि
ध्यासनेनियमविधेरभ्युपगमनतयातत्त्वा
येनासाधनस्यसमुच्चित्याप्राप्तावपितत्त्वेहु
तिफलकस्यपरिसंख्याविधेःसंभवादितिनि
यमःपरिसंख्यावाविध्यर्थोत्रभवेद्यतः श्र
नात्मादर्शनेनैवपरात्मानमुपास्स्वहइतिवा
र्तिकवचनानुसारिणःकेचिदाहुः श्रोतात्माश्रो
तव्यइतिमननादेवदात्मविषयकत्वेननि
वध्यमानंश्रवणमागमाचार्योपदेशजमा
त्मज्ञानमेवनतत्तात्पर्यविचाररूपनतत्र
कोऽपिविधिः ॥

हेमुमुक्षवःज्ञानसाधनत्वेनचानात्मप्रतिपादकशास्त्रोद्वा
रणादित्यागःकर्तव्यइत्याह श्रुतिरत्यावाचोविमुंचथेति
नियमविधिवादीशंकते नचब्रह्मज्ञानानुपयोगीनइति
प्रतिवंद्यासमाधत्ते सहकार्यन्तरेति नप्राप्नोतिमौनमि

तिशेषः उदाहृतसूत्रभाष्ययोर्नियमविधिवादिसम्मतं
तात्पर्यं परिसंख्याविधिवादी दर्शयति कृतश्रवणस्येति
मन्वानस्येत्यनेन रव्यापारांतरेष्वप्रवर्तमानस्येतिशेषः
सूत्रे भाष्ये चात्मन्यायतनपदस्य प्राप्तिमात्रेण नियमविधेर
भ्युपगतत्वयेति संबंधः वार्तिके अत्रेत्यस्य श्रोतव्यवाक्य
इत्यर्थः अत्र नियमो विध्यर्थो भवेदित्येकः संबंधः यदि नि
त्यप्राप्तत्वान्नियमविधिर्न संभवति तदा परिसंख्या वा
विध्यर्थो भवेदिति संबंधः परिसंख्याया विध्यर्थत्वे हेतु
र्यतन इत्यादिः परमात्मोपासने अन्यव्यापाररहितेनैव यमु
मुक्षुवा यतः प्रवृत्तात् इत्यर्थः श्रवणादीनां विधेयत्वपक्षं
मतभेदेन दर्शयित्वा तेषां विध्यभावपक्षमाह आत्माश्रो
तव्य इत्यादिना निबध्यमानमिति यथा आत्मविषयकत्वे
नोच्यमानम्मननं निदिध्यासनं च ज्ञानरूपं तथा श्रवण
मपि ज्ञानरूपमेवेत्यर्थः न चेति विचारस्यानुष्ठेयक्रि
यारूपस्य साक्षादात्मविषयकत्वानुपपत्तेरिति भावः ॥

ननु मननादिवदिति दृष्टान्तो ऽनुपपन्नः मन
ननिदिध्यासनयोर्ज्ञानत्वाभावात् मननं हि
युक्त्यालोचनरूपो व्यापारः ध्येयचिंतया सिद्ध
उपासनानुरोधेन निदिध्यासनं ध्यानक्रिया
न ज्ञानमतः कथं मननादिवदिति मनननि
दिध्यासनयोर्ज्ञानत्वासिद्धतया निर्दिश्यते इ
ति चेदुच्यते आत्मा ब्रह्मस्वभावः चिद्रूपत्वात्

१
सि॰ ले॰
टी॰
२७

27

बलवद्भ्यादिःकल्पितःदृष्टपत्वात् श्रुतिर
जन्मादिवदित्याद्यनुमितेरेव मननत्वोपगमा
त् तदुक्तं चतुर्थमैत्रेयीब्राह्मणवार्तिके आ
गमार्थविनिश्चित्यै मननं त्विति भण्यते वेदशा
स्त्राविरोध्यत्र तर्कोऽपि विनियुज्यते पदार्थवि
षयस्तर्कः नत्वेवानुमितिर्भवेदिति ज्ञातार्थ
दार्ढ्याय तर्करूपं मननं विधीयते सोऽपि तर्कः
श्रुत्यविरुद्धरूप एव मननत्वेन विधीयते तद्धि म
ननं तत्त्वंपदार्थविषयकमेव न तु वाक्यार्थ
विषयकं तस्य वाक्यैकमेयत्वात् तथा चाहुः
समुच्चयार्थः यथा मननात्मकतर्कस्य वेद
विरोधित्वं तथानुमितिरूपत्वं चेत्यर्थः अत
एवत्यायनेऽपि मननस्यानुमितिरूपत्वमि
ष्टे निदिध्यासनमपि वार्तिककारमते ज्ञा
नमेव तथा हि बृहदारण्यके चतुर्थाध्यायष
ष्ठाध्याययोर्मैत्रेयीब्राह्मणयोराम्नायते
आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्या
सितव्य इति मननं च चतुर्थे मैत्रेय्यात्मनो वा
अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेति ष
ष्ठे तु मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते वि

त्वात इति तन्त्रोभयग्रहणेऽपवार्तिकं अनुवादे
यथोक्तानां प्रक्रान्ते दर्शनादिषु विज्ञानेनेत्य
र्थकथं निदिध्यासनमुच्यत इति अथ आ
त्मा द्रष्टव्य इत्यादिनाऽनूक्तानामनुवादे प्रक्रा
न्ते मतिर्दर्शनादिषु मध्ये श्रुतं निदिध्यास
नं विज्ञानेनेति पदेन कथमुच्यते नूयते
दर्शनादीनां समानपदैरेवानुवाददर्शने
न निदिध्यासनस्यापि तद्वन्निदिध्यासनेने
त्यनुवादः स्यात् ननु विज्ञानपदेनेत्यर्थः
न स्यसमाधानवार्तिके ध्यानाशंकानिह
त्यर्थं विज्ञानेनेत्यभिधानेन निदिध्यासनशा
हेन ध्यानमाशंक्यते यत इति निदिध्या
सनशब्दस्य ध्यानवाचित्वात् श्रवणमनना
नन्तरमनुभवांगत्वेन ध्यानं निदिध्यासित
व्य इत्यनेन विधीयत इति यतः सर्ववादि
भिराशंक्यते अतस्तदाशंकानिहत्यर्थमनु
वादेऽवसरेऽपि तत्सर्ववाक्ये निदिध्यासन
रूपेणाने विवक्षितं न तु ध्यानं अतो नानुध्या
न विधिशंकावकाश इत्याशयवतीकृति
विज्ञानपदेन निदिध्यासनमनुवदतीति

१
सि॰ले॰
टी॰
२८

28

वार्त्तिकार्थः ध्यानस्यानुभवांगत्वे को दोषः
यतस्तद्दोषाकाङ्क्षायां निरस्यत इत्यत आह
तदनन्तरं वार्त्तिकार्द्धं विज्ञानोत्पत्तिहेतु
त्वं ध्यानादेः प्रागवादिषमिति ध्यानस्य त
द्वियोगस्य वा विज्ञानोत्पत्तिहेतुत्वं प्रतिय
हृषणं वक्तव्यं तस्मात्प्रागेव मयैवं यदा तूक्तवा
नस्मीत्यर्थः ननु श्रुतत्वपदार्थगोचर
श्रवणमननाभ्यां सकृदभ्यस्ताभ्यां तत्व
पदलक्ष्यार्थनिर्णये सति वाक्यार्थज्ञानस्य
वावसरप्राप्तत्वेन ध्यानानुविधेयत्वानवकाशा
त् ननवनाभ्यां प्रमाणप्रमेयासंभावनानि
हत्यावपि विपरीतप्रत्ययनिवृत्तेर्यात्र
वाक्यार्थबोधोत्पत्तिरिति वाच्यं श्रवणम
ननयोरेवासकृदभ्यासमहिम्ना विपरीत
प्रत्ययस्यापि निवृत्तिसंभवात् वाक्यार्थबो
धनिवर्त्यस्य विपरीतप्रत्ययस्य तत्प्रति
बंधकत्वाच्च लोके विपर्ययस्य स्वविरोधि
दर्शनोत्पत्तिप्रतिबंधकत्वादर्शनादिति
नन्वं यदि निदिध्यासनेन ध्यानं किंतर्हि
तदित्यत आह वार्त्तिके प्रपञ्चयन्बोधो

इतिनिदिध्यासनमुच्यते ध्यानस्यैवपुरुषबुद्धय
त्वान्नपेक्षत्वमप्रमाणजन्यत्वं यावद्ध्येयाका
विज्ञानमाविर्भवति भाष्यं श्रवणादिकि
यान्तावत्कर्तव्यमिह प्रयत्नतः मननमादिप
दार्थः श्रुत्वामत्वाथानं साक्षादात्मानं प्रति
पद्यते श्रुत्यश्रवणमननपरिपाकजनि
मननवेपरलक्ष्यार्थनिर्णयानन्तरमेववा
क्येनब्रह्मात्मज्ञानं साक्षादपरोक्षतनयाप्र
तिपद्यते अनुभवतीत्यर्थः वाक्यार्थज्ञान
वतः कृतकृत्यतामाह अनन्यापेक्षविज्ञा
ने श्रवणादिहपायतः ज्ञानेनापेक्षते किं
चित्प्रतीचोनुभवात्परमिति हृतिस्ता ॥
अनपेक्षमन्वयसूत्रे आत्मज्ञानविधिनि
राकरणानन्तरं भाष्ये किमर्थानि तर्हि आ
त्मा वा अरे द्रष्टव्य इत्यादीनि वचनानि वि
धिच्छायानि स्वाभाविकप्रवृत्तिविषयवि
करणार्थानीति ब्रूम इत्यादि ॥

नेज्ञाने सति तेन प्रतीचो ब्रह्मत्वस्फुरणादनन्तरं न किं
चिदपेक्ष्यत इत्यर्थः एवं वार्तिककारमते निदिध्यास
नस्य ज्ञानत्वाभ्युपगमात् नमननादिवदितिदृष्टान्ता

१
सि॰ले॰
टी॰
२९

29

सिद्धिः नच वार्त्तिककारमते निदिध्यासितव्य इत्यस्य द्र
ष्टव्य इत्यनेन पौनरुक्त्यं स्यादिति वाच्यं दर्शनोद्देशेन श्र
वणमननविधानानंतरं पुनः फलकीर्तनस्य तदुप
संहारपरत्वोपपत्तेरथवा द्रष्टव्य इति विचारप्रयोज
कापात्तदर्शनानुवादः निदिध्यासितव्य इति तद्विचार
फलसाक्षात्कारानुवाद इति पौनरुक्त्यपरिहारसंभवा
त् श्रवणादौ विध्यभावे भाष्यसम्मतिमाह अतएवेति
श्रवणमनननिदिध्यासनानां दर्शनवत् ज्ञानरूप
त्वेन क्रियारूपत्वेपि वक्ष्यमाणविधयानिस्प्रामत्वे
न च विध्ययोग्यत्वादेवेत्यर्थः किमर्थानीति अर्थानीति
स्मृतिरिति यावत् आदिपदं श्रोतव्य इत्यादेः संग्रहार्थः
विधिच्छायानीति श्रोतव्य इति प्रसिद्धविधितुल्यानीत्य
र्थः अत्र तव्यप्रत्ययैर्दर्शनश्रवणादिगतप्रशंसालक्ष
तेन तथा च यो हि मुमुक्षुरात्मदर्शनश्रवणादीन्येव मु
क्तिसाधनानीति ज्ञात्वापि संन्यासब्रह्मचर्यादिसहित
श्रवणाद्यनुष्ठानक्लेशमनुसंचिन्त्य न तत्र सर्वात्मना
हेन प्रवर्तते किंतु यथाप्राप्तमेव वर्णाश्रमानुरूपा
णि कर्माण्युपासनानि वानुतिष्ठन् तत्रापि निर्वृतिं न
लभते नैरात्यंतिकपुरुषार्थालाभानुसंधानेन तं
प्रत्यात्मदर्शनश्रवणादिप्रशंसार्थं प्रवर्तते आत्मा
वा इत्यादिवाक्यं तस्य सर्वात्मनाहेन श्रवणादावेव प्र
वृत्तिर्भवत्वित्याशयेन अतो न विधिप्रत्ययानां वैयर्थ्य
मिति भाष्यकारः परिहरति स्वाभाविकेति आदिपदे
न यो हि बहिर्मुखः प्रवर्तते पुरुषः इष्टं मे भूयादिति

ष्टं मे माभूदिति न च तत्रात्यन्तिकं पुरुषार्थं लभते न
मात्यन्तिकपुरुषार्थं वाञ्छितं ॥

स्वाभाविकात्कार्यकारणसंघातप्रवृत्तिगो
चराद्धि पुरोवीकृत्य प्रत्यगात्मस्थो न तस्या
प्रवर्तयेत्सात्मा वा श्रेय इच्छुरित्यादीनीयं
ते भाष्यं संगच्छते स्वाभाविकत्वविषयवि
शेषणं संग्रहभाष्यं विवृणोति यो हीति
प्रवर्तत इति नानाविधकर्मोपासनान्यनु
तिष्ठतीत्यर्थः इष्टं मे भूयादनिष्टं मे माभू
दित्यनेन दुःखसामान्याद्दृष्टसुखकामना
वत्त्वानेन दृष्टात्यन्तिकपुरुषार्थगोचराद्
हविवक्षितानामनपवाद्ध न च तत्रात्यन्तिकं
पुरुषार्थं लभत इति वाक्यसाधनेन तत्राहा
र्थः स्वाभाविकादिति स्वभावोऽत्र विद्यातत्का
र्यभूतादित्यर्थः संघातस्य प्रवृत्तिः कर्मोपा
सनयोरनुष्ठानेन गोचरान् यष्टव्यदेवता
मन्त्रादिरूपादित्यर्थः प्रत्यगात्मनि विषये
स्थितः चित्तप्रावण्यं यस्य स प्रत्यगात्मस्थो
नात्मस्वभावस्तत्त्वानयेत्यर्थः नैवाक्यसाध

१
सि॰ले॰
टी॰ ३॰

30

नात् विमुखीकृत्य श्रवणादिष्वेव प्रवर्तयं
तीत्यर्थः यदि च वेदान्ततात्पर्यविचाररूपं
श्रवणं तदा तस्य तात्पर्यनिर्णयद्वारा वेदान्त
तात्पर्यभ्रमसंशयरूपप्रतिबन्धकनिरास ए
व फलं ॥

एवं श्रवणादेर्ज्ञानरूपत्वान्न तत्र कोपि विधिरित्युक्तं इ
दानीं श्रवणादेः क्रियारूपत्वमुपेत्यापि न तत्र कोपि वि
धिरित्याह यदि चेति तस्य क्रियारूपत्वं च वार्तिककारैरेवो
क्तं श्रवणादिक्रिया तावत्फलेऽथेह प्रयत्नत इत्यादिप
देन मननस्य संग्रहो न ध्यानस्य वार्तिककारमते श्रवण
मननानन्तरं ध्यानानुष्ठानाभावस्योक्तत्वात् न च ध्यान
स्यानुष्ठेयत्वे ओमित्येवं ध्यायथात्मानं विद्यामेतां यो
गविधिं च कृत्स्नमित्यादिबहुवाक्यविरोध इति वाच्यं
तेषां सांख्ययोगाभिपन्नमिति श्रुतिगतयोगपदोदि
तमार्गान्तरप्रतिपादकतायास्तृतीयपरिच्छेदे ध्यानदी
पोक्तप्रकारेण वक्ष्यमाणत्वात् न च तत्कारणमिति श्रु
तिगतसांख्यपदोदितविचारमार्गोऽपि ध्यानान्तर्भावः पू
र्वमुक्त इति वाच्यं निदिध्यासनपदस्य ध्यानार्थकत्वम
ताभिप्रायेण तदन्तर्भावस्योक्तत्वात् ध्यानस्य सांख्यमा
र्गेऽन्तर्भाव एव भाष्यकाराणामपि संमतस्तथा चैते
न योगः प्रत्युक्त इत्यधिकरणभाष्ये तत्कारणं सांख्ययो
गाभिपन्नमित्यत्र वैदिकमेव ज्ञानं ध्यानं च सांख्ययो
गशब्दाभ्यामभिलप्येते इति ज्ञानपदं ज्ञानाभ्यासपरं वै

रिकं वेदोक्तं एतेन वेदविरोधादिना योगशास्त्रं निराकृ
तमिति सूत्रार्थः सांख्यमार्गे ध्यानाभावमभिप्रेत्यैवस
र्वेशात्मसु तिमिरंपि निहि ध्यानपदस्य ज्ञानार्थकत्वमु
क्तं श्रवणमननद्वयोर्जातयोर्यत्फलं तत्त्रिगुणमति
भिरूढं हृदयाच्छेदशमनाय अनुभवनविहीनायैवमे
वेति बुद्धिः क्रतमननसमाप्तौ तन्निदिध्यासनं हीति
अस्य श्लोकस्याश्रमश्रीचरणानां आख्यानमिदं निदि
ध्यासने पक्षांतरमाह श्रवणेति श्रवणमननद्वयोर्जा
तयोर्यत्फलं तद्दर्शनायाति गुणमतिभिरूढं हृदयान्तर
तिसंबंधः एतदेव विशदयति अनुभवनविहीनेति
क्रतं श्रवणं दीर्घकालादरनैरंतर्यानुष्ठानेन श्रवण
मननपरिपाके सतीत्यर्थः अनुभवनविहीना साक्षा
त्काररहिता अविद्यानिवर्तकवृत्तिसाक्षात्कारभिन्नेति
यावत् यापवमेवेति बुद्धिः अहं चिदात्मा ब्रह्मस्वभाव
एव ब्रह्म च चिदेकरसप्रत्यगात्मस्वभावमेवेति तत्त्वंप
दलक्ष्यनिर्णयात्मिका बुद्धिस्तदेव निदिध्यासनं नाम
न ध्यानमस्मिन्पक्षे श्रवणमननयोरेवानुष्ठेयत्वं ति
दिध्यासनं तु नानुष्ठेयं दीर्घकालमनुष्ठितश्रवणमन
नफलरूपा बुद्धिर्यदा भवति तदेव साक्षात्कारोत्पत्तेः ॥

न प्रतिबंधकं तद्यतिरासो ब्रह्मावगमो वा त
फलकत्वं च तस्यालोकत एव प्राप्तेसाधनात
रं वा किंचिद्विकल्प्यमस्ति त्यवानप्राप्तमिति
न नन्वविधित्रयस्याप्यवकाशः ॥

एवं प्रत्नेन निदिध्यासनमपि हेयमनुष्ठेयमिति भेद इ
ति सांख्यमार्गे ध्यानाभावमभिप्रेत्यैव यावज्ज्ञानोदयं वि
चारस्यैव कर्तव्यत्वं ध्यानदीपे विद्यारण्यगुरुभिरुक्तं
विचार्याप्यापरोक्षेण ब्रह्मात्मानं न वेत्ति चेत् आपरोक्ष्या
वसानत्वाद्भूयो भूयो विचारयेत् विचारयन्नामरणं नैवा
त्मानं लभेत चेत् जन्मान्तरे लभेतैव प्रतिबंधक्षये सती
ति एवमानन्दपंचकेपि आत्मानन्दावसाने सांख्यमार्गस्य
ध्यानरहितस्यापि ध्यानेन सर्वांशेपि तुल्यफलत्वं बहुधा
प्रपंचितमिति संक्षेपः एवकारव्यवच्छेद्यमाह नेति वा
कारेण नञनुकर्षणार्थः विचारस्य प्रतिबंधनिरासद्वारा
बलावगमोपयोगसंभवेपि न साक्षाज्ज्ञानफलकत्वं ज्ञानस्य
प्रमाणफलत्वादित्युक्तत्वादिति भावः ननूक्तप्रतिबंध
निरासद्वारा विचारस्याविद्यानिवर्तकसाक्षात्कारोपयो
गित्वप्राप्तावपि नादृष्टसाक्षात्कारप्रतिबंधकपापनि
हतिद्वारा साक्षात्कारसाधनत्वस्य मानान्तरादप्राप्तत्वा
च्छ्रोतव्य इत्यत्र श्रवणस्य पापनिहतिद्वारा विद्यासाधन
त्वमुपदिश्यते न च विद्याप्रतिबंधकपापनिहतेर्यज्ञादि
नैव सिद्धत्वाद्विधिवैयर्थ्यमिति वाच्यं प्रतिबंधकपापाना
मानंत्येन केषांचिद्यज्ञानुष्ठानेन केषांचिच्छ्रवणानुष्ठा
नेन निहतिरिति विभागकल्पनोपपत्तेः नथ्यावश्रामंगु
नरप्येवं विधित्वमेवं च सहकार्यन्तरविधिरित्यधिकरण
भाष्ये पांडित्यशब्दितश्रवणस्य पूर्ववाक्योक्तस्य संगच्छत इति
शंकां वारयति न प्रतिबंधकान्तरनिरास इति तात्पर्यम्भ्र
मसंशयरूपप्रतिबंधकापेक्षयान्यमापरूपं प्रतिब

यकं प्रतिबंधकांतरं तन्निरासेन श्रवणफलमतो न तद्वा
राज्ञानाय श्रवणविधेयमित्यर्थः अयंभावः श्रोतव्य इत्य
स्यापूर्वविधित्वमयुक्तं तस्याहृत्याधिकरणेन निरसितत्वात्
विवरणाद्युक्तरीत्या वेदांतश्रवणस्यान्वयव्यतिरेकप्रमा
णसिद्धं नास्पर्थभ्रमादिलक्षणप्रतिबंधनिवृत्तिरूपदृष्ट
फलकत्वमुपजीव्य श्रवणे नैव ज्ञानं प्रतिबंधनिवृत्तिं च
संपादयेदिति नियमविधित्वसंभवे स्वाभाविकप्रवृत्ति
विषयविमुखीकरणार्थानीति न्यूनमित्यादिभाष्यानुसा
रेण ब्रह्मप्रतिपत्तिसाधनश्रवणादिस्तुतिद्वारेण तत्प्र
वृत्तिविशेषकारणत्वमात्रेण ब्रह्मप्रकरणनिवेशसंभ
वे वा अपूर्वविधित्वायोगात् भाष्यकारीयापूर्वत्वोक्तेः
पाक्षिकाप्राप्त्यभिप्रायकत्वसंभवाच्चेति तत्फलकत्वं चे
ति भ्रमादिरूपप्रतिबंधनिरासफलकत्वं चेत्यर्थः ननु
प्राप्तत्वेपि नियमविधित्वादिसंभवात्कथं विधित्रया
भाव इत्यत आह साधनांतरं चेति ॥

विचारविध्यभावेऽपि विज्ञानार्थं तथा विधीय
मानं गुरूपसदनं दृष्टद्वारकत्वसंभवे दृष्ट
कल्पनाऽयोगाद्दृष्टमुखाधीनवेदांतविचार
द्वारैव विज्ञानार्थं पर्यवस्यतीति अत एव
स्वप्रयत्नसाध्यविचारव्याहृतिः अध्ययन
विध्यभावेऽनुपगमने विधीयमानमक्षरा
वाप्त्यर्थत्वेनाविधीयमानत्वान्न तदर्थं गुरु

मुखोच्चारणानुच्चारणमध्ययनं द्वारीकरोती
ति लिखितपाठादिव्यावृत्त्यसिद्धेः सफलाध्य
यननियमविधिः नचनार्थ्यादिभ्रमनिरासा
यवेदांतविचारार्थिनः कदाचिद्वेनशास्त्रेपिप्र
वृत्तिःस्यात् तत्रापितदभिमतयोजनयावेदां
तविचारसत्वादित्यद्वैतात्मपरवेदांतविचार
नियमविधिरर्थवानितिवाच्यं स्वयमेवनात्म
र्थेभ्रमहेतोस्तस्यतन्निरासकत्वाभावेनसाध
नांतरप्राप्त्यभावात् ॥

ननुगुर्वधीनविचारेणासगुरुरहितविचारस्यविकल्पे
नप्राप्तिरस्तीत्यतआह विचारविध्यभावेपीति अत्रएवे
त्युपगमनविधिनैवेत्यर्थः व्याहतिरित्यनेनतदल
भ्यतइतिश्रोतव्यवाक्येगुर्वधीनविचारनियमविधिर
नर्थकइतिशेषः नचोपगमनविधेर्विचारविध्यंग
तयातदभावेउपगमनविधेरात्मलाभएवनास्तीत्यु
क्तमितिवाच्यं गुरूपसदनस्यब्रह्मज्ञानंप्रतिद्वारापे
क्षायालोकसिद्धस्यैवगुर्वधीनविचारस्यद्वारत्वेनस्वी
कारोपपत्तेःश्रोतव्यविध्यपेक्षाभावेनतच्छेषत्वासि
द्धेर्विचारवदुपगमनस्यापिविध्यंगत्वोपपत्तेश्चेति
भावः पूर्वोक्तातिप्रसंगंपरिहरति अध्ययनविध्यभा
वेत्विति अध्ययनविध्यभावेनलिखितपाठादिव्यावृ
त्त्यसिद्धेस्सफलाध्ययननियमविधिरितिसंबंधः त

दर्थमिति श्रुतरणाम्यर्थमित्यर्थः श्रध्ययनांगोपग
मनस्य विद्यार्थोपगमनापेक्षया विशेषार्थकस्त्वश
ह्नः तमेवाह उपगमनमित्यादिना श्रध्ययनस्यान्तरा
वाप्तिफलकत्वं विवरणादौ साधितमिति भावः श्राव
र्त्तीनत्वं दूषयति नच तावदपीदीतिनु तुक्लनस्तन्नि
रासकत्वाभावेपि भिन्नात्मज्ञानं मुक्तिसाधनमिति
भ्रमहानानह्रमात्तत्र प्रवृत्तिः संभवतीत्युक्तमिति
नेत्याह ॥

तन्निरासकत्वभ्रमेणापि कस्यचित्प्रवृ
त्तिः स्यादित्येतावतापि नस्त्वश्रुति नियमवि
धेरभ्युपगमस्त्यापि न ईश्वरानुग्रहफला
देन श्रद्धारहितस्याध्ययनव्यवाकोपि पराभि
मतयोजनया साहितीयात्मविचारविधि
परत्वभ्रमसंभवेन भ्रमप्रवृत्तावाश्रयत्व
प्रवृत्ते विधिज्ञानेनाप्यपरिहार्यत्वात् ॥

तन्निरासकत्वभ्रमेणेति इह जन्मनि जन्मांतरे वा यज्ञा
द्यनुष्ठानजनितदृष्टविविदिषावन साधनचतुष्ट
यसंपन्नस्य श्रवणविध्यधिकारस्याविवादं यज्ञादिज
नितादृष्टं च निष्प्रपंचाद्वितीयब्रह्मसाक्षात्कारस्यां
गाध्ययनलब्धे वेदांते मुक्तिसाधनत्वनिश्चयं संपा
दयतादृशब्रह्मसाक्षात्कारे दृष्टां च विविदिषां श
नानुन्यायनहाराप्रद्वितीयात्मसाक्षात्कारसाधनम्

ताद्वितीयात्मश्रवणादावेव मुमुक्षुं प्रवर्तयति तत्त
जीवधियात्मज्ञानस्य मुक्तिसाधनत्वभ्रमापादनद्वारा
भिन्नात्मज्ञानतत्साधनविचारादौ विष्णुप्रवृत्त्यादिकम
प्युत्पादयति तदिष्टादेर्भिन्नात्मविचारद्वारा यज्ञादिफ
लभूतनिष्प्रपंचब्रह्मसाक्षात्कारहेतुत्वाभावात्तथा
च स्मृतिरीश्वरानुग्रहादेव पुंसामद्वैतवासनेति य
ज्ञादिसंपादितादीश्वरानुग्रहादेव पुंसामद्वैतब्रह्म
ज्ञानेच्छारूपा तद्वासना भवतीति तदर्थः तथा च य
थोक्तभ्रमवतोऽद्वैतब्रह्मतत्त्वसाक्षात्कारादाविष्टा
ष्टादिसूत्रस्य श्रवणविधावनधिकारात्तेनैव प्रति
नियमविधिरर्थवानित्याह ईश्वरानुग्रहेति पराभि
मतेति श्रुतावात्मशब्दस्य जीवपरत्वं न परमा
त्मपरः आत्मनस्तु कामाय सर्वं प्रियं भवतीति पूर्व
वाक्ये जीवस्य प्रकृतत्वात्तथेदं सर्वं यदयमात्मे
ति वाक्यशेषे सर्वात्मकस्य परमात्मनः प्रतिपाद
नाच्छ्रौतत्वं वाक्यस्यात्मपदमद्वितीयात्मपरमि
ति वाच्यं तत्रापि तच्छ्रुतिपादनासिद्धेर्न हि जीवप
रमात्मनोरभेदः संभवति चेतनाचेतनयोरैक्यस्य
विरुद्धत्वात् श्रुतेरभेदध्यानविधिपरत्वोपपत्तेश्च
त्यादियोजनापराभिमतनाद्रष्टव्या अन्यथेति भि
न्नात्मविचार इत्यर्थः ॥

न च व्यापारान्तरनिहत्यर्था परिसंख्येति पु
क्ते अस्मन्यासिनो व्यापारान्तरनिहतेरपा

क्यत्वात्संन्यासिनस्तन्निवृत्तेर्ब्रह्मसंस्थयास
हसंन्यासविधायकेनब्रह्मसंस्थोऽमृतत्वमे
तीतिश्रुत्यन्तरेणासिद्धत्यासंन्यासविधायक
श्रुत्यन्तरमपेक्ष्यश्रोतन्यवाक्येनतस्यव्यापारा
न्तरनिवृत्तस्युपदेशस्यव्यर्थत्वात् नचविचार
विध्यसंभवेपिविचारविषयवेदान्तनियम
विधिःसंभवतिभाषाप्रबंधादिव्यावर्त्यसत्वा
दितिशंक्यं सत्त्रिधानादेववेदान्तनियमस्य
लब्धत्वेनविधिविषयत्वायोगात् स्वाध्यायोध्ये
तव्यइत्यर्थावबोधनार्थनियमविधिबला
देवाध्ययनविधिगृहीतवेदानवेदान्यादिने
वेदार्थज्ञानेफलपर्यवसायिनकारणान्तरा
त्सादिनमित्यस्यार्थस्यलब्धत्वेनवेदार्थब्रह्म
णिमोक्षायज्ञानसंभाषाप्रबंधयाप्रबंधादी
नामप्राप्तेः ॥
परिसंख्याविधिंदूषयति नचेति श्रवणविधिनाकिं
गृहस्थादेर्व्यापारान्तरनिवृत्तिरूपदिश्यतेकिंवासंन्या
सविधिसिद्धस्यसंन्यासिनइतिविकल्पंमनसिनिधा
यक्रमेणदूषयति असंन्यासिनइति अशक्यत्वादिति
विध्यंतरविरोधापत्तिरशाक्यत्वेहेतुः ननिवृत्तेःसिद्ध
तयाउपदेशस्यव्यर्थत्वादितिसंबंधः ब्रह्मसंस्थोऽमृत

१
सि॰ले॰
टी॰
३४

34

त्वमेतीतिश्रुत्यंतरस्यब्रह्मसंस्थतापमेकसंन्यासाश्रम
विधायकत्वं परामर्शोजैमिनिरित्यधिकरणभाष्येस्फु
टमितिभावः विचारविषयत्वेनवेदांतनियमविधिरि
तिपक्षंदूषयति नचविचारेति सन्निधानादेवेति अधीत
सांगस्वाध्यायस्यवेदांतैरापातप्रतिपन्नब्रह्मात्मविजि
ज्ञासोर्जिज्ञासानिवर्तकनिर्णायकत्वेनविचारे
प्राप्तेसति विचारविषयमन्वेषमाणस्यवेदांतानांबु
द्धिस्थत्वात् वेदांताएवमयाविचारणीयाइतिबुद्धि
रुत्पद्यतेतथाचविधिंविनैववेदांतनियमस्यलब्ध
त्वेनविधिनातन्नियमनैरर्थक्यमित्यर्थः विधिंविनै
ववेदांतनियमलाभेहेत्वंतरमाह स्वाध्यायइति
अर्थावबोधेनिमीमांसकमतमाश्रित्योक्तमक्षरावाप्ति
फलकोऽध्ययनविधिरितिसिद्धांते ॥

नचसहकार्यंतरविधिरित्यधिकरणेबाल्य
पांडित्यमौनशब्दितेषुश्रवणमननिदिध्या
सनेषुविधिरभ्युपगतइतिवाच्यं विचारेवि
चार्यतात्पर्यनिर्णयहेतुत्वस्य वस्तुसिद्ध्यनु
कूलयुक्त्यनुसंधानरूपेमननेनतत्त्वयाभ्यास
रूपेनिदिध्यासनेचवस्तुवगामवैशद्यहेतुत्वस्य
लोकसिद्धत्वेनतेषुविध्यनपेक्षणात् वि
धिच्छायार्थवादस्यैवप्रशंसामात्रपरत्वाति

ज्ञापकत्वमात्रेणैतद्विधित्वव्यवहारात् प
र्वे च श्रवणविध्यभावात् कर्मकाण्डविचारव
द्ब्रह्मकाण्डविचारोऽप्यध्ययनविधिमूल इत्या
चार्यवाचस्पतिपक्षानुसारिणः विचार्यस्य
च ब्रह्मणो जगज्जन्मस्थितिलयकारणत्वं व
लक्षणमुक्तं यतो वा इमानि भूतानि जायन्ते
इत्यादिश्रुत्या तत्र जगज्जन्मस्थितिलयेष्वेकै
ककारणत्वमप्यन्यगामित्वाल्लक्षणं भवि
तुमर्हतीति चेत् ॥

पि येषां वाक्यानामध्ययनावाप्तानामर्थज्ञानद्वारा पुरु
षार्थोपयोगः संभवति तेषां वाक्यानामर्थज्ञानमध्यय
नलब्धैर्वाक्यैरेवोत्पादितं फलपर्यवसायि न तदतिरि
क्तं भाषाप्रबंधादिजनितमिति रीत्याऽध्ययनविधिफ
लावगवाप्ते पुरुषार्थपर्यवसानकल्पनात् भाषाप्रबं
धादिप्रसक्तिरित्यर्थः इतिहासपुराणमादिपदार्थः श्र
वणादीनामविधेयत्वे सूत्रभाष्यविरोधं शंकते नचेति
अभ्युपगतः इति सूत्रभाष्यकाराभ्यामिति शेषः विरोधप
रिहर्तुं प्रथमं श्रवणादीनां विधियोग्यक्रियारूपत्वेऽपि नि
त्याप्राप्तत्वान्न विधेयत्वमित्याह विचार इति नस्वस्पयेत्य
त्र नत्वदं वस्तुपरं श्रवणमस्य वैशद्यवैशद्ये प्रतिबंधराहि
त्यं सूत्रभाष्ययोर्विधित्वव्यवहारो गौणः मुख्यासंभवस्य
दर्शितत्वादिति विरोधं परिहरति विधिज्ञायार्थवादसे

१
सि॰ले
टी॰
३५

35

वेति विश्वरूपांशुयष्टव्य इत्यादेरिवेत्यर्थः तथाहि
ऽयांशुयाजमंतरा यजतीत्याम्नाय प्रतराम्नायते वि
श्वरूपांशुयष्टव्यः प्रजापतिरूपांशुयष्टव्यः अग्नीषो
मावुपांशुयष्टव्याविति अत्रांतरावाक्यमाग्नेयाग्नीषो
मीयपुरोडाशयोरंतरालकालविशिष्टयागविधा
यकं विश्वादिवाक्यत्रयं तु मंत्रवर्णप्राप्तदैवकल्पक
देवतानुवादेनांतरावाक्यविहितयागस्तावकमर्थ
वादमात्रमिति व्यवस्थापितं पूर्वतंत्रे तद्वदत्र दृष्टांत
त्वेनोदाहृतमिति द्रष्टव्यं यत्तु तत्कारणं सांख्ययो
गाभिपन्नमिति श्रुतौ योगपदोपात्तस्याध्यावर्ण्यस्य
संभवाद्विचारसमर्थाधिकारिणं प्रति तद्व्याहृतिफल
को नियमविधिः संभवतीति तन्न विचारासमर्थस्या
धिकारिणः कालांतरे स्वोक्ताविनानुपपत्तिवशेनान्यो
क्ताविनानुपपत्तिवशेन वाप्युत्पन्नसंशये सत्यव
धारणात्मकवेदांतार्थज्ञानेन संभवतीति योगपदाव
शेन तं प्रति विधिं विना विचारस्यैव नित्यतयाप्राप्तत्वा
त् यत्तु सगुणब्रह्मोपासनेऽप्यावश्यमुक्तेः तत्र श्रवणावि
ध्यधिकारिणः सर्वतो निःस्पृहस्य ब्रह्मलोकप्राप्तिद्वारा
मुक्तिसाधनसगुणोपासने पदेपि प्रवृत्तेरसंभवेन त
स्यावश्यत्वासंभवात् सगुणोपासनस्यापि श्रवणा
दिद्वारैव विद्यासाधनत्वेन नाववविदलनादेरवचानत
ल्पकस्य त्ववत्सगुणोपासनस्य श्रवणादिना सह वि
कल्पेन प्राप्त्यभावाच्च न तद्व्याहृतिफलको नियमवि
धिः संभवति न च सगुणोपासनया श्रवणादिकं वि

नैवसगुणसाक्षात्कारवन्निर्गुणसाक्षात्कारोदयसंभ
वतीति वाच्यं प्रमाणप्रमेयासंभावनादिप्रतिबंधनि
वृत्तिद्वारा श्रवणादेस्तत्त्वनिश्चयरूपब्रह्मज्ञानोपाय
त्वस्योक्तनयापूर्वोक्तप्रमाणानुरोधेन श्रवणादेस्त्रि
त्ववदनुवादलिंगेन च सगुणोपासनयाक्रमेणापर
मुक्तिप्रतिपादकशास्त्रस्यापि श्रवणादिद्वारकज्ञा
नोत्पत्त्यविरोधित्वकल्पनात् श्रवणादिकं विनास
गुणोपासनमहिम्नैव तत्त्वज्ञानोदयाभ्युपगमे देव
ताधिकरणविरोधाच्च तदधिकरणे हि देवादीनांश्रु
तीराद्यभावान्सगुणब्रह्मोपासनेष्वनिर्गुणब्रह्मवि
द्यासाधनश्रवणादिष्वनाप्तिसामर्थ्यमतो न तेष्व
धिकार इति पूर्वपक्षयितामंत्रार्थवादेतिहासपुराण
प्रमाणप्राप्तान्तेषामपि शरीरादिसद्भावादस्त्यधिकार
इति सिद्धांतितं न चेदं पूर्वपक्षप्रयोजनमुक्तं देवानां
श्रवणाद्यधिकाराभावे क्रममुक्तिफलकब्रह्मोपास
नयाप्राप्तदेवभावस्यापि श्रवणाद्यसंभवेन विद्योद
यासंभवात् पुनरावृत्त्यापत्तौ क्रममुक्तिकामस्य स
गुणोपासनेष्वप्रवृत्त्यभाव इति सिद्धांते तु देवानांश्र
वणाद्यधिकारसत्वादुक्तप्रवृत्तिसिद्धिरिति प्रयोज
नं दर्शितं इदं च प्रयोजनं देवताधिकरणावसानभा
ष्ये संग्रहेण दर्शितं तथाच भाष्यं तत्र स्थार्थित्वादि
संभवादुपपन्नो देवादीनामपि ब्रह्मविद्यायामधि
कारः क्रममुक्तिदर्शनान्यपि एवमेवोपपद्यंत इति
एवमेवेत्यस्य देवादीनां श्रवणाद्यधिकारसत्वेवेत्य

सि॰ ले॰
टी॰
३५

र्थः तेषां श्रवणाद्यधिकारे यानि श्रौतलिंगानि सर्वेषु प
न्यस्तानि तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत् त
थर्षीणां प्रकाशान्तं ह वै वर्षीणां मघवान् प्रजापतेर्ब्र
ह्मचर्यमुवासेत्येवमादीनि दृष्ट्वा उपपद्यन्ते तथैवास्यापि शा
स्त्रार्थः ननु सगुणब्रह्मोपासकानामपि सर्वेषां श्रव
णादिनैव ज्ञानोदय इति नियमो नास्ति सगुणोपासक
स्यापि हिरण्यगर्भस्य बृहदारण्यभाष्ये सकलविषयब्रा
ह्मणव्याख्यानावसरे श्रवणादीनां प्रणिपातादीनां चा
भावेपि ज्ञानजन्मप्रतिपादनादिति चेन्न हिरण्यगर्भ
स्यापि वामदेववत् जन्मान्तरीयश्रवणादिनैव ज्ञान
जन्मसंभवात् तत्रैव भाष्ये श्रवणमनननिदिध्यासना
नां साक्षाज्ज्ञेयविषयत्वादिति वाक्ये साक्षात्पदेन श्रवणा
देर्ज्ञेयब्रह्मव्यंजकस्य प्रणिपाताद्यपेक्षया आवश्यक
त्वसूचनेन जन्मान्तरीयश्रवणादिकल्पनस्य तद्भाष्य
वाक्याभिप्रेतत्वे अवगम्यमाने सति तस्यैव भाष्ये श्रव
णादिकं विना कार्यकारणश्रुत्यादिमात्रेण ज्ञानजन्म
प्रतिपादनस्याभ्युपगमवादत्वोपपत्तेर्हिरण्यगर्भ
स्य वामदेवस्येव जन्मान्तरीये ज्ञानसाधने कल्पनीये स
ति तस्य श्रवणादिकल्पनस्यैव न्याय्यत्वाच्च न वा हिर
ण्यगर्भस्य सर्वे जन्मनि सगुणोपासननिष्ठत्वेन निर्गु
णविचारः संभवतीति वाच्यं हिरण्यगर्भस्य सर्वकल्पे
जन्मभेदेन सगुणनिर्गुणोपासनयोः संभवोऽत्र ह्येक
स्मिन् जन्मनि कृतात्सगुणोपासनामात्रादेव हिरण्य
गर्भपदप्राप्तिरस्ति तथा सति सगुणोपासकानां स

वैषामेव साक्षाद्धिरण्यगर्भत्वप्रसंगात् किंतु हिरण्यग
र्भस्य ब्रह्मलोकस्वामित्वं सरस्वतीभर्तृत्वं जन्मप्रभृति
तत्त्वसाक्षात्कारसंपन्नत्वं सर्वज्ञत्वं सकलभौतिकज
गत्सृष्ट्यादिसामर्थ्यं भक्तानां त्रैलोक्यैश्वर्यप्रदानसाम
र्थ्यं कार्यविशेषे ब्रह्मविष्ण्वादिप्रवर्तकत्वं ललाट
रुद्रप्रादुर्भावहेतुत्वं महाविष्णुनाभिकमलजातत्वा
द्यैश्वर्यं च श्रुत्यादिभ्यो निश्चित्यागामिकल्पे यथोक्तहि
रण्यगर्भत्वाय तत्साधनानि सगुणोपासना
नि तपोविशेषरूपाणि च बहुषु जन्मसहस्रेषु बहुक्लाद
विश्वामित्रागस्त्यभृग्वादिवदनुष्ठितवतो महापुरु
षकस्यचिदेव नियतिप्रायेश्वरप्रसादाद्धिरण्यगर्भत्वं
संपद्यत इति हिरण्यगर्भस्यापि जन्मांतरीयश्रवणा
दिकल्पने वामदेवस्येवानुपपन्ने हिरण्यगर्भस्य पूर्व
जन्मन्यनुष्ठितश्रवणादेर्हिरण्यगर्भपदप्राप्तिकाम
नया प्रवृत्तत्वेन तदा तत्त्वसाक्षात्कारानुत्पादकत्वो
पपत्तेस्तद्धैरण्यलोकाभिवांछायाः सम्यक्स
त्यानिरूपितो विचारयेद्यत्रात्मानेन तत्त्वसाक्षात्कारोत्पद
मिति न च तत्त्वेनोत्पत्तिस्थले सर्वत्र श्रवणादिनियमो
नास्ति योगमार्गप्रवृत्तस्य श्रवणाद्यभावेपि तत्त्वसाक्षा
त्कारोदयस्वीकारादिति वाच्यं ओमित्यात्मानं युंजीत
ओमित्येवं ध्यायथ आत्मानमित्यादिध्यानविधिबलेन
तत्कारणमात्रयोगाभिपन्नं विद्यामेतां योगविधिं च
कृत्स्नमित्यादिश्रौतलिंगसहकृतेन विचारासमर्थस्य
योगमार्गेऽधिकार इति तृतीयपरिच्छेदे वक्ष्यमाणतया

१
सि॰ले॰
टी॰
३६

विचारसमर्थस्य विचारं विनाज्ञानोत्पत्त्यनभ्युपगमात्
एवं यच्छ्रवणसाधनमदृष्टद्वारा तत्त्वज्ञानसाधनत्वेन प्रा
ग्दर्शितं तत्सर्वं सगुणोपासनवददृष्टसामग्रीभूतं सांख्य
मार्गेणातदष्टाङ्गयोगमार्गेण वा तत्त्वज्ञानसाधनमिति
कल्पते तत्त्वदृष्टमात्रात्तज्ञानलाभः कल्पयितुं युक्तः
अन्यथाजीवनादृष्टमात्रादेवान्नपानादिप्रवृत्तिकल्प
नायस्यात् तत्रापीष्टसाधनताज्ञानस्मरणं जन्मान्तरीयसंस्का
रहेतुकं सर्वसंप्रतिपन्नं कल्पनीयं न स्यात् तस्माद्दृष्ट
कारणं विना कार्योत्पत्त्ययोगस्योभयत्र तुल्यत्वादत
एव पंचदश्यां तत्त्वज्ञाने प्रतिमार्गद्वयनियममुक्तः सां
ख्ययोगौ प्रकृत्य इति मार्गौ विचार्याथ जगाद परमेश्व
र इति संग्रहकर्तापि तृतीयपरिच्छेदे सांख्ययोगप्राहि
तमार्गद्वयमेव विद्याप्त्युपायत्वेन वक्ष्यति एवं श्रव
णमननादिसाधनानुष्ठानप्रवणस्याविद्यावाप्तिरिय
स्मिन्नर्थे सर्वसंप्रतिपन्ने स्थिते भारतीतीर्थैः ध्यान
दीपे विद्यावाप्तेऽपायान्तरमप्याह इति ग्रंथेन तद
यं निष्कर्षः विद्याधिकारिणो विचारसमर्थस्य प्रतिबं
धाभावे वेदान्तश्रवणमनुष्ठेयं सति तु प्रतिबंधे इति
हासपुराणभाषाप्रबंधादिश्रवणमनुष्ठेयं विद्याधि
कारिणो विचारासमर्थस्य तत्त्रैवर्णिकस्य योगशास्त्रहि
तनिर्गुणोपासनमनुष्ठेयं मार्गद्वयासंभवे च तत्संभ
वयोग्यजन्मप्राप्त्या तदर्पणानुष्ठानद्वारा ज्ञानला
भ इति तथा च श्रवणाधिकारिणः श्रवणस्य नियमप्रा
ग्भावात् तत्तत्कर्तृतया साधनान्तरस्यैकस्य चिद्विकल्प

समुच्चित्यवाप्राप्त्यभावान्नतत्रविध्यवकाशइतिसि
द्धं एवंब्रह्मसाक्षात्कारेश्रवणादेर्नित्यप्राप्तत्वा
त् किंचिद्विनैवश्रवणाद्यनुष्ठानंसिध्यतीतिप्रतिपा
दितं इदानींविचारानुष्ठापकविध्यपेक्षायामपिय
थाकर्मकाण्डश्रवणंकर्मवाक्यविचारःकर्तव्यइतिए
षकविध्यभावेपिअध्ययनविधिबलादेवसिध्यति
एवंवेदान्तश्रवणमपितद्बलादेवसिध्यतीतितच्छ्रो
तव्यवाक्योपष्टम्भकविचारविध्यपेक्षास्तीत्याशयेनो
पसंहरति एवंचेति लोकतएवश्रवणादेःप्राप्तत्वेस
तिश्रवणविध्यपेक्षाभावादित्यक्षरार्थः श्रोतव्यवाक्या
र्थविचारेणप्रथमसूत्रार्थसंगृहीतः क्रमप्राप्तंद्विती
यसूत्रार्थंसंगृह्णाति विचार्यस्यचेति चकारेणयार
णार्थस्यचश्रुत्येकत्वेनेनसंबध्यतेश्रुत्येवलक्षणानुक्तं
नत्वख्यात्यादिलक्षणवत्पुरुषोत्प्रेक्षितमित्यर्थः ये
नजातानिजीवंतियत्प्रयंत्यभिसंविशंतितद्विजिज्ञा
सस्वतद्ब्रह्मेतिवाक्यशेषस्थयदादिपदार्थः प्रकृतीयतत्
त्तियच्छब्देनब्रह्मवल्यांनिरूपितंसत्यज्ञानानंदानं
तात्मकंब्रह्मपरिगृह्यतेसर्वनाम्नः प्रकृतप्रधानप
रामर्शित्वस्वाभाव्यात् नत्वयंपञ्चेतिसामर्थ्यादेव
ब्रह्मणः सच्चिदानंदस्वरूपात्मकंस्वरूपलक्षणंलभ्य
तेपंचमीचप्रकृतित्वेहेतुत्वसामान्यवाचकीतिहे
तुत्वसामान्येचप्रकृतिकर्त्रुभयसाधारणंभूतपदं
पृथिव्यादिमहाभूतेषुप्रसिद्धंचरूढः प्रकृतेर्वावि
निर्गमनाविरहेणरूढेरत्रकेषांतभवंतीतिव्युत्प

त्वात्कार्यमात्रं भूतशब्देनोच्यते जीवंति स्थितिं लभंते प्र
यंति लीयमानानि संतियदभिसंविशंतियेन तादात्म्यंग
च्छंतीति यावत् तत्कारणंब्रह्मतद्विजिज्ञासस्वविशेषेण
सच्चिदानंदैकरसपूर्णब्रह्मस्वरूपेण ज्ञातुंसाक्षात्कर्तुमि
च्छस्वइच्छामात्रेणोक्तसाक्षात्कारालाभात् सत्प्रत्ययेन
विचारोलक्ष्यतेउक्तलक्षणमुखेनब्रह्मविचारयेत्यर्थः
अत्रयतोभूतानिजायंतेतद्ब्रह्मयेनजीवंतितद्ब्रह्मयद
भिसंविशंतितद्ब्रह्मेतिश्रुतिपाठेसतिजगज्जन्मकारण
त्वंतत्स्थितिकारणत्वंतल्लयकारणत्वंचप्रत्येकमेवश्रु
त्याब्रह्मलक्षणमुक्तंस्यात्तत्र ॥

सत्येलक्षणत्रयमेवेदंपरस्परनिरपेक्षं प्र
तयवात्ताचराचरग्रहणादित्याद्यधिकर
णेषुसर्वसंहर्तृत्वादिकंप्रत्येकंब्रह्मलिंग
तयोपन्यस्तमितिकौमुदीकारः ॥

थापाठोस्यतोजन्मादितितयकारणत्वंश्रुत्यालक्षणमु
क्तमितिप्रतिभाति तदाक्षिपति जगज्जन्मस्थितिलयेषु
ति निर्द्धारणार्थासप्तमीयतोभूतानिजायंतेइत्युपक्रम्यत
द्ब्रह्मेतिश्रुत्यालक्ष्येब्रह्मणिकारणत्वस्यसत्त्वप्रतिपाद
नात्रासंभवःतद्ब्रह्मेत्येकवचनेनलक्ष्यब्रह्मण्येकैक
त्वावगमान्नाव्याप्त्यवकाशइतिदोषद्वयाभावेसिद्धेऽक्त
त्वातिव्याप्तिरपिनास्तीत्याह अनन्यगामित्वादिति ब्र

ल्लान्यगामित्वाभावादित्यर्थः ननु प्रधानेतिव्याप्तिस्तस्य सां
ख्यैरुपादानत्वाभ्युपगमेन उपादानतया जगज्जन्महेतुत्व
स्याधारतया स्थितिहेतुत्वस्य लयाधारतया लयहेतुत्व
स्य च तत्रापि सत्त्वादिति चेन्न कर्तृत्वस्यापि लक्षणे विशे
षणत्वेन विवक्षितत्वात् जडे प्रधाने तदयोगात् न च तत्क
र्तृत्वमेव प्रत्येकं लक्षणमस्तु किं तदुपादानत्वरूपविशे
षणेनेति वाच्यम् अदृष्टद्वारा जगज्जन्मादिकर्तरि जीवेऽति
व्याप्तिवारकत्वात् परिच्छिन्नजीवस्य च तदुपादानत्वायो
गात् न च साक्षाज्जगज्जन्मकर्तृत्वं नियन्तृतया जगत्स्थिति
हेतुत्वं संजिहीर्षया जगत्संहर्तृत्वं च लक्षणमिति विवक्षा
यां जीवेऽतिव्याप्त्यभावादुपादानत्वरूपं विशेषणं व्यर्थमेवेति
वाच्यं नहि उपादानत्वमपि पृथगेव लक्षणमस्तु मायायाः
ब्रह्मोपादानतामात्रघटकत्वेन पृथगुपादानत्वालाभात्
प्रधानादिकारणान्तरस्य चाप्रामाणिकत्वेनातिव्याप्तेरभा
वादिति भावः प्रत्येकं लक्षणत्वसंभवमंगीकरोति सत्य
मिति नहि कृत्यात्रितयकारणत्वे कथं लक्षणमुक्तमित्या
शंकायां केनेरपि प्रत्येकलक्षणपवतात्पर्यमेलनस्य प्रयो
जनाभावादित्याशयेनाह लक्षणत्रयमेवेदमिति इदं ज
गत्कारणत्वं जन्मादीनां मध्ये एकैकनिरूपितं न परस्परनि
रूपितं सल्लक्षणत्रयमेव कृत्याभिमतं न तत्त्रितयनिरूपि
तकारणत्वरूपमेकं लक्षणमित्यर्थः त्रयपदमनेकप
रं न तु त्रित्वनियमपरं तेनोपाधिक्यस्य शंकावसरे दर्शि
तत्वादिति बोध्यं जगत्संहर्तृत्वादेः प्रत्येकं ब्रह्मलक्षण
त्वे सूत्रकारादिसंमतिमाह सूत्रयत्येवेति सूत्रादिपदेन सू

तर्यास्यापि करणजगद्धाविद्याधिकरणयोस्संग्रहः अयमर्थः
कठवल्यां पठ्यते यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनं मृत्यु
र्यस्योपसेचनं क इत्था वेद यत्र सः इति अत्र ब्रह्मक्षत्रयोः प्र
युक्त ओदनशब्दस्तावन्न मुख्यः किंतु गौणः लोके ओदन
शब्दमुख्यार्थस्यादनीयत्वप्रसिद्धेरदनीयत्वेन गुणेन तनयो
रोदनशब्दः प्रवर्तते तथा च यस्य ब्रह्मक्षत्रे ओदनवददनी
ये इत्युक्तौ यच्छब्दार्थस्यात्तृत्वं प्रतीयते अनेनैवाभिप्राये
णोक्तं सूत्रे अत्तेति ओदनपदवाच्यार्थस्यादनीयत्वं द्विविध
मस्ति भुजिक्रियाकर्मत्वात्मकभोज्यत्वरूपमेकं विनाश्यत्व
रूपमपरम् अपरं तु भोज्यत्वगुणः प्रसिद्धः न तु विनाश्यत्व
गुणः गौणप्रयोगे च प्रसिद्धगुण एव गृह्यते यथा अग्नि
र्माणवक इत्यत्राग्निगतशुचित्वादिगुण एवोपादीयते प्र
सिद्धत्वान्न तु तद्गतोपि विनाशकत्वादिगुणः एवं प्रकृतेपि
लोकप्रसिद्धिबलाद्भोज्यत्वगुण एवौदनशब्दात्प्रतीय
ते अस्ति च ब्रह्मक्षत्रयोरपि स्त्रीपिंडरूपयोर्भोज्यत्वं पुमा
संप्रति ब्रह्मक्षत्रयोश्च भोज्यत्वप्रतीतौ सत्यां तत्प्रति सं
बंधिनि यच्छब्दार्थे पूर्वं प्रतीतमत्तृत्वं भोक्तृत्वरूपं जीव
लिंगं पर्यवस्यति यदा त्वोदनपदस्य मृत्यूपसेचनप
दसंनिधानात् ब्रह्मक्षत्रयोर्विनाश्यत्वगुणः स्वीक्रिय
ते न तु भोज्यत्वगुणः स्त्रीपिंडरूपब्रह्मक्षत्रियकर्मक
भुजिक्रियायां मृत्योरुपसेचनत्वासंभवेन मृत्युर्यस्यो
पसेचनमित्यंशस्यानन्वयप्रसंगात् ब्रह्मक्षत्रयोर्विना
शने तु मृत्योस्सहायत्वमस्तीति न तदनन्वयप्रसक्तिः
तदा तत्प्रति संबंधिनि यच्छब्दार्थे पूर्वं प्रतीतमत्तृत्वं सं

हर्तृत्वरूपं पर्यवस्यति विनाश्यत्वगुणग्रहणाय ह्नेत्वयं
विशेषो लभ्यते लोके हि दध्यादिरूपमुपसेचनं स्वामिश्रि
तान्नादिनाशे साधनं दृष्टमिति तस्मादुपसेचनपदप्र
योगबलात्तस्य सकलस्य चराचरात्मकस्य जगतो विना
शनं प्रतीयते तदनुसारात् ब्रह्मक्षत्रियपदयोरजहल्ल
क्षणया कृत्स्नजगत्परत्वं च प्रतीयते तत्प्रतिसंबंधिन्यपि
यच्छब्दार्थे कृत्स्नजगत्संहर्तृत्वरूपं ब्रह्मलिंगं भाति एवं
स्थिते प्रथमसदनीयत्वगुणयोगात् प्रतीतोऽत्ता किं जीवः
उत परमात्मेति संशयः तत्र पूर्वपक्षः ॥

जीव एवेति लोकप्रसिध्यनुसारेणात्तृत्वस्य भो
क्तृत्वरूपताप्रतीतेर्न परमात्मा अनश्नन्निति
वचनेन तस्य भोक्तृत्वनिषेधादिति सिद्धान्त
स्त्वत्ता परमात्मा कुतः चराचरग्रहणात् स
रूपसेचनपदानुरोधेन पूर्वोक्तरीत्या अत्तृ
त्वस्य चराचरात्मकसकलजगत्संहर्तृत्वरूप
त्वप्रतीतेश्च परमात्मनोऽन्यस्य जगत्संहर्तृ
त्वं संभवति न च लोकप्रसिद्धिबलादत्तृत्वं भो
क्तृत्वरूपं भातीत्युक्तमिति वाच्यं तत्प्रसिध्यपे
क्षयावाकाशे घाधीनविनाश्यगुणप्रसिद्धेः
श्रीवन्तरत्वेन बलवत्त्वादतोऽत्ता परं एवेति नि
र्णयः समं संहर्ता परमेश्वरोऽयत्नतो विशेषमे

१
सि॰ ले॰
टी॰
धं॰
५०

दकस्य नयावर्तते । तेन निर्विशेषं परमात्मा
नमित्याद्यन्ये । को वेद न कोऽपीति तस्य तु वि
शेयत्वमुदाहृतमेतच्चतुर्थपादेन विवक्षि
तमिति बोध्यं । अन्तर्याम्यधिदैवादिषु तद्धर्म
व्यपदेशात् । यश्चेमं च लोकं परं च लोकं सर्वा
णि च भूतानि यो ऽन्तरो यमयतीत्युपक्रम्य यः
पृथिव्यां तिष्ठन्नित्यादिना काण्वश्रुत्यर्यायानु
क्रम्याधिदैवतमित्युपसंहृत्य पुनः यः सर्वे
षु भूतेषु तिष्ठन् यः सर्वेषु लोकेषु यः सर्वे
षु देवेषु यः सर्वेषु यज्ञेष्वित्यादयः केचन प
र्यायाः काण्वमाध्यन्दिनपाठभेदेनाम्नाताः
तत्राधिदैवादिषु देवभूतलोकवेदयज्ञादि
ष्वन्तर्यामी परमात्मा श्रुतः तद्धर्मव्य
पदेशात् तद्धर्मस्य परमात्मधर्मस्य विशे
षेण सर्वस्थितिकर्तृत्वरूपसर्वनियन्तृत्व
स्य यं न जानाति ज्ञो वेनीति श्रुतिसिद्धस्य वा
क्योपक्रमे यश्चेमं च लोकमित्यादिना व्यप
देशान्न जीवादिरन्तर्यामी न स्यात्कयमीस
भवादिति सूत्रार्थः । जगद्व्यापित्वात् कौशी
तकीब्राह्मणवालाकाजातशत्रुसंवादे वा

लोकि ब्राह्मणं प्रति प्रज्ञानघनो र्ववचनं स्थय
ने यो वै वा लोकपुनेषां पुरुषाणां कर्तीय
स्य वैतत्कर्म स वै वेदितव्यः पुरुषश्रुति प्रत्र
वेदितव्यत्वेन श्रुतः पुरुष जीवः परो वेति
संशये जीव इति पूर्वपक्षः पुरुषपदस्य जी
वे रूढत्वात् पुण्यापुण्ये न कर्मणाभव
ति कर्मेह वत्तरहवतद्रित्यादौ वेदे लोके च पु
ण्यकर्मापि यतः ह्लीवर्तत इत्यादौ कर्मप
दस्य धर्माद्यैव योगदर्शनेन तत्त्वरूढवाच
कत्वतः आर्तभागयाज्ञवल्क्यादिसंवादेः कर्म
संबंधिपुरुषो जीव एव न परमात्मानस्य च
मोघभावान्न चैतेषां पुरुषाणां कर्तृत्वाको
न वेदितव्यपुरुषस्य प्रकृतत्वादित्येवं ड्रादिपु
रुषकर्तृत्वमुच्यमाने जीवे कथं संभवतीति
वाच्यं भोगोपकरणभूतान् आदित्यादिपुरु
षान् प्रतिभोक्तृजीवस्यादृष्टद्वाराकर्तृत्वो
पपत्तेरनपवयस्य चैतत्कर्मेति वाक्यस्य फ
लमदृष्टद्वारा प्रकृतपुरुषकर्तृत्वोपपाद
कत्वादित्येवं प्राप्ते सिद्धान्तः कर्मशब्दस्य न
यमादौ रूढिस्थलनात्मकं कर्मेति व्यवहितस्य तु

सि॰ले॰
दी॰
ध॰

रोपेन परिस्पंदेन स्यान्नूच्छत्वात् कथं न हि ध
र्मादौ तस्वयोगानिर्वाहः विहितप्रतिषिद्धनू
पदेहादिपरिस्पंदजन्ये धर्मादौ लक्षणयाप्र
योगोपपत्तेः नवदेवताध्यानादिरूपमनोमा
त्रव्यापारजन्ये धर्मादौ परिस्पंदजन्यत्वाभावे
न लक्षणयाप्रयोगेऽसति परिस्पंदद्वयधर्मा
दावपि त्रुटिरपरिहार्येति वाच्यं न हि प्रकृते
विनिगमनाविरहेण चूर्णेरनुमेयमस्तीति किं
यतेऽत इति कर्मेति सूत्रस्थाकर्मपदं कार्यमात्र
माह एतत्परमपि प्रत्यक्षाद्युपस्थितं नवत्त्वमा
त्रमाह प्रकृतस्य तत्परामर्शायोग्यस्य कस्य
चिदभावात् तथा च एतत्कृतत्वं नगायस्य कर्म
कार्यमित्यर्थलाभे न वेदे न स्वपुरुषस्याशे
षजनकत्वमिति कर्तृत्वसिद्धमिति न च ब्रह्मलि
गेष्याटिकादिषु रुषकर्तृत्वमपि न सुखंजी
वस्यसंभवति एतेषां पुरुषाणां कर्तृत्वमनु
ख्यकर्तृग्रहणासंभवे गौणकर्तृग्रहणायो
गात् न चाशेषजगत्कर्तृत्वोक्तौ न तत एव ध्वादि
त्यादिकर्तृत्वस्यापि लाभात् पृथक्कुतः किं व्यर्थ
र्थमिति वाच्यं मेघार्थवादादिषु ध्वादित्यत्वं

ज्ञादिपुरुषाणां महामहिमसंकीर्तनेनतेषु
संजातपरब्रह्मत्वभ्रांतिनिवर्तकत्वेनपृथ
गुक्तिसाफल्यात् पुरुषपदस्यापि नजीवेवृ
त्तिः प्रमाणात्पुरुषइतिरूढमयोगेनैवकृ
त्स्नजगद्व्यापिनिब्रह्मण्येवकृत्स्नशरीरव्या
पिनिजीवेपिप्रयोगोपपत्यानत्रूढेरकल्प
नात्कल्पनेपियोगवत्रूढेरपिजीवब्रह्म
साधारण्येचैतन्नमात्रेकल्पनोपपत्तेश्चनपु
रुषश्रुतिर्जीवपक्षपातिनी श्रुतिपाठेकवि
पुरुषपदाश्रवणाच्च तथाचायंसूत्रार्थः वे
दितव्यः पुरुषः परमात्माकृत्स्नजगत्कर्तृत्वा
त्त्वचहेत्वसिद्धिः कर्मपदस्यजगद्वाचित्वात्त
स्माद्वेदितव्यः पुरुषः परमात्मेतिसिद्धमेवं
चसर्वसंहर्तृत्वादिकमित्यत्रत्यादिपदेनोक्त
योमध्वधिकरणोक्तंसर्वनियंतृत्वरूपसर्वस्थि
तिकर्तृत्वंजगद्वाचित्वाधिकरणोक्तंसर्वज
गदुत्पत्तिकर्तृत्वंचगृह्यते॥ अथैतज्जन्मका
रणत्वस्यस्थितिकारणत्वस्यचनिमित्तकारण
साधारण्यादुपादानत्वमप्यायनायप्रपंचस्य
ब्रह्मणिलयोदर्शितः अस्तुब्रह्मजगदुपादा

१
सि॰ले॰
टी॰
५२

नं तज्जन्मनि च घटजन्मनि कुलालवत् तत्स्थि
तौ राज्यस्थित्यां च राजवत्तदुपादानादन्यदेव नि
मित्तं भविष्यतीति शंकाव्यवच्छेदाय तस्यैव
जगज्जन्मजीवननियामकत्वमुक्तं ॥

ननु यत इत्यादिश्रुत्या जीवव्यावृत्तेश्वरस्य तत्पदवाच्यस्य ब्र
ह्मणो लक्षणमुक्तमिति नात्यर्थं वर्णनमयुक्तं तर्हि जिज्ञा
स्यस्य तद्ब्रह्मेति वाक्यशेषानुसारेणोक्ते नैवोक्तार्थभूताद्विती
यजिज्ञास्यब्रह्मलक्षणप्रतिपादकत्वस्यैवावगमादित्या
शंक्याह तेन तथाभूतब्रह्मलक्षणपरत्वमुपगच्छतां मतमा
ह अन्ये त्विति चेतनाचेतनात्मककृत्स्नभूतोपादानत्वप्र
तिपत्तिर्हि ब्रह्मणोऽद्वितीयत्वबोधहेतुः नच चेतनानां
नित्यत्वात् कथं तदुपादानत्वं ब्रह्मण इति वाच्यं तेषां स्वरू
पेणानित्यत्वेऽपि शरीरहृदयविशिष्टतया कार्यत्वोपगमात्
न चैवमपि ब्रह्मापेक्षया द्वितीयस्यानन्तकार्यस्य विद्यमान
त्वात् कथं तदुपादानत्वमद्वितीयत्वप्रत्यायकमिति वाच्यं
कार्यस्य ह्युपादानमेव वास्तवं स्वरूपं न तु तदतिरिक्तं वा
स्तवं स्वरूपमस्ति नामरूपात्मकजगद्रूपं तु मिथ्याभूतमि
त्यारंभणाद्यधिकरणे व्यवस्थापितत्वात् अतस्सर्वोपा
दानत्वं सर्वस्य वास्तवं स्वरूपं ब्रह्मैवेति बोधनद्वारा ब्रह्म
णो वास्तवाद्वितीयत्वबोधहेतुर्भवति अद्वितीयब्रह्मबो
धश्च मुक्तिहेतुरिति मुक्तिप्रयोजनकब्रह्माद्वितीयत्वबो
धहेतुभूतोपादानत्वप्रत्यायनार्थं यत्प्रयन्त्यभिसंविशन्ती
ति श्रुतिभागेन ब्रह्मणि सर्वभूतलयो दर्शित इत्याह उपा

दानत्वेति नन्वत्र घटाद्युपादाने मृदादौ च घटादिलयाधारत्वव
जन्मादिकारणत्वस्यापि सत्त्वेन तद्बलादप्युपादानत्वप्र
सङ्गः स्यादिति नेत्याह जन्मकारणत्वस्येति निमित्तं कुला
लदण्डचक्रादि नहि श्रुतौ जन्मादिकारणत्वप्रतिपादनं स्व
र्थे लयमात्रप्रतिपादनादेवेष्टसिद्धेरिति नेत्याह अस्ति
ति घटजन्मन्युपादानमृदतिरिक्तकुलालश्च जगज्जन्म
न्यपि उपादानब्रह्मापेक्षयाऽन्यत्कर्तृरूपं निमित्तं भवि
ष्यतीति भ्रमव्यवच्छेदाय तस्यैव ब्रह्मणः श्रुतौ जगज्ज
ननकर्तृत्वमुक्तं तथा राज्यस्थितिपालनरूपे पालनी
यप्रजाद्युपादानातिरिक्तराजवज्जगतः स्थितौ जगदु
पादानब्रह्मापेक्षयाऽन्यन्निमित्तं नियन्तृतया स्थितिहे
तुभूतं भविष्यतीति शङ्काव्यवच्छेदाय तस्यैव ब्रह्मणो
जगज्जीवननियामकत्वं श्रुत्याउक्तमित्यर्थः ॥

तथा चैकमेवेदं लक्षणमभिन्ननिमित्तोपा
दानतयाऽद्वितीयं ब्रह्मोपलक्षयतीत्याहुः
ब्रह्मणश्चोपादानत्वमद्वितीयकूटस्थचैत
न्यरूपस्य न परमाणूनामिवारम्भकत्वरूपं
न वा प्रकृतेरिव परिणामित्वरूपं किंतु स्व
विद्ययावियदादिप्रपञ्चरूपेण विवर्तमा
नत्वलक्षणं ॥

१
सि॰ले॰
टी॰
५३

43

तथाचेतिजगज्जननजीवननियामकत्वाभ्यां जगदुपादान
ब्रह्मणएवतन्निमित्तत्वप्रतीतोसिद्धायामित्यर्थः इदंकृत्स्न
कं लक्षणमेकं सदेवाभिन्ननिमित्तोपादानत्वेपर्यवस्यदद्वि
तीयंब्रह्मलक्षयतिब्रह्मव्यतिरिक्तवस्त्वास्तित्वशंकातिराक
रणद्वारेणज्ञापयतिनतुप्रत्येकलक्षणं सदित्यर्थः निमि
त्तंचतदुपादानंचेतिनिमित्तोपादानंअभिन्नंचतन्निमित्तो
पादानंचेतिपुनःकर्मधारयः आद्यकर्मधारयादेवनिमि
त्तोपादानयोरभेदेसिद्धेपिपुनरभिन्नपदंकर्मधारयाव
गताभेदपेक्षलक्षणएवननीलोत्पलादौगुणगुणिनो
रिवतादात्म्यरूपइतिज्ञापनार्थमितिबोध्यं ननुयतइति
पंचमीश्रुत्यासर्वभूतलयाधारत्वलिंगेनचनिश्चितंब्रह्म
णउपादानत्वंप्रधानस्येवपरिणामित्वरूपंवापरमाणू
नामिवारंभकत्वरूपंवारज्ज्वादेरारोपितसर्पाद्युपादान
स्येवजगद्रूपविवर्ताधिष्ठानत्वरूपंवावाच्यं नतावाद्यः ब्र
ह्मणःकूटस्थत्वात्परिणामवादेहिपरिणामपरिणामि
नोर्वास्तवाभेदस्वीकारेणब्रह्मणःपरिणामित्वेपरिणा
मजन्मादयोपिब्रह्मणिप्रसज्येरन् तथाचजन्ममरणा
दिविकारशून्यत्वलक्षणंश्रुतिसिद्धकूटस्थत्वंतस्यभज्ये
तनतस्यकूटस्थत्वात्तस्यपरिणामित्वंनसंभवति न
द्वितीयःअद्वितीयत्वात् ब्रह्मणः ब्रह्मणःसद्वितीयत्वेहि
परमाणुद्वयसंयोगवत्समवायिकारणलाभसंभवा
दारंभकत्वंभवेदित्याशयेनाह ब्रह्मणश्चेति तृतीयप्र
कारःपरिशिष्यतइत्याह किंत्वित्यादिना ॥

वस्तुनस्तत्समसत्ताकोन्यथाभावःपरिणा
मः तदसमसत्ताकोविवर्त्तइतिवाकारण
सलक्षणोन्यथाभावःपरिणामः तद्विलक्ष
णोविवर्त्तइतिवाकारणाभिन्नंकार्यंपरिणा
मः तद्भेदंविनैवतद्व्यतिरेकेणदुर्वचंका
र्यंविवर्त्तइतिवाविवर्त्तपरिणामयोर्विवेकः
अथशुद्धंब्रह्मोपादानमिष्यतेईश्वररूपंजी
वरूपंवा अत्रसंक्षेपशारीरकानुसारिणः
केचिदाहुःशुद्धमेवोपादानं जन्मादिसूत्रत
द्भाष्ययोरुपादानत्वस्यज्ञेयब्रह्मलक्षणत्वो
क्तेः तथावात्मनःआकाशःसंभूतइत्यादिका
रणवाक्येषुशबलवाचिनामात्मादिशब्दा
नांशुद्धेलक्षणैवेति ॥

ननुब्रह्मणस्तद्विवर्त्तप्रपंचयोरभेदस्सिद्धान्तेउपेयते आरंभ
वादेतुआरंभ्यआरंभकादत्यंतभिन्नमुपेयतेइतिआर
म्भविवर्त्तयोर्भेदःस्पष्टःसिद्धान्तइवपरिणामवादेपिसां
ख्याद्यभिमतेपरिणामपरिणामिनोरभेदाभ्युपगमात्त
विवर्त्तपरिणामयोर्भेदःकथमवगंतव्यइत्याशंक्यल
क्षणभेदादित्याह वस्तुनइति वस्तुनउपादानत्वाभिम
तस्य अन्यथा पूर्वरूपापेक्षयारूपान्तरेण भावःभवनं
अवस्थानं अन्यथाभावः अवस्थाविशेषइतियावत् त

साम्यसत्ताकः तेन वस्तुना समा सत्ता यस्य अन्यथाभाव
स्य सतत्था तथा च उपादानत्वाभिमतवस्तुसत्तासमान
सत्ताकत्वे सति तदवस्थाविशेषरूपत्वं तत्परिणामत्वमि
ति परिणामलक्षणं पर्यवस्यति तत्र विवर्तवारणाय सम
स्यन्ते घटस्य तत्परिणामत्ववारणाय विशेष्यं विवर्त
लक्षणमाह तदिति वस्तुनस्तदसमसत्ताको अन्यथाभा
वो विवर्त इति संबंधः उपादानत्वाभिमतवस्तुसत्तावि
षमसत्ताकत्वे सति तदवस्थाविशेषरूपत्वं तद्विवर्त
त्वमिति विवर्तलक्षणं उपादानत्वाभिमतब्रह्मवस्तुस
त्ताविषमसत्ताकत्वं चैतन्यस्यास्तीति तस्य ब्रह्म
विवर्तत्ववारणाय विशेष्यं परिणामवारणाय सत्यंते
ब्रह्मचैतन्यस्य पारमार्थिकी सत्ता घटादिप्रपंचस्य व्याव
हारिकी सत्ता तु ॥

कैवसत्तानन्तदर्शितिरिक्तैर्निमित्तसाधारणेन ल
क्षणान्तरमाह कारणसलक्षण इति उपादा
नत्वाभिमतवस्तुसलक्षणत्वे सति तदवस्था
विशेषत्वमिति परिणामलक्षणं ब्रह्मसल
क्षणं जडरूपं वोध्यपरिणामपरिणामिनो
र्जडत्वनियमात् नकाष्ठस्याग्निसंकाष्ठवस्तु
नो घटपरिणामत्ववारणाय विशेष्यं प्रपंच
स्य सविंत्यपरिणामत्ववारणाय सत्यंते वि
वर्तलक्षणमाह तदिति उपादानत्वाभिम

तवस्तुविलक्षणत्वे सतितदवस्थाविशेषत्वं
तद्धिवर्तत्वमितिविवर्तलक्षणमत्रविवर्त्त
ऽत्वरूपत्वेलक्षणेविवक्षितेवियदादिप्रपं
चवत्शुक्तिरजतादेरपितत्तद्वच्छिन्नचैत
न्यपवाध्यासेशीकारात्जडमात्रवृत्तिन्याविव
र्तेनह्विलक्षणत्वमस्तीतिलक्षणसंगतिः उ
पादानत्वाभिमतजडविलक्षणत्वेनप्येजड
विवर्त्तत्ववारणायविशेषणमस्यपरिणामेघटा
दौमद्विवर्त्तत्ववारणायसत्यन्ते प्रकारान्तरेण
विवर्त्तपरिणामयोर्लक्षणमाह कारणाभि
न्नमिति कारणत्वाभिमतवस्त्वभिन्नत्वेसतितन्
कार्यत्वेनत्यपरिणामत्वंवियदादौब्रह्मकार्यत्व
मस्तितन्यपरिणामत्वंतन्नास्तीतितद्वारणाय
सत्यन्तंब्रह्मप्रपंचयोरारोपिताभेदसत्वेपि
लक्षणेविवक्षितेनस्यपर्यामिद्वयसमानस्वभा
वाभेदस्याभावान्नातिव्याप्तिः परिणामवादे
मृदोपिघटाभिन्नत्वमस्तीतितस्याः घटादिप
रिणामत्ववारणायविशेषणं तदभेदमिति
वस्तुतस्तदभेदविनैवेत्यर्थः व्यतिरेकोभेदः
अस्मिन् लक्षणेकार्यत्वमविवक्षितं अनाद्य

विद्यादेरपिविवर्तत्वांगीकारात् यद्वाकार्यरू
पस्यैवविवर्तस्यद्वैलक्षण्यं तस्याश्चउपादान
त्वाभिमतवस्तुनः सकाशाद्वस्तुतोभेदाभेदा
भ्यांदुर्निरूपत्वेसतिकार्यंकार्यरूपविवर्त
लक्षणमज्ञाविद्यांप्रत्युपादानत्वाभिमतचै
तन्याद्वस्तुतोभेदाभेदाभ्यांनिरूपयि तुमश
क्यायामविद्यायाप्रतिव्याभिचारणायविशे
षां आरंभवादेउपादानादभेदेनदुर्निरूपका
र्यप्रतिव्याभिचारणायभेदेत्युक्तंपरिणाम
वादेउपादानात् भेदेनदुर्निरूपकार्यप्रति
व्याभिचारणायाभेदेत्युक्तं सिद्धान्तेकार्यका
रणयोभेदोपगमादसंभववारणायवस्तुत
इत्युक्तं ननुकार्यकारणयोर्वस्तुतोभेदाभे
दौकथंदुर्निरूपावितिउच्यते नत्रतयोर्भे
दस्तावद्दुर्निरूपः निम्नोन्नतादियुक्तस्यह
स्तव्यतिरेकेणाघटा ॥

क्तिरजतादेः प्रातिभासिकीसत्तेतिसत्ताद्वैविध्यांगीकार
मतेलक्षणभेदउक्तः ब्रह्मणिघटादौशुक्तिरजतादौच
सर्वत्रब्रह्मस्वरूपभूताए ॥

यनुपलंभात् संयोगविशेषयुक्ततंतुव्यतिरे
केण पटानुपलंभाच्च सदृष्टः तन्तवः पटः सु
वर्णो कुंडलमित्यादिना सामानाधिकरण्या
च्च न हि वस्तुनोभिन्नयोस्सामानाधिकरण्य
प्रत्ययः संभवति किंच कारकव्यापारात्पू
र्वं मृदादौ घटादेरऽसत्त्वे शशशृंगादिवदुत्प
त्त्यनुपपत्तेः उत्पत्तिक्षणात्पूर्वमसतः का
र्यस्योत्पत्तिक्रियाप्रतिकर्तृत्वानुपपत्तेश्च
पूर्वं सिद्धस्यैव कर्तृत्वदर्शनात् उत्पत्तिक्ष
णोऽपादानेन सह कार्यस्य संबंधानुपपत्ते
श्च पूर्वं क्षणे कार्यस्यासत्त्वात्पूर्वं सिद्धयोरेव
हि पश्चात्संबंधसंभवः अन्यथा शशशृंगा
देरपि कारणसंबंधः स्याद्दुर्वारत्वात् कारक
व्यापारात्पूर्वं कार्यस्य तच्छैवलक्षण्यानंगी
कारे तद्वदेव पश्चादात्मलाभासंभवस्यदु
र्वारत्वाच्च सिद्धे च प्राक् कार्यसत्त्वे प्राक्
काले कार्यकारणयोर्भेदमानाभावाद्भे
दे सिद्धे पश्चादपि तयोरभेद एव स्वीकर्तव्य
इति कार्यकारणाभेदवादिनः सांख्यादयः
तद्भेदवादिनस्तार्किकादयस्तु वदंति का

१
सि.ले
टी
४८

46

र्यकारणयोरभेदो न संभवति तद्भावविरोधा
त् नहि तस्यैव तत्कार्यत्वेन कारणत्वेन च संभ
वति स्वार्थक्रियाभेदाभावप्रसंगाच्च नहि ज
लाहरणार्थक्रिया मृद्वस्तुनः संभवति घ
टत्वेनः प्रागपि तत्प्रसंगात् नापि मृदोर्थ
क्रिया घटस्य संभवति मृद्घटस्यापि घटो
त्पादकत्वप्रसंगात् कार्यस्य कारणव्यापा
रात्पूर्वं सत्वे च कारकव्यापारवैयर्थ्यप्रसं
गात् तदा मृद्घटे वोपलंभप्रसंगाच्च तदु
क्तं पंचदश्यां मच्चरो न मृदो भिन्नो वियोगे
सत्यनीक्षणात् नाप्यभिन्नः पुरा पिंडदशा
यामनवेक्षणात् इति वियोगे सति मृदः
सकाशात् बुध्या विवेचने क्रियमाणेऽन्व
येः एवं कार्यकारणयोर्भेदवादिभिरभेद
वादिभिश्च दर्शितैः परस्परं प्रतिद्वन्द्वमप्र
कैर्न्यायैः कार्यस्य कारणाद्भेदाभेदाभ्यां प्रा
प्त्यनेः सत्वासत्वाभ्यां च दुर्निरूपत्वात् त
स्याऽनृतत्वं सिद्धं कारणं तु कार्यानुगतेः पूर्व
काले कार्यकाले कार्यनाशकाले चानुवर्त
मानं कार्यान्तभेदेन सत्वेन च निरूपयितुं

शाक्यत्वात् सत्यमेव कार्यापेक्षया एवं मृदा
देरपि नरकारणस्य तत्तत्कार्यापेक्षया स
त्यत्वसिद्धेरपि परमार्थसत्यत्वेनोपेयते श्रुत्या
बलवत्यतिरिक्तस्य सर्वस्यैव बाधितत्वात् ब
ह्मणस्तु परमार्थसत्यत्वं सदात्मनो बाधशू
न्यत्वात् अभ्युपगम्यते अत एव जगत्कारण
स्य सत्यत्वे मृदादिसत्यत्वं जगतो मिथ्यात्वे
च मृदादिकार्यस्य घटादेरनृतत्वं च दृष्टान्त
त्वेन श्रुत्या उपादीयते न तु केवलं घटरूपा प
वं मायामयत्वेन विकारस्यानृतात्मतो वि
कारापारमृदादेस्सत्यत्वं वाग्वीक्षतिरिति
श्लोके विकारानृतत्वादौ पूर्वोक्तन्यायकला
प एवं शास्त्रार्थः दृष्टान्तत्वेनेति शेषः उक्तं च
भामत्यां तिवचने तदनेन प्रमाणेन विकार
जातस्यानिर्वाच्यतया सिद्धमनृतत्वं कारण
स्यानिर्वाच्यतया सिद्धं सत्यत्वं च मृत्तिकेत्येव
सत्यमित्यादिना प्रवेयेन दृष्टान्ततया तु वद
ति श्रुतिरिति वाचारम्भणं विकारो नामधे
यं मृत्तिकेत्येव सत्यमिति श्रुतिरित्यर्थः वि
कारो घटादिर्वाचा घटशरावादिरस्तीत्या

दिशाहेनारभ्यतेऽवच्छिद्यत इत्यारंभणं वा
वाचाऽवच्छिद्यत एव न वस्तुतोऽस्ति विकारस्त
स्य हेतुर्निरूपत्वादिति भावः कथं न हि मृद्वस्तु
नस्स्वकाशात् घटादिर्नीत इति कार्यकारण
योर्भेदव्यवहार इत्यत आह नामधेयं भेद
व्यवहारो नाममात्रेणार्थशून्यः यथा राहोः
शिरः पुरुषस्य चैतन्यमिति व्यवहारः विका
रवत्त्वभेदोऽप्यनिर्वचनीय इति भावः किं त
र्हि सत्यं तत्राह मृत्तिकेत्यनेन मृत्तिकात्व
न रूपेण घटशरावादिविकारेष्वप्रतीय
मानेन कारणरूपेण वस्तु सत्यं विकारसत्यत्वमे
वकारेणावच्छिद्यते न त्विहेतुर्वैचत्वं का
रणाद्भेदाभेदाभेदाभ्यां कार्यस्येति पृच्छति
प्रश्नेति ननु वाक्यार्थभूतब्रह्मलक्षणप्रव
श्रुतौ लक्षणमुक्तं न हि जिज्ञासस्येति वाक्य
शेषलक्षणीयस्य ब्रह्मणो जिज्ञास्यत्वाभि
धानात् तथा चानिश्चितार्थेऽप्रश्नानुपपत्ति
रिति चेन्न यथा ब्रह्मणो जिज्ञास्यत्वं एवं तत्व
पदार्थभूतयोर्जीवेश्वरयोरपि ब्रह्मलक्ष्यप्र
तिपत्तिहेतुत्वेन जिज्ञास्यत्वमस्तितथा न

योऽपि वक्ष्यमाणरीत्याभिन्ननिमित्तोपादानत्वं
च संभवतीति जिज्ञास्यत्वकारणत्वयोः सा
धारणत्वेन प्रश्नोपपत्तेरिति भावः जीवईशो
विशुद्धाचिन्मया जीवेशयोर्भिदा अविद्यातच्चि
तोर्योगः षडस्माकमनादय इति संप्रदायवि
द्वचनेवैतन्मते विध्यस्यैव प्रसिद्धत्वात्तदु
भयोरेवैतयोः प्रश्नः सामान्यज्ञानस्य विशेष
जिज्ञासाहेतुत्वात् ब्रह्मणः सामान्यरूपेणो
पादानत्वज्ञानानन्तर्यमथशब्दार्थः प्रश्नो वा
नन्तर्यः ईश्वररूपं जीवरूपं वा ब्रह्मनोपादा
ननिमित्तिपवकारार्थः जन्माद्यस्य यत इति सू
त्रे जन्म आदिरस्येति बहुव्रीहिः जन्मस्थिति
भंगत्रयपदार्थः जन्मादीनीति नपुंसकैकवच
नेन अन्यपदार्थे समाहारद्वंद्वसूचनादन्यप
दार्थभूतजन्मस्थितिभंगोपेतरेतरयोगद्वं
द्वाश्रयणेन जन्मादय इति सूत्रापत्तेः जन्मन
आदित्वं च जायमानपदार्थेषु स्थितिभंगाव
पेक्षया दृष्टमिति सूत्रे जन्मनः प्राथम्यरूपादि
त्वनिर्देशः अस्येति सर्वनाम्ना सूत्रकर्तृबुद्धि
स्थसकलप्रपंचनिर्देशः संभाव्यजगतो ज

१
सि.ले.
टी.
४८

न्मादेरस्य संबंधनिर्देशः यतइतिकारणनिर्दे
शः सूत्रेतत्पदाध्याहारः पूर्वसूत्राद्ब्रह्मप
दानुषंगः तथाचयतःकारणादस्यजगतो
जन्मादितद्ब्रह्मेतिसूत्रार्थः तत्रब्रह्मेतिवाक्या
र्थभूतशुद्धब्रह्मणएवप्राधान्येनलक्षणी
यत्वात् तस्यैवजन्मादिसूत्रेलक्षणमुच्यते अ
थातोब्रह्मजिज्ञासेतिपूर्वसूत्रेणसविषय
समर्पकेणब्रह्मपदेनशुद्धब्रह्मणएवोपा
त्तत्वेनतस्यैवलक्षणाकांक्षणाच्चेतिभावः न
न्वात्मनआकाशःसंभूतःसोकामयतयस्स
र्वज्ञःसर्वविदित्यादिकारणवाक्येष्वीश्वरस्व
रूपब्रह्मणःकारणत्वमुच्यतेनशुद्धस्यतस्यका
मयितृत्वसर्वज्ञत्वकर्तृ ॥ विवरणानुसा
रिणस्तुयःसर्वज्ञःसर्ववित्यस्यज्ञानमयंत
पः तस्मादेतद्ब्रह्मनामरूपमन्नंचजायतइ
त्यादिश्रुतेःसर्वज्ञत्वादिविशिष्टमायाशब
लमीश्वररूपमेवब्रह्मोपादानं अतएवभा
ष्येतस्यधर्मोपदेशात्सर्वत्रप्रसिद्धोपदेशादि
त्याद्यधिकरणेषुसैवरूढकृतत्वामतउक्तंच
तद्यज्ञस्तद्ब्रह्मसर्वकर्मासर्वकामःसर्वगं

धः सर्वरस इत्यादिश्रुत्युक्तं सर्वोपादानत्वप्र
युक्तं सर्वात्मकत्वं जीवव्याहृतमीश्वरलिंग
मित्युपवर्णितं ॥

त्वाद्यनुपपत्तेरतस्तद्वाक्यगतात्मपदं तत्पदं सर्वज्ञादि
पदानां शबलवाचित्वात् न कारणवाक्येभ्यः शुद्धस्यो
पादानत्वसिद्धिरिति चेन्नेत्याह तथा चेति जन्मादिसूत्र
तद्भाष्ययोः स्वारस्येन शुद्धस्योपादानत्वावगमे सतीत्य
र्थः लक्षणैव स्वीक्रियते अतः कारणवाक्येभ्यः शुद्धस्य
कारणत्वावगतिर्युक्तेति भावः अथ शुद्धं ब्रह्मोपादान
मित्यादिग्रन्थे द्वितीयपक्षमादाय प्रतिवचनमुत्थापय
ति विवरणेति यस्य प्रकृतस्य भूतयोनेः पूर्वमंत्रोपात्तं
तपः ज्ञानमयं स्वरूपज्ञानविकारः मायावृत्तिप्रतिविं
बरूपमिति यावत् तस्मात्सर्वज्ञाद्भूतयोनेस्सकाशादे
तत्सन्निहितं अपरकालीनं कार्यरूपमिति यावत् ब्रह्म
हिरण्यगर्भाख्यं जायत इति श्रुतेरीश्वररूपमेव ब्रह्मउ
पादानमिति संबंधः तच्छुद्धं जीवरूपं वेत्येवकारार्थः स
र्वज्ञत्वादीत्यादिपदेन सर्ववित्त्वकामयितृत्वसर्वेश्वरत्वा
दीनि गृह्यन्ते मायोपाधिनिरूपितर्विवत्वविशिष्टे सर्व
ज्ञत्वादिगुणयुक्तं च यदीश्वररूपं ब्रह्म चैतन्यं तदेवोपा
दानमित्यर्थः अथ शुद्धं ब्रह्मोपादानमिष्यत इति प्रश्नस
प्रतिवचनावसरे ईश्वररूपमेव ब्रह्मोपादानमित्येताव
ति वक्तव्ये तस्य मायाशबलत्वविशेषणमीश्वरोपि शु
द्धचैतन्यमेवेति भ्रांतिनिरासार्थं तस्य सर्वज्ञत्वाद्यनेक

१
सि॰ले॰
टी॰
४९

विशेषणोपादानं चेश्वररूपत्वलक्षणउपादानत्वे यस्सर्वज्ञ
इत्यादिकारणवाक्यानां सर्वेषामेकरूपप्रदर्शनार्थमि
ति मंतव्यं जीवशुद्धत्वलक्षणाव्याहृतेश्वररूपत्वलक्षण ॥

जीवेश्वरानुस्यूतचैतन्यमात्रस्य सर्वोपादान
त्वे तन्न तज्जीवव्याहृतमीश्वरलिंगं स्यात् सं
क्षेपशारीरके शबलोपादानत्वनिराकरण
मपि मायाविशिष्टोपादानत्वनिराकरणा
भिप्रायेण तन्निकृष्टेश्वररूपचैतन्योपादान
त्वनिराकरणपरं तत्रैव प्रथमाध्याये तेज
गदुपादानत्वस्य तत्पदार्थहानित्वोक्तेः ॥

उपादानत्वे भाष्यसंमतिमाह अत एवेति ईश्वररूपत्वलक्षण
एवोपादानत्वाभ्युपगमादेवेत्यर्थः इत्यादिसूत्रोक्तं सर्वो
पादानत्वप्रयुक्तं सर्वात्मकत्वमीश्वरलिंगमित्युपवर्णितं
भाष्ये इति संबंधः यस्य सर्वोपादानत्वं तस्य सर्वात्मकत्वमु
पादानोपादेययोस्तादात्म्यात्रान्यस्यान्यविवादं यद्यपि
विवर्तविशिष्टचैतन्यरूपे जीवे विवर्तविशिष्टचैतन्य
रूपे ईश्वरे च विशेष्यतया अनुस्यूतशुद्धचैतन्यरूपत्वल
क्षणः सर्वोपादानत्वमभिप्रेते तदा तस्यैव सर्वात्मकत्वस्या
नेश्वरस्येति सार्वात्म्यस्य भाष्ये जीवव्याहृतेश्वरलिंगत्वोप
न्यासो न स्यात् न च विशेष्यभूतशुद्धत्वलक्षणगतं सर्वात्म
कत्वं विवर्तविशिष्टचैतन्यरूपेश्वरलिंगतया भाष्ये व

र्णितमिति वाच्यं तथासतितस्यजीवत्वापत्तेर्नस्यात्
विशेष्यधर्मस्यसर्वात्मकत्वस्यईश्वरधर्मत्वज्जीवध
र्मत्वस्यापिसत्वादित्याशयेनाह जीवेश्वरान्तस्तेति
छांदोग्येश्रूयते यए— तदादित्येहिरण्मयःपुरुषोदृ
श्यतेहिरण्यश्मश्रुर्हिरण्यकेशः आप्रणखात्सर्वए
वसुवर्णइत्युपक्रम्यतस्यऋक्सामचगेष्णावित्युक्त्वा
उत्तरत्रयएषोंतरक्षिणिपुरुषोदृश्यतेसैवऋक्तत्सा
मतदुक्थंतद्यजुस्तद्ब्रह्मेतिचोक्त्वा तयइमेवीणायां
गायंतिएतंतेगायंतीति अस्यार्थः आदित्येअंतर्यःपु
रुषः शास्त्रतोदृश्यतेएष हिरण्मयः ज्योतिर्मयःस्वतः
प्रकाशश्चैतन्यस्वरूपइत्यर्थः तस्योपासनार्थंशरीर
माह हिरण्यश्मश्रुरित्यादिना हिरण्यसुवर्णशब्दौज्यो
तिःपरौ प्रणखान्नखाग्रंआङः अभिव्याप्तेतस्यहिरण्म
यपुरुषस्यऋक्सामनीगेष्णौपरिमलौकरीत्यास्तुति
यनीभूतेइत्य ॥

गानंतस्यैवपुरुषस्यादित्यस्यानवदुपासना
र्थंस्थानांतरमाह यएषोंतरक्षिणीति सैव
ऋगित्यादौविधेयापेक्षयालिंगव्यत्ययः स
एवऋक्पुरुषःसमासामसः उक्थंसः य
जुःसःब्रह्मवेदः ब्रह्मपदेऋगाद्यतिरिक्तवे
दपरे तथाचगेष्णवाक्येनसर्वदेवात्मकत्व
मुक्तं सैवऋगितिवाक्येनसर्ववेदात्मकत्व

मुक्तं तथाप्येदमेवप्रसिद्धागायकाः वीणायां लौ
किकपुरुषंगायंतितेपिएनंपुरुषंगायंती
मुख्याऽद्याध्यात्मकत्ववत्लौकिकपुरुषात्म
कत्वमपिसिध्यति तथाचसर्वदेवात्मकत्व
सर्ववेदात्मकत्वसर्वलौकिकपुरुषात्मकत्वा
निमिलित्वासर्वात्मकत्वेपर्यवस्यंति तिर्यगा
त्मत्वस्याप्युक्तप्रायत्वात् एवंस्थितेसंशयः
आदित्यप्रतिष्ठितोऽन्तःश्रूयमाणोहिरण्मयः
पुरुषःमंडलाभिमानिदेवताविशेषोवाऽनि
त्यसिद्धःपरमेश्वरोवेति तत्रदेवताविशेष
एवहिरण्मयःपुरुषस्तस्यसंसारित्वेनहि
रण्यश्मश्रुत्वादिरूपसंबंधोपपत्तेस्सर्वात्म
कत्वस्याप्युपासनार्थेनआरोपोपपत्तेश्चन
परमेश्वरःतस्यशरीरासंभवादितिप्राप्तेए
वंप्राप्तेब्रूमः अन्तस्तद्धर्मोपदेशात्सर्वत्रप्र
सिद्धोपदेशादितिआदित्यादावंतरवस्थितो
हिरण्मयपुरुषोनित्यसिद्धपरमेश्वरएव
कुतः तद्धर्मस्यसर्वात्मकत्वस्यैवऋक्त
त्सामेत्यादावुपदेशात्सर्वात्मकत्वंहिईश्वर
स्यैवधर्मः तस्यसर्वोपादानत्वेनसर्वात्मक

त्रोपपत्तेर्ने च सुखसंभवे समारोपकल्पना
न्याय्या परमेश्वरस्यापि मायिकानुग्राहार्थमि
च्छावशान्मायागानसुहृत्सबोधपरिणामरूप
शरीरसंभवादुमासहायं परमेश्वरं प्रभुमित्या
दिश्रुतिष्वजन्मकर्मं च मे दिव्यमित्यादिस्मृति
षु च प्रसिद्धत्वाच्चेति निर्णयः सर्वं खल्विदं ब्र
ह्मेति प्रकृत्य सक्रतुं कुर्वीतेति वाक्येन क्रतुश
ब्दवाच्यमुपासनं विधाय उपास्याकांक्षायां प
ठ्यते मनोमयः प्राणशरीरः भारूपः सत्यसं
कल्प आकाशात्मा सर्वकर्मा सर्वकामः स
र्वगंधस्सर्वरसस्सर्वमिदमभ्यात्तोऽवाक्यनाद
र एष म आत्मान्तर्हृदय इति प्रथमर्थः मनो
मयः ॥

र्थः इदं ऋक्सामगेष्णत्वं समस्तऋक्सामस्तुत्यत्वरूपं हिर
ण्मयपुरुषविशेषणं नस्य वेदे ऋक्सामस्तुत्यतया प्रसिद्धे
दाध्यात्मकत्वमादाय पर्यवस्यति हिरण्मयपुरुषस्येंद्रादि
भ्यस्साकाशाद्भिन्नत्वेन नहि प्रोषणं नासिध्यति श्रयत्वस्तेर
न्यविषयकत्वायो ॥

मनःप्रधानः प्राणःशरीरमस्येति प्राणश
रीरः भाश्चैतन्यं रूपमस्येति भारूपः सत्याःस

१ सि॰ले॰ टी॰ ५२

51

प्रतिहताः संकल्पाः सृष्ट्यादिगोचरा अस्य आ
काशवदात्मा व्यापकत्वसूक्ष्मत्वादिगुणैः स्व
रूपमस्य सर्वाणि कर्माणि क्रियन्त इति कृत्य
त्वात्कार्याण्यस्य यद्वा भूतगणोऽयं यस्मादिस
त्थितानात्कर्मपदं परिस्पन्दपरं सर्वं परिस्पन्दा
त्मकोऽन्यर्थः सर्वे कामा इच्छारूपा अस्य सर्ववि
शेषरूपा वा सर्वे गन्धाः गुणरूपाः अस्य गुणो
गन्धः पृथिव्यां चेति सर्वे रसाः अस्येदं
रूपं सर्वं अभ्यात्तम् अभिमुख्येन तादात्म्येनातः व्या
मः वागेव वाकः वाकोऽस्यास्तीति वाकी न
वाकी अवाकी वागिन्द्रियशून्य इति यावत् वा
क्यग्रहणं कर्मेन्द्रियाणामुपलक्षणार्थं स्वरूप
लक्षणं क्रियाशक्तिमत्त्वाविशेषात् आदरः
कामः सोऽस्य नास्तीत्यनादरः आदरनिषेधेन
तत्परिणामि मनो निषिद्धं भवति मनोनिषे
धेन च ज्ञानेन्द्रियाणां निषेधः सिद्धो भवति
ज्ञानशक्तिमत्त्वाविशेषात् अथ परिस्पन्देच्छा
गन्धरसवत्त्वं तदाश्रये वायुमनःपृथिवीज
ले भूतविशेषे तादात्म्यं विना न संभवतीति
सर्वकर्मेत्यादिवचनेन अविशेषेण सर्वता

दात्म्यप्रतिपादकसर्वमिदमभ्यानश्रुतिवच
नेन च मनोमयत्वादिगुणकस्य सर्वात्मत्व
प्रतीयते तच्च ब्रह्मण एवोपपद्यते तस्य स
र्वोपादानत्वेन सर्वात्मकत्वोपपत्तेः न जी
वो मनोमयत्वादिगुणकस्तस्य सार्वात्म्यास
म्भवात् न च मनोमयत्वप्राणशरीरत्वयोर्जी
वधर्मयोर्ब्रह्मण्यसंभव इति वाच्यमनन्तादा
त्म्येन गंधादिमत्त्ववज्जीवतादात्म्येन मनोम
यत्वाद्युपपत्तेरिति सूत्रार्थस्तत्र मनोमयत्वा
दिगुणकं ब्रह्मैवोपास्यत्वेनेह निर्दिश्यते
कुतः सर्वत्र वेदान्तेषु प्रसिद्धस्य ब्रह्मणः स
र्वं खल्विदं ब्रह्मेति पूर्ववाक्ये स्वशब्देनैवोप
देशादस्मिन्नपि वाक्ये प्राणः शरीरमस्येत्या
दिविग्रहवाक्ये षष्ठ्यप्रकृतब्रह्माकर्षकसर्व
नामश्रुतीनां सत्त्वाच्च ब्रह्मैव सगुणमुपास्य
मत्रेति सिद्धं सर्वोपादानत्वेति शुद्धब्रह्म
वज्जीवस्य सर्वोपादानत्वोपगमेपि सर्वात्म
कत्वं जीवव्याहतमीश्वरलिंगेन स्यादिति
तत्राहार्थः ननु संभवेपि शारीरके मायाशब
लस्य उपादानत्वे निरस्तमिति नहि रोधयत्व

१
सि॰ले॰ टी॰ ५२

52

नन्वाह संक्षेपशारीरक इति मायायाश्चापि विं
बभूतेश्वरविशेषणतयानुपादानत्वाश्रय
कोटौ निवेश एवं तत्र दर्शितः नन्वविवर्तवि
शिष्टचैतन्यरूपेश्वरस्य नत्विरत्वमिति न तद्वि
रोध इत्यर्थः नन्वशबलस्योपादानत्वे निरा
कृत्यजगदुपादानत्वस्य ज्ञेयत्वलक्षणाव
समर्थनपरस्य संक्षेपशारीरकग्रंथस्य क
थमेवमभिप्रायः कल्पयित्वेष्टाकाने स्वरस
नत्वस्य विंबप्रतिविंबानुगानस्य चत्वलोपा
दानत्वप्रतिपादनपरत्वावगमादिति नेत्या
ह नचैवेति संक्षेपशारीरकपवेत्यर्थः न
चैतन्यपदार्थहतित्वे तत्पदलक्ष्यार्थहतित्व
विवक्षिते लक्ष्यार्थस्य शुद्धत्वलेति न संक्षेप
शारीरकग्रंथस्य पूर्वापरविरोधः नचान्ते
न विंबभूतेश्वरस्योपादानत्वलाभ इति वा
च्यं लक्ष्यार्थत्वस्य वाक्यार्थमायाधरणतयात
त्पदार्थहतित्वविशेषणतैवपर्ष्यापत्तेस्त
त्पदार्थहतित्वे तत्पदवाच्यार्थहतित्वमेव
वक्तव्यमिति न च विरोधाय सर्वज्ञत्वादिगुण
केश्वरस्य जगत्कारणत्वप्रतिपादकवद

श्रुत्यविरोधाय च शबलोपादानत्वनिराकर
णे मायाविशिष्टोपादानत्वनिराकरणरूप
मेव वक्तव्यमिति न संक्षेपशारीरकविरोध
इति भावः नहि जन्मादिसूत्रतद्भाष्ययोर्द्वैय
ब्रह्मलक्षणत्वोक्तिविरोध इतिनेत्याह एवं
चेति अभिन्ननिमित्तोपादानत्वरूपलक्षण
स्यानन्तद्धर्माधिकरणभाष्यपर्यालोचनया
विवभूते एवावगतत्वे सिद्धे सतीत्यर्थः अपि
शब्दः एवं चेश्वरगतमपि कारणत्वं तदनु
गतमखण्डचैतन्यं शाखाचंद्रमसमिव तट
स्थतयोपलक्षयितुं शक्यतीति न तस्येयब्र
ह्मलक्षणत्वोक्तिरिति मन्यंते वियदादिप्रप
ञ्च ईश्वराश्रितमायापरिणाम इति तत्रेश्वर
उपादानं ॥

चैतन्यमित्यनेन संबध्यते कारणत्वमित्यनंतरमीश्वरमि
त्यध्याहर्तव्यं तथा बोधयत्सदिति शेषः तदनुगतमितिविं
बत्वविशिष्टचैतन्यरूपेश्वरानुगतमित्यर्थः अखण्डचैत
न्यमिति विशेष्यभूतं शुद्धचैतन्यमित्यर्थः तटस्थत्वं ल
क्ष्यस्वरूपवहिर्भूतत्वं वा लक्ष्याहतित्वं वा उपलक्षणत्वं
वा बोध्यं कचंद्र इति प्रसिद्धशाखायामिन्दुतरं भवति न
त्वयथाशाखादिगतं तरगतं तत्तद्व्याहतं चंद्रमुपलक्ष

१
सि· ले·
टी·
५३

53

यति तथा ईश्वरगतं कारणत्वमीश्वरभिन्नत्वाह ततयाबोध
यन् स तटस्थतयेश्वरानुगतमखण्डचैतन्यमपीत्याह
तत उपादानलक्षणयेति शाक्तोत्पवेत्यर्थः ईश्वरगतेनाभिन्न
निमित्तोपादानत्वेन विंवत्वविशिष्टचैतन्यरूपेश्वरस्य जग
दुपादानत्वसंभवशून्याज्जीवात् तत्कर्तृत्वसंभवरहिताच्च
यानादेश्च सकाशाद्व्यावृत्तो गम्यमानायाः सत्याविशेष्यभूत
ज्ञेयब्रह्मणोपि प्रधानादिव्यावृत्तिर्गम्यत इत्यभिप्रेत्य तस्य
ज्ञेयब्रह्मलक्षणत्वं जन्मादिसूत्रतद्भाष्ययोः स्वदेपश्चारी
रकेवोक्तमिति भावः एवं तटस्थलक्षणेन प्रधानादिव्या
वृत्तत्वेनावगतं ब्रह्म कीदृक्स्वरूपं तदिति विशेषजिज्ञा
सायां सत्यासत्यज्ञानानंदात्मकं ब्रह्मेति स्वरूपलक्षणं प्र
वर्तते अनेनैवाभिप्रायेण भाष्यकारैरुक्तं तस्य च निर्णी
यवाक्यमानंदाद्ध्येव खल्विमानि भूतानि जायन्त इति यतो
वेत्यादिवाक्येन यस्मात्कारणात् इमानि भूतानि जायन्त
इत्युक्तं तद्धत्त सत्यज्ञानानंतस्वरूपादानंदादेव ना
न्यस्मात्कारणादित्येतत् हि प्रसिद्धपूर्ववल्यामिति श्रुत्य
र्थः अनेन स्वरूपलक्षणेन विंवभूतेश्वरानुगतं तत्पद
लक्ष्यं वस्तुतो वाक्यार्थभूतं ज्ञेयब्रह्माविशेषतो निर्णीतं
भवति इयं च स्वरूपलक्षणविवक्षा मूलेच ॥

एवं परेण सूचिता जगत्प्रकृतिभूतमाया
प्रतिविंवईश्वरः मायाचेश्वराश्रिता न च प्र
तिविंवस्य मायाकलितत्वात् न हि श्लिष्ट

चैतन्याश्रितत्वं मायाया न संभवति प्रतिविं
बत्वकल्पनास्तागेव तस्याश्चैतन्याश्रितत्वस्य
वक्तव्यत्वादिति वाच्यं मायावत्प्रतिविंबत्वस्या
प्यनादित्वेन तस्यास्तद्विशिष्टचैतन्याश्रितत्वो
पपत्तेः वस्तुतो निर्विशेषचैतन्ये अनादिका
लमारभ्यकल्पितप्रतिविंबत्वस्थितेरनिर्व
चनीयमायाधीनत्वमात्रेण प्रतिविंबत्वस्य
तत्कचैतन्ये अनादिकालमारभ्यकल्पितप्र
तिविंबत्वस्थितेरनिर्वचनीयमायाधीनमा
त्रेण प्रतिविंबत्वस्य तत्कल्पितत्वेन तत्प्रति
विंबत्वस्य वियदादेरिव मायापरिणामत्व
स्योपपत्तेः तथासति प्रतिविंबभूतेश्वरस्य
सादित्वप्रसंगात् न च माया अनादिकाल
मारभ्य चैतन्ये प्रतिविंबत्वस्य तत्कल्पितत्वं
घटयति तद्विशिष्टमेव चैतन्यमाश्रयत इ
ति कथं संभावयितुं शक्यमिति वाच्यं माया
या अघटितघटनापटीयस्त्वात् न च शुद्धचै
तन्याश्रितैव माया तत्र प्रतिविंबभावं घट
यतीति कुतो नाश्रीयत इति वाच्यं मायां तु प्र
कृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुति

१
सि॰ ले॰
टी॰
५४

54

विरोधात् मायिनमितिपदेन मायाया ईश्वरा
श्रितत्वप्रतीतेः जीवास्त्वविद्याप्रतिबिंबाः
जीवेशावाभासेन करोतीति श्रुतेः प्रकृता
मूलप्रकृतिः जीवेशौ प्रतिबिंबरूपौ करो
तीत्यर्थः नह्युपाधिभेदं विना प्रतिबिंबभे
दः संभवति नचैकस्मिन्नपि दर्पणेऽनेक
प्रतिबिंबदर्शनात् प्रतिबिंबभेद उपाधिभे
दव्याप्यो न भवतीति वाच्यं एकस्मिन् दर्प
णे बिंबभेदेन प्रतिबिंबभेदेऽपि मुखादिवि
वेकस्थले उपाधिभेदं विना प्रतिबिंबभे
दादर्शनात् बिंबभूतचैतन्यस्य चैकत्वात्
तस्मात् ईश्वरोपाधिमायापेक्षया भिन्नाप
वजीवोपाधिभूताऽविद्या स्वीकर्तव्या
नच मूलप्रकृतिं प्रकृत्य प्रवृत्तया जीवेशा
वाभासेन करोति मायाचाविद्याच स्वय
मेव भवतीति श्रुतौ जीवेशरूपप्रतिबिंबा
धारयोर्मायाविद्ययोः स्वयमेवत्वेन प्रकृ
त मूलप्रकृत्यात्मकत्वप्रतिपादनम् मायावि
द्ययोर्भेदपक्षे विरुध्यत इति वाच्यं मायाया वि
यदादिप्रकृतिवत् अविद्यायाश्चापि लिंग

शरीरादिप्रकृतित्वस्य वक्ष्यमाणत्वेन माया
विद्याप्रकृतित्वेनैकीकृत्यस्वयमेवैकप्र
कृत्यात्मकत्वप्रतिपादनस्याविरोधाद्विद्या
वैक्यैकवचनस्याप्यजान्यभिप्रायत्वोपपत्ते
नैतत्त्वानानात्वविरोधोपि विवेकस्थलेउपाधि
भेदं विनाप्रतिविंबभेदासंभवस्य दर्शितत्वा
त्प्रतिविंबजीवानां च नानात्वात् अदृष्टपत्वा
धिकरणभाष्येव्याकृतमीश्वराश्रयत्वस्यै
वोपाधिभूतमिति मायाया ईश्वरोपाधित्व
राश्रयत्वयोरुक्तत्वात् तथाप्यानुमानिका
धिकरणभाष्ये मुक्तानां च न पुनरुत्पत्तिः त
स्याश्चाविद्याबीजनाशकविद्ययादाहादित्यत्र
जीवनानात्वस्य तदुपाधिभूताविद्यानाना
त्वस्य च स्पष्टमभिहितत्वात् भामतीनिबंध
नेतद्भाष्यस्य जीवोपाधिभूताविद्यैकनिरा
करणतयैव व्याख्यातत्वाच्च आभासएवचे
ति सूत्रतद्भाष्ययोर्जीवानां प्रतिविंबतायाः
स्पष्टमभिहितत्वाच्च तथा च मायाविद्याभे
दः श्रुत्यादिसंमत इति येमन्यंते तेनेषां मत
मुपन्यस्यति वियदादिप्रपंचस्यादिना प्र

१
सि. ले
टी.
५५

55

वेमतेरीश्वररूपं ब्रह्मोपादानमित्युक्तंतस्य
स्यैवपरंतत्क्वचिज्जगतिजीवस्याप्युपा
दानत्वमभ्युपगंतव्यमित्यभिप्रायेणास्व
मतस्यप्रवृत्तिर्व्याख्या ईश्वराश्रितमायाप
रिणाम इति मायांतःप्रकृतिंविद्यादितिश्रु
तेरितिभावः तत्रेतिविषयदावीश्वरएव
उपादानमित्यर्थः अंतःकरणादौतुप्राह्
स्वितंविशेषंदर्शयति ईश्वरेति भूतेरुप
ष्टंभलक्षणोस्यस्पष्टत्वंभूतोपसृष्टत्वंतच्च
जीवाविद्याकृतानांभूतसूक्ष्माणांविशे
षेण भूतानांसूक्ष्मत्वंपरिच्छिन्नत्वं अतएव
वेति अंतःकरणादौजीवाविद्यापरिणा
मत्वंभूतानांतदुपष्टंभकतयामायाप
रिणाममहाभूतानांचर[illegible]राननतयाप्रवि
ष्टत्वात् अंतःकरणादिकेईश्वराश्रितमा
यापरिणामःमहाभूतोपसृष्टजीवाविद्या
कृतभूतसूक्ष्मकार्यमितितत्रोभयोरुपा
दानत्वं अतएवएवमेवास्यपरिदृष्टुरिमा
षोडशकलाःपुरुषायणाःपुरुषंप्राप्यास्तं
यांतीतिश्रुतौकलाशब्दवाच्यानांप्राणम

पा°

नः प्रभृतीनां विदुषो विदेहकैवल्यसमये
अविद्यानिवृत्त्या अविद्याकार्यांशाभिप्राये
ण विषयो देहोदर्शितः गताः कलाः पंचद
श प्रतिष्ठा इति श्रुत्यंतरे न तन्निवर्त्यमाया
कार्यमहाभूतपरिणामरूपोपष्टंभकां
शाभिप्रायेण तेषां स्वस्वप्रकृतिषु लयोद
र्शित इति मायाविद्याभेदवादिनः ॥

वेत्यर्थः यथा गंगाद्या नद्यः समुद्रं प्राप्यास्तं गच्छंति एव
मेवास्य विदुषः परितः सर्वत्रात्मानं पूर्णं पश्यतः कलाः
लिंगशरीरैकदेशभूताः पुरुषायणाः पुरुषश्चिदात्मा
श्रयनमधिष्ठानं यासां ताः पुरुषायणाः पुरुषं प्राप्या
स्तं गच्छंति पुरुषे लीयंत इत्यर्थः दर्शित इति पुरुष इ
ति शेषः प्रतिष्ठा इति द्वितीयाबहुवचने मायापरि
णामात्मकमहाभूतानीति द्वितीयाबहुवचनार्थः पं
चदश कलाः प्रतिष्ठाः प्रतिगताः तासु लीना इति याव
त् न तन्निवर्त्येति ईश्वरोपाधिभूतमायाया जीवगता
विद्यानिवर्त्यत्वाभावादिति भावः यदि कलानां जीवा
विद्यामात्रपरिणामत्वं तदा तासामशेषतः पुरुष एव
लयः स्यात् तथा च तासां भूतेषु लयप्रतिपादकवचनानि
र्विषयं स्यादतो मायाकार्यमहाभूतानामपि लिंगश
रीरोपादानत्वं वाच्यमिति तत्र उभयोरुपादानत्वेऽस्मि
न्हृदयस्थवस्यास्ति हिरेव फलमित्यर्थः न च मायायाः

१
सिं·ले
टी·
५८

56

तत्त्वज्ञाननिवर्त्यत्वाभावे मिथ्यात्वसिद्धिर्न स्यादिति वाच्यं
ब्रह्मणि सर्वेहप्रपनिषेधश्रुतिबलाद्दृश्यत्वादिलिंगै
श्च तन्मिथ्यात्वसिद्धेः न च मायायाः विद्ययानिवृत्त्यभावे
निवर्तकांतराभावात् सर्वमुक्तावपि तदनुवृत्तिप्रसं
ग इति वाच्यं महाप्रलयकाले सर्वप्राणिभोगप्रदकर्म
णामुपरमे सति ईश्वरसंकल्पमात्रादेव सर्वप्रपं
चलयवत्सर्वमुक्ति ॥

यथा वियदादिप्रपंच ईश्वराश्रितमायाप
रिणाम इति तत्रेश्वर उपादानं तथांतःक
रणादिर्जीवाश्रिताविद्यामात्रपरिणाम इ
ति तत्र जीव एवोपादानं नवांतःकरणा
दौ मायाकार्यमहाभूतानामप्यनुप्रवेश
उदाहृतश्रुतिद्वयव्यवस्थानुपपत्तेः क
लानां विद्ययोच्छेदश्रुतिस्तत्त्वविदृष्ट्या वि
षया गताः कला इति श्रुतिस्तु म्रियमाणे
तत्त्वविदि समीपवर्तिनः पुरुषानप्रपन्
घटवत्तन्नदीयशरीरादीनामपि भूम्यादि
प्रलयं मन्यंत इति तटस्थपुरुषप्रतीति
विषये इति व्यवस्थायाः कलालयापिकर
णभाष्यस्पष्टत्वात् इति मायाविद्याभेदवा
दिषकदेशिनः ॥

कालेऽतः परं स्वकार्याया मायायाः प्रयोजनं नास्तीत्यत्र तु सं
यानवत ईश्वरस्य सत्यसंकल्पस्य मायायाः स्वकार्यैः सह माये
वस्तुनश्चिदेकरसेतिः शेषं लयं यात्वित्येवंरूपादेव माया
परिणामलक्षणसंकल्पान्न लयोपपत्तेः श्रुतिस्मृतिपुरा
णादिषु तत्त्वज्ञानान्मायानिवृत्तिप्रतिपादकग्रंथजातम
विद्यानिवृत्त्यभिप्रायं यद्वा तत्त्वज्ञानमात्रमविद्याया इव
मायाया निवर्तनयोग्यमपि नानाप्राणिकर्मप्रतिबंधा
त्तस्या निवर्तकं चरममुच्यमानस्यैव तत्त्वज्ञानं प्रतिबं
धकाभावान्निवर्तकमित्यादि कल्पनीयमिति संक्षेपः
अंतःकरणादेरुभयोरुपादानत्वमसिद्धं श्रुतिद्वयव्यव
स्थाया भाष्यकारैरेवान्यथा प्रतिपादितत्वादिति मत्वा
तंत्रं दर्शयति यथा वियदादीति तत्त्वविदो दृष्टिस्तत्त्वसा
क्षात्कारः अत्र दृष्टिपदेन तत्फलभूतः कलालयो विवक्षि
तः नहि स्वयापुरुषे कलाप्रलयश्रुतिरित्यर्थः भूतेषु
कलाप्रलयवचनेन तु कलानामपि मायापरिणाममहा
भूतकार्यत्वमभ्युपगतं भ्रांतिसिद्धार्थानुवादकमिति भावः
वृत्तिभावपर्यंतो घटनाशो यथा भूमौ दृश्यते न तु तन्म
न्येत इत्यक्षरार्थः प्रतीतिविषयेति प्रतीतिरत्र भ्रांति
रूपा न हि स्वयान तद्विषयिकेत्यर्थः स्पष्टत्वादिति ता
निपरेन व्याख्यातमिति तदधिकरणसूत्रं तानि मनःप्रादी
निपरे पुरुषे निरवशेषं लीयंते तथा हि श्रुतिराह पव
मेवास्यान्या यश्रुतिर्निरवशेषं लयमाहुरिति सूत्रार्थः
अंतःकरणादीनां मायाकार्यत्वाभावे ईश्वरस्यांतःकरणा
द्युपादानत्वप्रतिपादकश्रुतिविरोध इति दोषं सूचयति

एकदेशिनउक्ति ॥

तदभेदवादिनस्त्वपि केचिद्वियदादिप्रपं
चस्येश्वरउपादाने तथाप्यंतःकरणादीनां
जीवतादात्म्यप्रतीतेर्जीवएवोपादाने अतए
वाध्यासभाष्येंतःकरणादीनांजीवएवाध्या
सोदर्शितः विवरणेचप्रतिकर्मव्यवस्थायां
ब्रह्मचैतन्यस्योपादानतयाघटादिसंगित्व
जीवस्यतदसंगित्वेप्यंतःकरणादिसंगित्व
चवर्णितमित्याहुः एतस्माज्जायतेप्राणोम
नःसर्वेंद्रियाणिचखंवायुर्ज्योतिरापश्चपृथि
वीविश्वस्यधारिणीत्यादिश्रुतेःकृत्स्नस्यव्या
वहारिकप्रपंचस्यब्रह्मैवोपादानं ॥

मायैवाविद्यासाचेश्वरस्यैवोपाधिर्जीवानांतुप्रतिबिंबरूपा
णामंतःकरणान्येवोपाधयइतिमायाविद्ययोरभेदवादि
नोपिकेचिदंतःकरणादौजीवस्यैवोपादानत्वंतद्भेदवादि
नस्त्वेवंवदंतीत्याह तदभेदवादिष्वपीति अपिशब्दःक्वचि
दंशेसर्वमतसाम्यार्थकः तत्साम्यंतथापीत्यादिनास्प
ष्टंभविष्यति ननुवियदादिप्रपंचेपिजीवएवोपादाने
किंनस्यादित्यतआह यद्यपीति ईश्वराश्रितमायापरि
णामत्वात् ईश्वरएववियदादावुपादानंनजीवइत्यर्थः
ननुमायाविद्ययोरभेदोपगमेप्यविद्यापरिणामांतःक

रणादीनामपि ईश्वराश्रितमायापरिणामत्वाविशेषादीश्व
रस्येवान्तःकरणादावपि उपादानमिति वक्तुमुचितमिति ने
त्याह तथापीत्यादिना जीवेति अहं कर्ता अहं प्राणिमि अहं
काणः अहं स्थूल इत्यादिप्रकारेणान्तःकरणादीनां शरीरान्ता
नां जीवतादात्म्यं प्रतीयते तच्चैतेषां जीवेऽध्यस्तत्वं विना न सं
भवतीति जीवस्यैव तदधिष्ठानत्वरूपमुपादानत्वं न चेश्व
रस्येत्यर्थः प्रतिकर्मव्यवस्थेति ब्रह्मणः स्वरूपचैतन्येन
सर्वदा सर्वभासकत्वरूपे सर्वज्ञत्वे उक्ते तर्हि जीवस्यापि
स्वरूपचैतन्येनैव सर्वदा सर्वद्रष्टृत्वमिति दोषप्रसक्तौ
जीवं प्रति विषयव्यवस्थाप्रतिपादकग्रंथ इत्यर्थः ब्रह्मे
ति विंबचैतन्यरूपब्रह्मणः सर्वोपादानतया घटादिना
तादात्म्यरूपः संसर्गः क्षम इत्यर्थः अविद्याया व्यापकत्वे
न तत्प्रतिविंबरूपजीवस्य व्यापकत्वेपि न घटादिभिस्तस्य
तादात्म्यमुपादानत्वाभावादन्तःकरणादिभिस्तु जी ॥

जीवस्य प्रातिभासिकस्य स्वप्नप्रपंचस्य व
कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेत्य
धिकरणे ब्रह्मणो जगदुपादानत्वेन तस्य का'
र्त्स्न्येन जगदाकारेण परिणामे विकारा ति
रेकेण ब्रह्माभावो वा एकदेशेन परिणामे नि
रवयवत्वश्रुतिविरोधो वा प्रसज्येत इति पू
र्वपक्षे आत्मनि चैवं विचित्राश्च हीति सूत्रेण

१
सि॰ ले॰
टी॰
५८

58

विवर्तवादाभिप्रायेण स्वमहिम्नि जीवात्मनि
स्वरूपानुपमर्देनानेकाकारस्वप्नप्रपंच
सृष्टिवत् ब्रह्मणि वियदादिसृष्टिरुपपद्य
त इति सिद्धान्तिनवादित्यन्वे ॥

वस्य तादात्म्यलक्षणः संसर्गोऽस्तीति प्रतिपादितं विवर
णइत्यर्थः अनेन जीवस्यान्तःकरणाद्युपादानत्वमुक्तं
भवति अन्यथा घटादिभिरिवान्तःकरणादिभिरप्युक्त
संसर्गित्वं जीवस्य न स्यादुपादानत्वाभावाविशेषादिति भा
वः अत्रान्तःकरणादिपरिणाम्युपादानभूताया अविद्या
या ईश्वराश्रितमायया सहाभेदाङ्गीकारे ईश्वरस्यैवान्तः
करणाद्युपादानत्वं वक्तुमुचितं यद्धि जीवतादात्म्यप्र
तिपत्त्यादिभिरुक्तहेतुभिः जीवस्यैवान्तःकरणाद्यु
पादानत्वं वक्तव्यं तदान्तःकरणादिपरिणामिभूताऽवि
द्यायाः जीवाश्रितत्वमीश्वराश्रितमायायाः सकाशाद्भि
न्नत्वं च वक्तव्यं कार्यात्मना परिणम्यमानप्रकृत्याश्रय
त्वातिरिक्तस्य चैतन्यगतोपादानत्वस्याभावादतो माया
विद्ययोरभेदाङ्गीकारो जीवस्यैवान्तःकरणाद्युपादा
नत्वाङ्गीकारश्च परस्परविरुद्ध इत्यस्वरसस्तदभेदवा
दीष्वपीत्यपिशब्देन सूचितः ईश्वरस्यान्तःकरणादाव
प्युपादानत्वमुपेत्यापि न स्वकार्यमात्रे उपादानत्वमा
स्तीति विशेषं वक्तुमतान्तरमवतारयति एतस्मादिति
प्रकृतादीश्वरादित्यर्थः प्रकृतित्वमेव च मत्वर्थः तथाहि

वधारणार्थः स्वप्नप्रपंचस्येत्यनेनतरस्युपादानमित्यनुषंगः
किंकृत्स्नेनब्रह्मजगदाकारेणपरिणमतेएकदेशेनवाना
द्यइत्याह तस्येति यथादध्याकारेणपरिणतस्यक्षीरस्य
पूर्वरूपात्प्रच्युतिः एवंब्रह्मणोपिस्वरूपात्प्रच्युतिःस्यादि
त्यर्थः ब्रह्मणएकदेशःपरिणमतइतिद्वितीयकल्पं
दूषयति एकदेशेनेति पूर्वं ॥

जीवएवस्वप्नद्रष्टृवत्स्वस्मिन्नीश्वरादिसर्वं
कल्पकत्वेनसर्वकारणमित्यपिकेचित्
अथमायांतुप्रकृतिंविद्यादित्यादिश्रुतेर्मा
यानारूप्यत्वरादिषतुगमाच्च मायाजग
दुपादानेप्रतीयतेकथंब्रह्मोपादाने अत्रा
हुःपदार्थतत्त्वनिर्णयकाराःब्रह्ममायाचे
त्युभयमुपादानमित्युभयश्रुत्युपपत्तिः
सत्ताजाड्यरूपोभयधर्मानुगत्युपपत्तिश्च
तत्रब्रह्मविवर्तमानतयोपादानमविद्या
परिणममानतया ॥

पक्षइति उभयथापिब्रह्मणउपादानत्वंनसंभवतीतिपू
र्वपक्षेप्राप्तेसतीत्यर्थः यदिब्रह्मणउपादानत्वंक्षीरद
ध्यादिवत्परिणामित्वरूपमभ्युपगम्यतेतदाकृत्स्न
प्रसक्त्यादिदोषःप्रसज्येतनतुतथाभ्युपगम्यतेकिंतुर
ज्ज्वादेःसर्पाद्युपादानत्ववत्विवर्तोपादानत्वंब्रह्मण

१
सि॰ ले॰
टी॰
५५

59

डपेयते ऽतो नोक्तदोषावकाश इति सिद्धांतपति आत्मनिचे
ति एकश्चकारो यथाशब्दसमानार्थः द्वितीयो वधारणार्थः
हिशब्दो हेत्वर्थस्ततश्चायमर्थः आत्मनि जीवे स्वप्नद्रष्टरि विचि
त्राः रथादिसृष्टयो जीवचैतन्यस्वरूपोपमर्दं विनैव भवंति
स्वप्नावस्थानिवृत्त्यनंतरमपि बुद्ध्यादिसाक्षितया जीवचै
तन्यस्य यथापूर्वमवस्थानात् एवं ब्रह्मणि तत्स्वरूपप्रच्यु
तिं विनैव विचित्राः वियदादिसृष्टयः संभवंति सृष्टिस्थि
तिसंहारेषु सच्चिदानंदस्वरूपेण ब्रह्मानुवृत्तेः श्रुतिसिद्ध
त्वादिति सूत्रादितिसूत्रार्थः अथ शुद्धं ब्रह्मोपादानमि
त्यादिप्रश्नोत्तृतीयं पक्षमादाय प्रतिवचनमवतारयति
जीव इति परिपूर्णश्चिदात्मा ऽविद्यया ऽवच्छेदप्रतिबिं
बभावौ विनापि प्राप्तजीवभावः सन् आत्मानमेव सर्वे
श्वरं कल्पयति प्राप्तेश्वरभावात् स्वस्मादेव गगनादिसृष्टिं
कल्पयति स्वस्य कल्पितादीश्वराद्भेदं तन्नियमत्वं च कल्प
यति तथा क्रमेण मनुष्यादिभावं कल्पयति यथा विय
दादिप्रपंचो व्यावहारिकसत्यः स्वप्नप्रपंचः प्रातिभासि
क इति पक्षे स्वप्नद्रष्टा जीव एव देवतिर्यङ्मनुष्यादिभा
वेन तन्नियंतृपरमेश्वररूपेण ततो भिन्नत्वादिरूपेण
चात्मानं कल्पयति तद्वत् तथा च स्वस्मिन्नेव सर्वप्रपंच
कल्पकत्वाज्जीवभावापन्नं ब्रह्म सर्वोपादानमिति दृष्टि
सृष्टिवादिन आहुरित्यर्थः जीवभावापन्नब्रह्मणः
सर्वोपादानत्वमित्यस्मिन्पक्षे जीवादपि कस्येश्वरस्या
भावादी ॥

श्वरस्य सर्वजीवनियंतृत्वप्रतिपादकश्रु

तिस्मृतिन्यायसूत्रभाष्यादिविरोधो बंधमोक्ष
व्यवस्थानुपपत्तिश्चेति दोषं स्त्रवयति इत्यपि
केचिदिति तथाच जीवेतिव्याप्त्यभावादीश्व
रूपमेव ब्रह्म सर्वोपादानमिति स्थितमिदा
नीं ब्रह्मलक्षणस्योपादानत्वस्यासंभवमाशं
कते अथेति श्रुतौ तथा हि मायायाः प्रकृति
त्वमवधारयति यथा मृदादिगतस्य क्षणाबा
देर्घटादावनुगमात् घटादौ मृदादेरुपादा
नत्वं तथा मायागतजाड्यस्य जगत्यनुगमा
त्तस्यास्तदुपादानत्वमिति युक्तिमप्याह मा
याजाड्यस्येति कथमिति ननु ब्रह्मण उपादा
नत्वं बहुश्रुतसूत्राद्युदाहरणेन पूर्वं दर्शितं सत्यं द
र्शितं तत्तु न संभवति निरवयवस्य तस्य मृ
दादेरिव परिणाम्युपादानत्वासंभवात् न च
विवर्तोपादानत्वं निरवयवस्यापि संभवति
गगनादौ नैल्याद्यारोपदर्शनादिति वाच्यं
परिणामित्वविवर्ताधिष्ठानत्वयोर्लोक उपा
दानत्वप्रसिद्ध्यभावेन तत्रोपादानत्वाभ्युप
गमस्य परिभाषामात्रत्वादित्याक्षेपाभिप्रायः
उपादानत्वघटितब्रह्मलक्षणस्यासंभवंति

सि॰ ले॰ टी॰

60

राचष्टे अत्राद्वैरित्यादिना मन्त्रेणेति न च वाध्यायो
गपस्वरूपभूतायास्तस्याः ब्रह्मस्वरूपत्वात्तता
यास्तद्धर्मत्वोक्तिरयुक्तेति वाच्यं राहोः शिर इति
वत् भेदकल्पनया तद्धर्मत्वव्यवहारोपपत्तेरि
ति भावः ननु उपादानद्वयं व्यर्थमिति नेत्याह न
चेति यद्यपि निरवयवस्य ब्रह्मण उपादानत्वमनु
पपन्नमिति नेत्याह न चेति मायाब्रह्मणोर्म
ध्ये इत्यर्थः आक्षेपाभिप्रायमनूद्य निराचष्टे न
चेति मृदादिषु प्रसिद्धस्योपादानलक्षणस्यावि
वर्ताधिष्ठानेष्वपि सत्वात् नेष्टूपादानत्वाभ्युप
गमस्य पारिभाषिकमात्रत्वं नास्तीत्यर्थः स्वात्म
नीति अत्र स्वशब्द उपादानत्वाभिमतवस्तुपरः
तथा च कार्याधारत्वे सति कार्यजनिहेतुत्वमु
पादानत्वं निमित्तकारणवारणाय सत्यन्तं भू
तलादेरपि कार्याधारत्वेन तद्वारणाय विशेष्यं
तत्रापीति विवर्ताधिष्ठानेपीत्यर्थः उक्तमेवे
ति प्रपंचे उभयोरपि मायाब्रह्मणोरुपादानत्वे
तत्र च [illegible] न च विवर्ताधिष्ठाने पारिभाषिकमु
पादानत्वं स्वात्मनि कार्यजनिहेतुत्वस्योपा
दानलक्षणस्य ॥

तत्राप्यविशेषादिति केचित् उक्तामेव प्रक्रि
यामभ्युपगम्य विवर्तपरिणामोपादान
द्वयसाधारणमन्यल्लक्षणमाहुः स्वाभिन्नका
र्यजनकत्वमुपादानत्वं भ्रान्तिवत् प्रपंचस्य स
द्रूपेण ब्रह्मणा विवर्तमानेन जडेनाज्ञानेन
परिणामिना चाभेदः सन् घटः जडो घट इ
ति सामानाधिकरण्यानुभवात् ॥

परिणामितया मायाया उपादानत्वं अधिष्ठानतया च ब्र
ह्मण उपादानत्वं उभयोरुपादानत्वे भ्रान्तिन्यायययोरुपप
त्तिश्चेत्यर्थः स्वाभिन्नेति स्वशब्देन घटाद्युपादानमृदादि
जगत्परिणाम्युपादानभूतमज्ञानं जगत् विवर्तोपादा
नभूतं ब्रह्म च गृह्यते तेन घटादेर्मृदादेस्सकाशादभेदः
स्फुटः सदेव घट इत्यनुभवात् अज्ञाने ब्रह्मणि च कार्या
भेदमनुभवेन दर्शयति भ्रान्तिश्चेति ननु सद्घट इति व
त् ब्रह्म घटः ब्रह्म पटः इत्यनुभवो नास्ति तथा अज्ञानं घ
टश्चेत्यनुभवोऽपि नास्ति अतः प्रपंचस्याज्ञानेन ब्रह्मणा
च कथमभेदोऽस्तीति शंकानिरासाय ब्रह्मणः सद्रूपत्वं
विशेषणादने अज्ञानस्य जडत्वं तथा च ब्रह्माज्ञानाभ्यां
सह ब्रह्मत्वाज्ञानत्वाकारेणाभेदानुभवाभावेऽपि सत्व
जडत्वरूपेण ताभ्यां सह प्रपंचस्याभेदानुभवोऽस्तीत्या
ह सन् घट इत्यादिना ननु घटोत्पत्तेः पूर्वं तत्कारणद्र
व्यस्य सत्त्वानुभवात् सत्त्वस्य कारणधर्मत्वे सिद्धे सति स्व

१
सि॰ ले॰
टी॰
६२

61

द्घटइतिप्रत्यक्षानुभवः कार्यकारणद्रव्ययोरभेदावगाही
त्युक्तं सत्त्वजडत्वयोस्तु कारणधर्मत्वे किं मानं येन स
न् घटः जडो घट इत्यनुभवबलेन सद्रूपजडरूपाभ्यां ब्रह्मा
ज्ञानाभ्यां प्रपंचस्याभेदः सिद्ध्येदिति चेदुच्यते ब्रह्मणः स
द्रूपत्वं सदेवेत्यादिश्रुतिसिद्धं तदेतज्जडमोहात्मकमिति
श्रुत्याऽज्ञानस्य जडत्वं सिद्धं तथाच घटादौ मृद्द्रव्याभे
दात् मृत्त्वानुभववत् सत्त्वादिरूपकारणद्रव्याभेदा
देव प्रपंचे सत्त्वजडत्वानुभवोपपत्तेः पृथक् सत्त्वादि
धर्मो नोपेयते तथाच सन्घटो जडो घट इत्याद्यनुभवो
पि कार्यकारणद्रव्याभेदावगाहीति ॥

न च तदनन्यत्वमारम्भणशब्दादिभ्य इति सू
त्रेष्वनन्यत्वं व्यतिरेकेणाभावः न त्वैक्यमनन्य
त्वमित्यभेदभ्रमः किन्तु भेदव्यासेधमात्रमिति
भाष्यभामतीनिबन्धाभ्यां प्रपंचस्य ब्रह्माभे
दनिषेधादभेदाभ्युपगमे अपसिद्धान्त इति वा
च्यं तयोर्ब्रह्मरूपधर्मिसमानसत्ताकाभेद
निषेधेनाप्यर्थेणोदरजतयोरिवप्रातीती
काभेदाभ्युपगमेपि विरोधाभावादिति ॥

भावः न च जडरूपाज्ञानस्य प्रपंचाभेदसिद्धावपि माया
याः किं मायातमिति वाच्यं तयोरभेदाभ्युपगमादिति

भावः कार्यकारणयोरभेदाभ्युपगमेऽपसिद्धांतं शंकते
नचेति तयोः कार्यकारणयोरनन्यत्वमुपगंतव्यं कुतः
आरंभणशब्दादिभ्यः वाचारंभणमित्यारंभणशब्दा
र्थः आत्मैवेदं सर्वमित्यादिसार्वात्म्यप्रतिपादकश्रुति
र्नेह नानास्ति किंचनेत्यादिनिषेधश्रुतिश्चादिशब्दार्थः
वाचारंभणश्रुतिर्विवर्तलक्षणकथनावसरे व्याख्या
ता कार्यस्य कारणानत्वांतरत्वे जगत्कारणस्य ब्रह्मणः
सर्वात्मकत्वश्रुतिरनुपपन्ना स्यात् तथा ब्रह्मोपाद
नकस्य जगतः सत्यत्वे ब्रह्मणि जगन्निषेधो न स्याद
तः कारणीभूतब्रह्मानन्यत्वं प्रपंचस्याभ्युपगंतव्य
मिति भावः ननु सोऽज्ञानन्यत्वपदेन कार्यकारणयो
रैक्यं प्रतीयते तदनुपपन्नं कार्यकारणभावविरोधा
च्चिज्जडयोर्ब्रह्मप्रपंचयोरैक्यायोगाच्चेति शंकां निराक
र्तुं सोऽज्ञानन्यत्वपदं व्याचष्टे भाष्यकारः अनन्यत्वं व्य
तिरेकेणाभाव इति न च कारणव्यतिरेकेण कार्यस्याभा
वे कथं कार्यकारणभाव इति वाच्यं कारणसत्वव्यतिरे
केण कार्यसत्वाभावस्य विवक्षिततया कार्यस्वरूपा
पलापशंकानवकाशात् सोऽज्ञानन्यत्वपदतात्पर्य
प्रदर्शकं भामतीनिवेदनवाक्यमुदाहरति नखल्व
ति अनन्यत्वमिति पदेन कार्यकारणयोरभेदं ब्रूमः
चेतनाचेतनयोरभेदानुपपत्तिस्तन्निषेधहेतुः खलु
शब्देन द्योत्यते नहि कारणब्रह्मविज्ञानात्सर्वविज्ञा
नं श्रुतिसिद्धं न भवेत् अभेदानभ्युपगमादिति शंकते
किं त्विति परिहरति भेदमिति कार्यकारणयोः सत्व

भेदंवासेधामइत्यर्थः तथाचकारणब्रह्मस्वरूपभूतंसत्व
मेवकार्यस्यवास्तवंस्वरूपमिति तस्मिन्विदितेतद्व्य
तिरिक्तंसर्वंतत्वतोविदितंभव ॥

तीतिनैकविज्ञानेनसर्वविज्ञानप्रतिज्ञावि
रोधः नचब्रह्मस्वरूपज्ञानेनसर्वप्रपंच
स्यवास्तवस्वरूपेविदितेपितत्तदसाधार
णरूपज्ञानासंभवात्प्रतिज्ञाविरोधस्तद
वस्थएवेतिवाच्यं आत्मनिविदितेसर्ववि
दितंभवतीत्यादिप्रतिज्ञावाक्येषुसर्वपद
स्यसर्वतत्वपरत्वेनतत्तदसाधारणरूपेणास
र्वज्ञानस्याविवक्षितत्वात् नचतथाकल्प
नायांकिंविनिगमकमितिवाच्यं सर्वप्रपंच
तत्वज्ञानमात्रेणाद्वितीयब्रह्मज्ञानस्यमुक्ति
साधनस्यलाभेनतत्तदसाधारणरूपज्ञान
नैष्फल्यस्यैवविनिगमकत्वात्कारणब्रह्म
णिविदितेपिसर्वप्रपंचगततत्तदसाधार
णरूपज्ञानस्यासंभवेनसर्वविज्ञानश्रुते
स्तत्परत्वेप्रामाण्याभावप्रसंगाच्चभेददर्शी
नस्यानर्थहेतुतयाश्रुतिषुतत्रतत्रकीर्तिदि
ततत्वाच्चप्रतिज्ञाश्रुतेर्नानारूपज्ञानेनास

यं ननु रूपं प्रपंचदर्शनं गृहीतेभिमुखीकर्तुमेवा
द्वैकस्य बोधयतः सर्वबोधः कृतो नैव नानात्व
स्याविवक्षयेति प्रश्नार्थः अत्र वेदान्तेष्वेक
स्य ब्रह्मणो बोधेन सर्वस्य प्रपंचस्य बोधः
गृहीते ब्रह्मणि मुमुक्षुमभिमुखीकर्तुमे
व मुमुक्षोरद्वितीयब्रह्मबोधार्थमेव श्रुतेः
र्थः अद्वितीयब्रह्मबोधश्च सर्वस्य ब्रह्मै
वात्मत्वस्वरूपमिति ज्ञानमात्रात् सिध्य
तीति भावः ननु ब्रह्मणि विदिते सर्वं विदि
तं भवतीति श्रुतौ स्वरसतः प्रतीयमानं तत्त
त्साधारणरूपेण सर्वज्ञानमेव श्रुत्यर्थः
किं न स्यादिति तत्राह नैवेति नानात्वबोध
विवक्षया सर्वबोधो नैव कृतः इति योजना
प्रयोजनाभावात् बाधितत्वात् विदितबाध्य
तितयोरिति भाष्यभामतीति ग्रंथयोरित्य
र्थः न च प्रपंचब्रह्मणोर्वास्तवाभेदनिषेधे
सति वास्तवभेदः स्यादिति वाच्यं भेदस्य वा
स्तवत्वेऽद्वितीयमिति प्रतियोगिनो वास्तवत्वाप
त्ते न तत्र ब्रह्मणो वास्तवत्वेऽपि प्रपंचस्याचार
म्भणाद्वाद्वादिभ्यो मिथ्यात्वावगमेन तयोर्भे

१
सि॰ले॰
टी॰
६३

दस्य सत्यत्वायोगादिति भावः । भ्रान्तीति । केति
यथा इदं रजतमिति भ्रान्तिसिद्धं रजतेदमर्थ
योरभिन्नत्वं तथा सन् घट इत्यादिभ्रान्तिसि
द्धाभेदोपगमे सिद्धान्तविरोधाभावादिति भा
वः । मायां तु प्रकृतिं विद्यादिति श्रुत्या अव
धारणार्थकतुशब्दवत्या मायाया एवोपा
दानत्वावगमात् संक्षेपशारीरककृतस्तु ब्रह्मै
वोपादानं कूटस्थस्य स्वतः कारणत्वानुप
पत्तेर्मायाद्वारकारणं अकारणमपि कार्ये
ऽनुगच्छति मृद इव तन्तुगतश्लक्ष्णत्वादेरपि प
टेऽनुगमदर्शनादित्याहुः ॥

मेन ब्रह्मण उपादानत्वाभावादुपादानत्वं चेदि न ब्रह्मल
क्षणस्यासंभवशंकायास्तस्या मायाब्रह्मणोरुभयोरपि
प्रकृतित्वमस्ति श्रुतिस्मृत्योरविशेषान्मायां त्विति श्रुतौ
तुशब्दो नावधारणार्थः किंतु सद्रूपब्रह्मापेक्षया मायाया
वैलक्षण्यद्योतनार्थः न च वैलक्षण्यं परिणामित्वरूपं
प्रकृतित्वं मायाया अप्याशयवतां पदार्थतत्त्वनिर्णयका
रादीनां मतभेदेन लक्षणासंभवशंकापरिहृता इदा
नीं ब्रह्मैवोपादानं न मायाप्यतो न लक्षणासंभवशंका
वकाश इति मन्यमानानां मतद्वयमाह संक्षेपशारीरक
कृतस्त्वित्यादिना तर्हि व्यर्था मायेति नेत्याह कूटस्थस्ये

ति यदि मायां विनैव ब्रह्मोपादानं स्यात्तदा ब्रह्मणः स्वतः
परिणामित्वमेव स्यात् तथा च परिणामवादिभिः प
रिणामपरिणामिनोर्वास्तवाभेदाभ्युपगमात् परिणा
मस्य जन्मादिविकारैर्ब्रह्मणोऽपि विकारवदेव स्यान्न चेष्टा
पत्तिरेवं वक्तुं शक्यते न जायत इत्यादिबहुश्रुतिषु ब्र
ह्मणो जन्मादिविकाररहितत्वरूपकूटस्थत्वप्रतिपाद
नविरोधात्ततो मायाद्वारा ब्रह्मणः कारणत्वं वक्तव्यमि
ति न व्यर्था मायेत्यर्थः यथा मृदः स्वत उपादानत्वेऽपि न
क्रनस्त्वलनादिसंस्कारो द्वारकारणं न त्वसंस्कृतस्य
मृदः स्वतः घटाद्युपादानत्वं घटते तथा कूटस्थचैतन्य
रूपे ब्रह्मणि समारोपिता मायात्र जगत्प्रकृतित्वं घट
यंती सहकारिकारणमुपेयत इति भावः न च माया
या उपादानत्वाभावे मायां तु प्रकृतिं विद्यादिति श्रुतिवि
रोध इति वाच्यं ब्रह्मगतप्रकृतित्वनिर्वाहकतामात्रेण
तस्याः प्रकृतित्वश्रुत्युपपत्तेर्मायायाः प्रकृतित्वं निर्वाह
कत्वमात्रेण स्वतः प्रकृतित्वमस्तीत्यभिप्रायेणैव तस्याः श
क्तित्वव्यवहारः श्रुतौ दृश्यते पराऽस्य शक्तिर्विविधैव श्रू
यत इति न हि मृदादिपदार्थगतशक्तेः किं विकार्यं प्र
त्युपादानत्वं ॥

वाचस्पतिमिश्रास्तु जीवाश्रितमायाविष
यीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपंचा
कारेण विवर्तमानतयोपादानमिति माया
सहकारिमात्रेण कार्यानुगतद्वारकारणमि
त्याहुः ॥

१ सि॰ ले॰ टी॰ ६४

65

प्रसिद्धं लोके श्रुत एव विनिगमकाभावान्माया ब्रह्मणोरुभ
योरप्युपादानत्वमिति निरस्तं मायायाः ब्रह्मशक्तित्वेन
स्वतउपादानत्वासंभवान्न च तस्याः प्रकृतित्वानुपगमे
जगतः परिणाम्युपादानं न स्यात् ब्रह्मणः परिणामिता
याः कूटस्थत्वविरोधेनासंकृत्वस्तुकृत्वादिति वाच्यं वाच
स्पतिमतेश्च प्रपंचस्य चिदध्यस्तमायाविषयीकृत
ब्रह्मविवर्तत्वमात्राङ्गीकारोपपत्तेः न च संक्षेपशारी
रकग्रन्थे तत्र तत्र मायायाः परिणामित्वव्यवहारवि
रोध इति वाच्यं तस्य व्यवहारस्य मतान्तराभिप्रायत्वो
पपत्तेः ननु जडभूतमायाप्रकृतिकत्वाभावे प्रपंच
स्य जाड्यं न स्यादिति नेत्याह अकारणमपीति अनुपा
दानमपीत्यर्थः जगत्यनुगतं जाड्यं न कारणगुणः किं
तु जगत एव स्वाभाविकमतस्तत्सिद्धये मायाया उपादा
नत्वं कार्यानुगतद्वारकारणत्वं वा न कल्पनीयमित्या
भिप्रायेनाह वाचस्पतिमिश्रास्त्विति जीवाश्रितेति नन्वद्व
यब्रह्मणि आकाशशाद्विताया मायायाः तन्नित्यचैतन्या
श्रितत्वस्य प्रतिपादितत्वात् कथं तस्या जीवाश्रितत्वमु
पेयते मायिनं तु महेश्वरमिति श्रुतिविरोधाच्च अत्र मा
यिनामि अक्षरशाद्वित्यनेन महेश्वरशाद्वितब्रह्माश्रित
त्वप्रतिपादनात् किं च जीवस्य मायाश्रयत्वेन तस्यैव ज
गदुपादानत्वं स्यात् प्रपंचस्य मायापरिणामत्वात् प्रपं
चपरिणामिमायाश्रयत्वे हि ब्रह्मणः प्रपंचोपादानत्वं
जीवस्य मायाश्रयत्वे तु तस्यैव जगदुपादानत्वं स्यान्न
ब्रह्मणः किं च जीवाश्रितमायाविषयीकृतं ब्रह्मेति

मतेब्रह्मण उपाध्यनंगीकारेण नियंतृत्वजगत्कर्तृत्वादे
रभावप्रसंगाच्चेति चेत् उच्यते जीवाश्रितेतिपदेन जीवत्व
विशिष्टचैतन्याश्रितत्वं विवक्षितं न भवति किंत्वक्षरखा
ल्लणाद्वरोधेन नचैतन्याश्रितत्वमेव जीवत्वं तु मायापदवे
दनीयाविद्यायाश्चैतन्ये हृतो श्रवच्छेदकमिति जीवाश्रित
मायेत्युच्यते नचजीवत्वस्यापि चैतन्ये हृतो मायैवावच्छे
दकावाच्येति परस्पराश्रयप्रसंग इति वाच्यं द्रव्यत्वगुण
श्रयत्वयोरिव परस्परस्थितिप्रयोजकतया परस्परापे
क्षत्वलक्षणपरस्पराश्रयत्वस्यादोषत्वात् परस्पराश्रयो

त्पत्तौ ज्ञप्तौ वा दोषो भवेत् सच प्रकृते ना
स्त्यविद्याजीवत्वयोरनादित्वान्नित्यसाक्षि
भास्यत्वाच्च नचजीवत्वस्याविद्यास्थितिप्रति
बन्धनियामकत्वकल्पनं व्यर्थमिति वाच्यं ब्रह्म
णि तस्याः स्थितिनिवारकत्वान्निरवद्यं निरं
जनमिति श्रुत्या ब्रह्मणो निर्दोषत्वावगमेन
तस्याविद्यारूपदोषाश्रयत्वानुपपत्तेः नच
वस्तुतो निर्दोषत्वपराश्रुतिरिति वाच्यं तथा
संकोचे मानाभावादीश्वररूपब्रह्मवज्जीव
स्यापि वस्तुतो निर्दोषत्वाच्च नच मायिनं तु
महेश्वरमिति श्रुतिविरोधः गृहीयतीदेव

१
सि॰ ले॰
टी॰
६५

65

दत्तइत्यादौदेवदत्तस्यगृहाद्याश्रयत्वाभावेपि
प्रत्ययस्यस्वस्वामिभावलक्षणसंबंधेनाव
बोधकत्ववत् महेश्वरशब्दितब्रह्मणोमाया
श्रयत्वाभावेपिमायाब्रह्मणोर्विषयविषयि
भावलक्षणसंबंधेनावबोधकतयामायि
नमितिसुष्ठूपपत्तेः प्रपंचस्यजीवाश्रित
मायाविषयीकृतब्रह्मविवर्तत्वमात्राभ्यु
पगमात्तुजीवस्यजगदुपादानत्वप्रसंगः
ब्रह्मणउपाध्यभावेपिसर्वनियंतृत्वसर्व
ज्ञत्वादिप्रतिपादकशास्त्रस्यकसत्वाच्च न
स्मात्सिद्धंजीवाश्रितमायाविषयीकृतंब्रह्म
प्रपंचाकारेणविवर्तमानतयाउपादानमि
ति उक्तंवाचारंभणाधिकरणभाष्ये मूलका
रणमेवात्मनाकार्यात्तेनकार्याकारेणनटव
त्सर्वव्यवहारास्पदत्वंप्रतिपद्यतइति मृत्सा
कार्यादीति श्रुत्यकार्यपर्यंतमित्यर्थः नटो
हिदृष्टाभिरविज्ञातनिजरूपएवतत्तदभि
नेयास्वरूपतोप्रतिपद्यते एवंजीवैरवि
ज्ञाततत्वैस्सहस्रात्मत्वविपर्यादिप्रपंचाका
रेणैतद्व्यवहारविषयतेनावप्रतिपाद्य

त इति भाष्यार्थः अतत्त्वतोऽन्यथा वावस
तिमते भाष्याभिमते निश्चीयते तदुक्तं कल्प
तरौ अज्ञानतत्त्वतब्रह्मकारणं शाकरो ब्रवी
त् जीवाज्ञाते जगद्बीजं जगौ वाचस्पतिस्तथे
ति सिद्धान्तमुक्तावलीकृतस्तु मायाशक्तिरे
वोपादानं न ब्रह्म तेदं न ब्रह्मापूर्वमनपरमं
बाह्यं न तस्य कार्यं करणं च विद्यते इत्यादिश्रु
तेः जगदुपादानमायाधिष्ठानत्वेन तदुपचा
रादुपादानं नाटयामेवोपादानत्वलक्षणे
विवक्षितमित्याहुः अथ कईश्वरः को वा जी
वः अत्रोक्तं प्रकटार्थकारविवरणे अनादिर
निर्वाच्या भूतप्रकृतिश्चिन्मात्रसंबन्धिनी मा
या तस्यां चित्प्रतिबिम्ब ईश्वरः तस्या एव परि
च्छिन्नानन्तप्रदेशेष्वावरणविक्षेपशक्तिमद
विद्याभिधानेषु चित्प्रतिबिम्बो जीव इति ॥

इदानीं मायाया एव मायां तु प्रकृतिं विद्यादिति श्रुतिस्वार
स्यानुरोधेन मुख्यमुपादानत्वमिति स्वीकृत्यापि ब्रह्मलक्ष
णासंभवं परिहरति सिद्धान्तमुक्तावलीकृतस्त्विति तस्य
कृते एतद्ध्यादिसाधित्रूपं पूर्वकारणं न विद्यते यस्य तद
पूर्वं अपरं कार्यं न विद्यते यस्य तदनपरं तस्य ब्रह्मणः कार्यं

१
सि॰ले॰
टी॰
६६

66

करणं च जगत्सृष्टिसाधनं चेत्यर्थः इत्यादिश्रुतेर्न ब्रह्मोपा
दानमित्यर्थः तर्हि ब्रह्मणो जगदुपादानत्वप्रतिपादकश्रु
तिसूत्रभाष्यादिविरोध इत्यत आह जगदिति तशाहीवया
रणो तशाहीवयारणो नाहशामेवेति जगदुपादानमायाधि
ष्ठानत्वमित्यर्थः पूर्वत्रेश्वरस्य जगदुपादानत्वमुक्तं जी
वाश्रितमायेत्यादौ जीवोपिश्ववदुक्त इदानीं तयोः स्वरूपं
निरूपयितुं प्रसङ्गमवतारयति श्रुत्येति मायां तु प्रकृतिं वि
ति श्रुतौ याभूतप्रकृतित्वेन माया प्रसिद्धा तस्यां चैतन्यप्र
तिबिंब ईश्वरः ननु मायिनं तु महेश्वरमिति वाक्यशेषे
मायाया ईश्वराश्रितत्वप्रतिपादनादीश्वरस्य मायाप्रति
बिंबत्वं न संभवति उपाधेः प्रतिबिंबाश्रितत्वादर्शनादि
ति शंकां निराचष्टे चिन्मात्राश्रितेत्यर्थः मात्रपदेन बिंब
त्वादेर्व्यवच्छेदः वाक्यशेषेपि महेश्वरपदं चिन्मात्रलक्ष
कमिति भावः सांख्याभिमतप्रकृतेरिव मायायाः सत्यत्वं
वारयति अनिर्वाच्येति मायातावद्ब्रह्मचैतन्यान्न वस्तु
तो भिन्ना ब्रह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वप्रतिपादक
श्रुतिविरोधेन वस्तुतः तस्यास्ततो भेदासंभवात् नाप्यभि
न्ना चैतन्यजडयोरैक्यायोगात् नापि चैतन्याद्भिन्नाभिन्ना
एकत्र भिन्नत्वाभिन्नत्वयोर्विरोधेनासंभवात् एवं न ताव
न्मा ॥

यासती अद्वैतश्रुतिविरोधादेव नाप्यसती
भूतप्रकृतित्वानुपपत्तेः नापि सदसती स
त्वासत्त्वयोरेकत्रविरोधादेव न तावन्माया

सावयवा तस्यास्सादित्वप्रसंगेन नतस्वतिवि
वभूनेश्वरस्यापिसादित्वप्रसंगात् मायायाः
सादित्वेनतत्प्रकृतित्वेनमायांतरापेक्षयाप्र
नवस्थाप्रसंगाच्च नापिनिरवयवाप्रकृति
त्वाभावप्रसंगात्सावयवपदार्थानामेवलो
केप्रकृतित्वदर्शनात् नाप्युभयरूपासाव
यवत्वनिरवयवत्वयोरेकत्रविरोधात् तस्मा
त्सर्वप्रकारेणानिर्वक्तुमशक्यतयामायाप्र
तिबोध्यत्यर्थः तस्याःपरिछिन्नात्वेनतत्प्रदेशो
पेवेतत्प्रतिबिंबोजीवः नसातानस्यामेव
विस्प्रतिबिंबोजीवइत्येवकारार्थः प्रदेशांतो
परिछिन्नत्वविशेषणांतस्मातिबिंबरूपजीवा
नोपरिछिन्नत्वलाभार्थं तथाचभाष्येतत्र
त्रजीवानोपरिछिन्नत्वनिरूपणंसंगछते
तथाहि सर्वत्रप्रसिद्धोपदेशादित्यधिकरणे
सोत्रशारीरपदव्याख्यानरूपभाष्येशारीर
इतिशारीरेभवइत्यर्थः नन्वीश्वरोपिशरीरे
भवतिसर्वस्यशरीरेभवतिनतुशरीरएवभ
वति आकाशवत्सर्वगतस्यनित्यइतिव्यापि
त्वश्रवणात् जीवस्तुशरीरएवभवतितस्य

१
सि· ले·
टी·
६७

67

भोगाधिष्ठानाच्छरीरादन्यत्र तदभावादिति
तथा द्युभ्वाद्यधिकरणगतं भाष्यं न चोपाधि
परिच्छिन्नस्याविभोः प्राणभृतो द्युभ्वाद्याय
तनत्वं सम्यक् संभवतीति प्राणभृतो जीवस्य
द्युभ्वादिप्राहितजगदायतनत्वं मुख्येन संभ
वति अविभुत्वादिति भाष्यार्थः पटस्यारंभ
कतंतुवदिव मायाया न प्रदेशाः संति तस्या अ
नादित्वात् किंतु मायायां विक्षेपावरणश
क्तीनामानंत्याद्धि विक्षेपावरणशक्तिमज्ञाना
एव प्रदेशा विवक्षिता इत्याशयेनाह आ
वरणविक्षेपशक्तिमदिति ब्रह्मचैतन्या
वरणानुकूलाशक्तिरावरणशक्तिः आव
रणं च ब्रह्म नास्ति न प्रकाशत इति व्यव
हारयोग्यत्वं विक्षेपपदेन तत्तज्जीवसाधा
रणदुःखादिकं विवक्षितं तेन तदनुकूलशक्ति
विक्षेपशक्तिरित्यर्थः ननु मायाप्रदेशा
नां जीवोपाधित्ववर्णनमनुपपन्नं आ
नुमानिकाधिकरणभाष्ये ह्यविद्याया
जीवोपाधित्वव्यवहारविरोधप्रसंगा
दत आह अविद्याभिधानेऽपीति ॥

मायाप्रदेशानामेवमाश्रयणात्तविद्यापदाभि
लप्यत्वान्नतद्विरोध इति भावः तत्त्वविवेके
तत्रिगुणात्मिकाया मूलप्रकृतेर्जीवेशावा
भासेन करोति मायाचाविद्याच स्वयमेव भव
तीतिश्रुतिसिद्धौ द्वौ रूपभेदौ रजस्तमोनभि
भूतशुद्धसत्त्वप्रधाना माया तदभिभूतमलि
नसत्त्वात्त्वविद्येति मायाविद्याभेदं परिकल्प्य
मायाप्रतिबिंब ईश्वरोविद्याप्रतिबिंबोजीव इ
त्युक्ते एकैव मूलप्रकृतिर्विक्षेपप्राधान्येन मा
याशब्दितेश्वरोपाधिः आवरणप्राधान्येनावि
द्याशब्दिता जीवोपाधिः अत एव तस्मा
जीवेश्वरसाधारणचिन्मात्रमेवोपिवोपिजीव
स्येवाज्ञोस्मीत्यज्ञानमेवं यथानुभवो नेश्वरस्ये
ति जीवेश्वरविभागः क्वचिदुपपादितः ॥

एकस्यामेव मूलप्रकृतौ प्रदेशप्रदेशिभावेनानिर्वचनीयं
भेदं कल्पयित्वा जीवेश्वरयोः प्रतिबिंबरूपत्वमुक्तं इदनीत
स्यामेव प्रकारांतरेण रूपभेदं कल्पयित्वा तदुपपादयति
तत्त्वविवेकेति भेदकल्पनावैलक्षण्यद्योतनार्थस्तुशब्दः
रूपभेदावितिस्त इति शेषः रजस्तमोनभिभूतत्वमेव सत्त्व
स्यशुद्धत्वं शुद्धसत्त्वप्रधाना प्रकृतिर्मीया मलिनसत्त्वप्र

यानाप्रकृतिरविद्येत्यर्थः रजस्तमोभिभूतत्वमेवसत्वस्यम
लिनत्वं सत्वशुद्ध्यशुद्धिभ्यां मायात्वाविद्यात्वाख्यौ अस्तुकृतरू
पभेदौ निरूप्य विक्षेपावरणशक्तिभेदेन अस्तुकृतरूपभेदा
वेव निरूपयति एकैवेति अत एवेति जीवस्यावरणश
क्तिमदुपाधिमत्वादेवेत्यर्थः तस्मा इति जीवेश्वरोपाधिभू
तायाः प्रकृतेः प्रतिविंवरूपजीवेश्वरसाधारणविंवचैत
न्याश्रितत्वेपीत्यर्थः नेश्वरस्येति अत्रापि अत एवेत्यस्या
नुषंगः आवरणशक्तेरीश्वरोपाधिकोटावननुप्रवेश
देवेति तदर्थः तथाच जीवेश्वरौ प्रति प्रकृतेः साधारण
त्वादेकस्य सर्वज्ञत्वमपरस्याज्ञत्वमिति यद्वैलक्षण्यं अ
त्यनुभवसिद्धं तत्कथं संभवतीति शंकाया अनवकाश
इति भावः मतांतरमाह संक्षेपेति अन्तःकारणपदम
विद्यापरं कार्यपदमंतःकरणपरमिति मत्वा प्राह अवि
द्यायामित्यादिना ननु जीवेशावाभासेन करोति माया चा
विद्या च स्वयमेव भवतीति श्रुतिविरोधः तस्यां श्रुतौ जीव
स्य कारणोपाधिकत्वप्रतीतेरिति चेदुच्यते जीवेशावाभा
सेन करोतीति पूर्वभागेन हि जीवेश्वरयोरुभयोरपि प्रति

संक्षेपशारीरके तु कार्योपाधिरयं जीवः का
रणोपाधिरीश्वर इति श्रुतिमनुसृत्याविद्या
यां चित्प्रतिविंव ईश्वरः अंतःकरणे चित्प्र
तिविंवो जीवः न चांतःकरणरूपेण द्रव्येण
घटेनाकाशस्येव चैतन्यस्यावच्छेदसंभवात्

दवच्छिन्नमेव चैतन्यं जीवो भवतीति वाच्यं इहप
रत्वजीवभावेनावच्छेद्यचैतन्यप्रदेशस्य
भेदेन कृतहानाकृताभ्यागमप्रसंगात् प्र
तिविंबवत्तूपाधेर्गतागतयोरवच्छेदकगता
गतयोरवच्छेद्यवत्तभिद्यत इति प्रतिविंब
पक्षेनायंदोषइत्युक्तं ॥

विंबभावः प्रतीयते नचविंबैकस्थलेउपाधिभेदं विना
प्रतिविंबभेदः संभवति सूर्यादिप्रतिविंबस्थलेउपाधि
भेदं विना प्रतिविंबभेदादर्शनात् तथाचोदाहृतश्रुतौ प्र
तिविंबरूपयोर्जीवेशयोर्यथाक्रमं मायाविद्यापदाभ्या
मुपाधीसमर्थीते मायापदं चात्र मायाकार्यांतःकरणप
रं नचैवं मूलाप्रकृतिं प्रकृत्यप्रवृत्तायां जीवेशावितिश्रु
तौ माया चाविद्या च स्वयमेव भवतीतिवाक्येन मायावि
द्ययोरुभयोरपि मूलप्रकृत्यभेदोपपादनविरोध इति
वाच्यं मूलप्रकृत्यविद्ययोरिव मायाशब्दितांतःकरण
मूलप्रकृत्योर्मुख्याभेदाभावेपि प्रकृतिविकारभावप्र
युक्ताभेदसत्त्वेन तावता माया चाविद्या च स्वयमेव भव
तीतिवाक्यशेषोपपत्तेरिति भावः नचाविद्यावच्छिन्न
चैतन्यमेवेश्वरोस्तु तथांतःकरणावच्छिन्नचैतन्यमेव
जीवोस्तु अविद्यांतःकरणाधिष्ठानचैतन्ययोः तदवच्छि
न्नस्यस्वरूपत्वात्तदतिरिक्तप्रतिविंबकल्पनायां गौर
वाच्चेत्याशयेन शंकते नचेति तत्र प्रतिविंबचैतन्यमि

१
सि॰ ले॰
टी॰
८५

69

न्येव कारणार्थः जीवग्रहणमीश्वरस्याप्युपलक्षणं जीवेश्व
रयोः प्रतिबिंबतायाः श्रुतिसिद्धत्वान्न कल्पनागौरवदो
षोस्तीत्यभिप्रेत्य जीवस्यावच्छिन्नत्वपक्षे दोषमाह इहेति
अस्मिन् लोके ब्राह्मणादिशरीरगतांतःकरणावच्छिन्न
चैतन्यप्रदेशस्य कर्मकर्तृत्वात् लोकांतरे देवादिशरीर
गतांतःकरणावच्छिन्नचैतन्यप्रदेशस्य चाकर्तृभोक्तृ
त्वात् कृतहानादिप्रसंगः येन कर्म कृतं न तस्य भोगः ये
न कर्म न कृतं तस्याकृतकर्मफलाभ्यागम इत्यर्थः न
च ब्राह्मणादिशरीरगतस्यैवांतःकरणस्य लोकांतरे
गमनाभ्युपगमात्तदवच्छिन्नचैतन्यप्रदेशस्यैव तत्रा
पि गमनमस्तीति वाच्यं घटस्य देशांतरगमनेपि तद
वच्छिन्नाकाशप्रदेशस्य गमनादर्शनादिति भावः प्र
तिबिंबस्यावच्छेद्यचैतन्यापेक्षया वैलक्षण्यप्रयोजनमर्थ
स्तु शाहः गतागतयोरिति गमनागमनयोः सतोरपि प्र
वच्छेद्यप्रदेशवन्न भिद्यत इत्यर्थः सूर्यादिप्रतिबिंबव
त्तिजलपूर्णघटादेर्देशांतरे नीयमानेपि प्रतिबिंबभे
दादर्शनादिति भावः ॥

एवमुक्तेष्वेतेषु जीवेश्वरयोः प्रतिबिंबविशे
षत्वपक्षेष्वयत् बिंबस्थानीये ब्रह्म तन्मुक्त
प्राप्यमुह्ये चैतन्यं विवदीपे जीव ईशो विशु
हाविदिति त्रैविध्यप्रक्रियां विहाय यथाघ
टावच्छिन्नाकाशो घटाकाशस्तदाश्रिते जले

प्रतिबिंबितः साभ्रनक्षत्रोजलाकाशः अन
वच्छिन्नोमहाकाशः महाकाशमध्यवर्ति
निमेघमंडले वृष्टिलक्षणकार्यानुमेयेषु
जलरूपतदवयवेषुतुषाराकारेषुप्रति
बिंबितोमेघाकाश इति वस्तुतएकस्याका
शस्यचातुर्विध्यं ॥

ननुचंद्रादिप्रतिबिंबवतांजलपात्राणांमध्येएकस्यनाशे
तद्गततयाप्रतीतस्यप्रतिबिंबस्यबिंबेनैकीभावःप्रत्यक्षे
णानुभूयतेनतथाप्रतिबिंबांतरेणएवंप्रतिबिंबरूपजी
वस्यापिविदेहकैवल्यसमयेबिंबभूतशुद्धब्रह्मभावए
वस्यात्तत्प्रतिबिंबेश्वरभावापत्तिरिष्टइतिविरोधादित्याशंका
मिष्टापत्त्यापरिहरति एवमुक्तोपीति बिंबस्थानीयमि
ति लोकप्रसिद्धचंद्रादिरूपबिंबस्थानीयमित्यर्थः ननु
बिंबत्वविशिष्टचैतन्यंकथंशुद्धमितिचेन्न शुद्धपदेनस
र्वज्ञत्वसर्वकर्तृत्वादिधर्मराहित्यस्यविवक्षितत्वादिति
चित्रदीपेचद्वैविध्यप्रक्रियांविहायचैतन्यस्यचातुर्विध्यं
परिकल्प्यजीवेश्वरविभागोदर्शितइतिसंबंधः तथाचचि
त्रदीपवचनं कूटस्थोब्रह्मजीवेशावित्येवंचिच्चतुर्विधा
घटाकाशमहाकाशौ जलाकाशाभ्रखेयथेति एतच्छ्लो
केपातदृष्टांतभागंसंगृह्णाति यथेत्यादिना घटाश्रित
इति घटांतःस्थाकाशाश्रितइत्यर्थः अभ्रनक्षत्रसाहित्य
विशेषणं आकाशस्यजलेप्रतिबिंबाभावेशंकानिरा

१ सि॰ ले॰ टी॰ ७॰

70

सार्धं इत्यं बनन्तविरामस्य प्रकारो विवक्षितः यदा जलेऽभ्रन
क्षत्राणां प्रतिबिंबोऽनुभूयते तदा तेन सहाकाशप्रतिबिंबो
ऽप्यनुभूयत एवेति नाकाशप्रतिबिंबाभावशंकावकाश
इति अनवच्छिन्न इति घटानवच्छिन्न इत्यर्थः मेघमंडले
ये जलरूपास्तदवयवास्तेषु प्रतिबिंबित इति संबंधः तच्छ
द्रो मेघमंडलपरः मेघमंडले जलानि संति चेत्कुतो नो
पलभ्यंत इत्याशंका न कार्या तेषां तुषारवत्सूक्ष्मरूपत्वा
दित्याशयेनाह तुषारेति तत्र जलसत्वमानमाह वृष्टिल
क्षणेति श्रोत्रकोपानदार्हीतिक भागं संगृह्णाति तथेति
सूक्ष्मेति घ्राणरसनचक्षुःश्रोत्रत्व ॥

तथा स्थूलसूक्ष्मदेहद्वयस्याधिष्ठानतयावि
वर्तमानेन तदवच्छिन्नेन चैतन्येन कूटवन्निर्विका
रत्वेनावस्थितेन कूटस्थः तत्र कल्पितेऽन्तःकरणे
प्रतिबिंबितेन चैतन्येन संसारयोगी जीवः अ
नवच्छिन्नेन चैतन्येन ब्रह्म तदाश्रितमायातम
सि स्थितासु सर्वप्राणिनां धीवासनासु प्रति
बिंबितेन चैतन्येनेश्वर इति चैतन्यस्य चातुर्वि
ध्यं परिकल्प्यान्तःकरणधीवासनोपरक्ताज्ञा
नोपाधिभेदेन जीवेश्वरविभागो दर्शितः अ
यं चापरस्तदभिहितो विशेषः ॥

गाख्यानि पंचज्ञानेंद्रियाणि वाक्पाणिपादपायूपस्था
ख्यानि पंच कर्मेंद्रियाणि प्राणापानादयः पंच वायवः
मनोबुद्धिश्चेत्यंतःकरणं द्विविधमाहुरित्यसप्तदशकं लिं
गशरीरं दार्ष्टांतिके घटस्थानीयसूक्ष्मदेहशब्दार्थः दे
हद्वयावच्छिन्नचैतन्यं घटाकाशस्थानीयं कूटस्थशब्दा
र्थः चैतन्यस्य देहद्वयावच्छिन्नत्वे हेतुरधिष्ठानतयाव
नैमानत्वं काष्ठविशेषवलयायः पिंडविशेषः कूटशब्दा
र्थः तद्वदचलतयातिष्ठतीति कूटस्थः तत्र कूटस्थेक
ल्पिते घटगगनजलस्थानीयं यदंतःकरणं तस्मिन्व्यति
विंवित्यर्थः कूटस्थचैतन्यातिरिक्तचिदाभासकल्पना
याः प्रयोजनमाह संसारेति कूटस्थचैतन्यस्य न संसा
राश्रयत्वं तस्य जन्ममरणादिलक्षणसंसाराश्रयत्वे
कूटस्थत्वव्याघातादिति भावः महाकाशस्थानीयब्रह्माश्रि
ते मेघमंडलस्थानीये मायायाख्येन मासिस्थितायाधीवास
नास्तासु प्रतिबिंबितमित्यर्थः जाग्रत्स्वप्नावस्थाद्वयग
तानि स्थूलांतःकरणानि धियः तासां सुषुप्त्यवस्थागताः
सूक्ष्मावस्थाः वासनाविवक्षिताः अंतःकरणेति अंतःक
रणचधीवासनोपरक्ताज्ञानं च तेषां वापाधीनयोर्भेदेने
त्यर्थः धीवासनानामानंत्यात्तासु प्रतिबिंबचैतन्यरूपेश्व
रस्यनानात्वशंकाव्याहत्यर्थं वासनोपरक्ताज्ञानोपाधि
कत्वमुक्तं पूर्वमतेषु बिंबप्रतिबिंबयोर्भेदमात्रं कल्पि
तेस्वनत्वयोरभेदप्रवेतीममर्थं सिद्धं कृत्वा अस्मिन्मते
ततो विशेषमाह अयं चेति अस्मिन्मते पूर्वं विशेषावि
ख्यलक्षणकोविशेषः उक्तः तदपेक्षयाऽपरः अन्यः

इतिबिंबमिथ्यात्वरूपो विशेषस्तदभिहितः तत्र चित्र
दीपेऽभिहितइत्यर्थः ॥

चतुर्विधेषु चैतन्येषु जीवोऽहमिति प्रकाश
मानः कूटस्थे विद्यातिरोहितासंगानंदरूप
विशेषांशे शुक्तौ रूप्यवदध्यस्तः अतएवेदं
त्वरजतत्वयोरिवाधिष्ठानसामान्यांशाध्य
स्तविशेषांशरूपयोः स्वयंत्वाहंत्वयोः सह
प्रकाशः स्वयमहं करोमीत्यादौ अहंत्वस्या
ध्यस्तविशेषांशरूपप्रकृतांतरस्यप्रकृतांत
रेव्यवहाराभावेनव्याहतत्वात् स्वयंत्वचा
न्यत्वप्रतियोग्यधिष्ठानसामान्यांशरूपं स्व
यंदेवदत्तोगच्छतीति प्रकृतांतरेऽपि व्यवहा
रेणानुहतत्वात् ॥

अपरं विशेषमेव दर्शयति चतुर्विधेष्विति अहमितिप्र
काशमानोजीवः शुक्तौ रूप्यवदध्यस्तइतिसंबंधः नन्वि
दंत्वेनसामान्यरूपेणज्ञाते शुक्तित्वादिविशेषरूपेणा
ज्ञाते शुक्त्यादौ रूप्याद्यध्यासोदृष्टः इहतु तथासामान्य
रूपेणज्ञाते विशेषरूपेणचाज्ञाते किंचिदधिष्ठानेच
नोपलभ्यतइत्याशंक्याह कूटस्थइति ननु विद्यया
कूटस्थस्यासंगत्वानंदत्वपूर्णत्वादिविशेषांशस्याह
ततयाशुक्तित्वादिवदप्रतीतावपि शुक्तेरिदंत्वेनेव

कूटस्थस्यैकेन चित्सामान्येन रूपेण प्रकाशो न दृश्यते किंच
इदं रजतमित्यत्राधिष्ठानसामान्यांशस्यारोप्यविशेषस्य
च सह प्रकाशो दृश्यते प्रकृते तु अहमर्थरूपो विशेष
एवाहमिति प्रकाशते न तु सामान्यांशः कश्चिदतो ऽहमर्थ
स्वरूपस्य वदध्यस्तत्वकल्पनं न युक्तमित्याशंक्याह अत
एवेति अहमर्थस्य कूटस्थे ऽध्यस्तत्वकल्पनादेवेत्यर्थः
स्वयंत्वाहंत्वयोरिति कूटस्थस्य हि स्वयंत्वसामान्यरूपेण
कूटस्थत्वेनस्पर्शो स्वैकगम्यत्वात् स्वयंत्वं च कूटस्थस्या
हमर्थारोपकाले तेन सह प्रकाशते न तु पूर्वकाले ऽपि स्व
यंत्वस्य भानमविरुद्धं न स्यात् चैतन्यात्मकः कूटस्थ
स्वरूपत्वाभ्युपगमात्स्वयंत्वं कूटस्थस्य चैतन्ययोः राहोःशि
रः पुरुषस्य चैतन्यमितिवद्भेदकल्पनयायमेधामीमा
वोपपत्तेश्चातः कूटस्थस्य स्वयंत्वेन सामान्यरूपेण सदा
प्रकाशमानत्वादहमर्थरूपविशेषाभासाध्यासाधिष्ठानत्व
मविरुद्धमिति भावः अहमर्थस्य स्वरूपस्य विशेषरूपत्वे
दर्शयति अहंत्वहीति अहमर्थ इत्यर्थः अध्यविशेषांश
रूपमिति शुक्त्यादावध्यस्तो यो विशेषांशो रूप्यादिस्त
द्रूपेन तत्स्पष्टमित्यर्थः साटपं च व्याहतत्वे व्याहतत्वा
दिति व्याहतत्वावगमादित्यर्थः तेन न हेतुसाध्ययोर
भेदः व्याहतत्वावगमे हेतुर्व्यवहाराभावः स्वयंत्वस्य
इदंत्ववत्सामान्यरूपत्वं दर्शयति स्वयंत्वं चेति स्वयम
स्य इति लोकव्यवहारे स्वयंत्वमन्यत्वप्रतिद्वंद्वितया प्र
सिद्धमिति दर्शयितुमन्यप्रतियोगीति स्वयंत्वस्य विशे
षणमिति तदुक्तं चित्रदीपे देवदत्तः स्वयंगच्छेत्त्वं वीक्षस्व

१
सि॰ले॰
टी॰
७२

72

स्वयंतथा शुद्धंस्वयंनशक्नोमीत्येवंलोकेप्रयुज्यत इति ॥

एवंपरस्पराध्यासादेवकूटस्थजीवयोरवि
वेकोलौकिकानां विवेकस्तुतयोर्हि हृदार
ण्यकेप्रज्ञानघनएवैतेभ्योभूतेभ्यःसमु
त्थायतान्येवानुविनश्यतीतिजीवाभिप्रा
येणमायोपाधिविनाशात्तुविनाशप्रतिपा
दनेनाविनाशीवाअरेऽयमात्मेतिकूटस्था
भिप्रायेणाविनाशप्रतिपादनेनचस्पष्टः
शुद्धमर्थस्यजीवस्यविनाशित्वकथमाविना
शित्वाभेदः ॥

ननुस्वयमहमितिप्रकाशमानयोःकूटस्थजीवयोःशुक्ति
रजतयोरिवभेदस्वत्वेसर्वेषांकुतोभेदोनोपलभ्यतेत
त्राह एवमितिशुद्धमर्थेजीवस्यशुक्तौरूप्यवत्कूटस्था
ध्यस्तत्वेसतीत्यर्थः परस्परेति तयोरभेदाध्यासादेवा
विवेकःविवेकाभावोभेदानुभवाभावइत्यर्थः ननुइदंर
जतमितिभ्रमस्थलेशुक्तिरियमितिविशेषदर्शनेन
इदंरजतमितिप्रतीतयोःसामान्यविशेषपदार्थयोःशु
क्तित्वरजतत्वरूपविरुद्धधर्मवत्त्वनिश्चयात्तयोर्भेदउप
पते इहतुजीवकूटस्थयोःकथंभेदोवगंतव्यः तदभा
वेहिस्वयमहमितिसामान्यविशेषभावेनप्रकाशमा
नयोस्तत्परजतस्थलेरजतेदमर्थयोरिवचस्तुतएका

पत्याश्चह्मण्येन्द्रूपजीवस्य स्वयं ग्राह्यार्थभूतकूटस्थैक
ल्पितत्वात्सिद्धेरित्याशंक्य ज्ञास्यान्तयोर्भेदं दर्शयति वि
वेकाख्येति तच्छादुः शंकाव्याहृत्यर्थः विवेको भेदानुभ
वः एतेभ्यः सन्निहितेभ्यः देहादिसंघातरूपेणतेभ्यः उ
पाधिरूपेभ्यो भूतेभ्यः समुत्थाय साम्येनोत्थाय उपाधि
रूपवृत्त्याऽनुत्पत्त्याऽनुत्पत्तिं प्राप्येत्यर्थः तान्युपाधिभूता
निवृत्त्यादीनि तत्त्वज्ञानेन विनश्यन्ति तदानात्म्यनुवि
नश्यतीति श्रुत्यात्मोपाधिकस्यात्मनो विनाशित्वप्रति
पाद्यते न त्वान्तःकरणप्रतिबिम्बरूपस्य उपाध्याय तस्य
जीवस्य मिथ्यात्वे सति संभवति औपाधिकजीवस्य सत्य
त्वेतु तस्य विनाशित्वप्रतिपादकवचनेन संगच्छेत तथा
ऽयंप्रज्ञानघनस्त्वात्माऽरे मैत्रेय्यविनाशी वाऽविना
शेपवनतु उपाधिनाशान्नश्यतीति कूटस्थचेतनस्य क्ष
त्यानाशाभावः प्रतिपाद्यते एतदुक्तं भवति अयमात्मा
प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थायेत्यादिकत्या
चिदेकरसश्चात्मैव उपाध्युत्पत्तिमनूत्पद्यते तन्नाशम
नु नश्यतीत्युपाध्युत्पत्तिविनाशव्यतिरेकेणोत्पत्तिवि
नाशौ न चिदात्मनः प्रतिपाद्येते अनु विनश्यतीत्यनुश
ब्दप्रयोगात् न च तस्य स्वतो विनाशादिमत्त्वं संभवति
अविनाशी वा अरेऽयमात्मेति वाक्येन विज्ञानघनात्मनो
विनाशाभावप्रतिपादनविरोधात् तस्माच्चिदात्मन उत्पत्ति
विनाशवत्ताप्रतिबिम्बे चैतन्यरूपजीवे न तादात्म्यमा
दाय विनाशादिवचनमुपपादनीयं तत्तु भ्रमस्य
लीयरजतेदमर्थयोरिवात्रापि विनाशित्वाविनाशि

१
सि॰ ले॰
टी॰
७३

73

तद्रूपविरुद्धधर्मवत्त्वनिश्चयादेव जीवकूटस्थयोर्भेदः स्फु-
टं भासत इत्यतः कूटस्थचैतन्ये जीवरूपाहमर्थस्याध्यास-
सिद्धिरिति उदाहृतश्रुत्या प्रतिबिंबजीवस्य विनाशित्वोप-
गमेऽप्यन्तरविरोधमाशंकते अहमर्थेति अभेदस्त्वनं-
तरमहं ब्रह्मास्मीति वाक्येन प्रतिपाद्यत इति शेषः विना-
श्यविनाशिनोरभेदायोगादिति भावः ॥

नेदमभेदे सामानाधिकरण्यं किन्तु बाधायां
यथा यः स्थाणुरेष पुमानिति पुरुषत्वबोधे
न स्थाणुत्वबुद्धिर्निवर्त्यते एवमहं ब्रह्मास्मी-
ति कूटस्थब्रह्मरूपत्वबोधेनाध्यस्ताहमर्थ-
रूपत्वं निवर्त्यते योयं स्थाणुः पुमानेष पुंधि-
या स्थाणुधीरिव ब्रह्मास्मीति धियाशेषाप्य-
हंबुद्धिर्निवर्त्यत इति नैष्कर्म्यसिद्धिवचनात्

परिहरति नेदमिति सोयमित्यादिसामानाधिकरण्यवाक्य-
स्य यथाऽभेदो वाक्यार्थोऽभ्युपते न तथा यः स्थाणुः स पुरु-
ष इत्यादिसमानाधिकरणवाक्यस्य बाधारूपो वाक्यार्थोऽभ्यु-
पते यः स्थाणुः स पुरुष इत्यत्र हि पुरुषे आरोपितस्य प्रा-
तिभासिकस्य स्थाणोर्व्यावहारिकपुरुषेण सहाभेदो न वा-
क्यार्थः बाधितत्वात् किं तु स्थाण्वारोपाधिष्ठानभूते पुरुषे
वस्तुतः स्थाणुतादात्म्याभावरूपा बाधा वाक्यार्थः तथा

चयस्थाणस्सपुरुषस्य इति वाक्येन वस्तुतः स्थाणुतादात्म्या
भाववानयं पुरुष इति बोधो जायते तेन च बोधेन पुरुषे
स्थाणुत्वारोपस्य विषयो निवर्त्यते एवमहं ब्रह्मास्मीति वा
क्येनाहमर्थभूतजीवतादात्म्यशून्यं ब्रह्मैवास्मीति ज्ञानं
जायते तेन ज्ञानेनाहं ज्ञाता कर्ता सुखी दुःखीत्याद्यारो
पः कर्तृत्वादिधर्मविशिष्टाहमर्थेन स्वविषयेण सह
निःशेषं निवर्त्यते आरोपिताहमर्थनिवृत्तौ च सत्यां जी
वस्य परिहार्यत्वं नैव रूपं कूटस्थस्य चैतन्यात्मकं तत्पूर्णं ब्रह्म
रूपेणावतिष्ठते इति न श्रुत्यन्तरविरोध इति भावः अ
न्तरार्थस्तु इदं ब्रह्माहं पदयोस्समानविभक्तिमत्त्वरूप
सामानाधिकरण्यमभेदरूपेऽर्थे नाभ्युपगम्यते येना
भेदासंभवो दोषः स्यात् ननु यद्यभेदो न वाक्यार्थः कस्त
र्हि स इति शङ्कते किंत्विति बाधात्र वाक्यार्थो विवक्षित
इत्याह बाधायामिति पुरुषत्वपदेन कल्पितस्थाणुता
दात्म्याभाववत्त्वं विवक्षितं बाधायां वाक्यार्थत्वस्वीका
रात् अहं ब्रह्मीत्यत्रेति पदानन्तरं वाक्यजन्येनेति शेषः
अत्र वाक्यार्थज्ञानस्याहं ब्रह्मास्मीत्याकारत्वाभावात्
कूटस्थब्रह्मरूपत्वपदेनापि वस्तुतोऽहमर्थतादात्म्या
भाववत्कूटस्थब्रह्मरूपत्वं विवक्षितं बाधायामेव ॥

यदि च विवरणाद्युक्तरीत्येदमभेदे सामाना
धिकरण्यं तदा जीववाचिनोऽहं शब्दस्य लक्ष
णया कूटस्थपरत्वमस्तु तस्या वाक्यस्य ब्र।
ह्माभेदयोग्यत्वात् ॥

वाक्यार्थबोधविषयत्वाभ्युपगमात् दृष्टान्तदार्ष्टान्तिकयो
रधिष्ठानस्यारोपितार्थाभावत्वमारोपितात्यन्ताभावस्या
धिष्ठानातिरिक्तत्वमिति मतमाश्रित्यास्याधिरुक्तमिति
ध्येयम् अध्यस्ताहमर्थरूपत्वमिति अध्यस्तो योऽहमर्थ
स्तद्रूपत्वं तादात्म्यं निवर्तत इति बोधफलमुक्तं महावा
क्यस्य बाधार्थकत्वेन स्वकपोलकल्पितं किंतु सुरेश्वरा
चार्यैरुक्तमित्याह योयमिति मंदोऽयकारेयः स्थाणुर्गृ
हीतः एषोयं पुमानित्याप्तवाक्यजन्यया धिया वस्तु
तो नायं स्थाणुः किंतु पुमानिति धिया स्थाणुरयमिति धी
रारोपितस्थाणुतादात्म्यं न सहृदयेन निवर्त्यते एवमहं
ब्रह्मास्मीति वाक्यजन्यया धियाऽहमर्थभूतजीवतादा
त्म्यस्त्वं ब्रह्मैवास्मीत्याकारया हं बुद्धिरहं करोमि भुंज
इत्यादिबुद्धिरूपोऽध्यारोपिताहमर्थसहिता निवर्त्यते
महावाक्यार्थज्ञानादशेषानर्थनिवृत्तिविडंबोऽनुभव
सिद्धेति द्योतनार्थो हि शब्दः ननु समानाधिकरणवाक्ये
ष्वभेदरूपवाक्यार्थस्य मुख्यतया बाधारूपवाक्यार्थ
स्य औत्सर्गिकत्वाद्विवरणादिषु प्रकृते अभेदरूपवा
क्यार्थस्यैव स्वीकाराच्च भगवत्पादैरपि वाक्यवृत्तौ ता
दात्म्यमत्र वाक्यार्थस्तयोरेव पदार्थयोरिति श्लोकेन म
हावाक्येषु तत्त्वंपदार्थयोस्तादात्म्यशब्दिताभेदस्यैव वा
क्यार्थतया स्वीकाराच्च वार्तिककारवचनस्य बाधायाम
पि प्रकृते वाक्यार्थता वक्तुं शक्यत इति प्रौढिमाश्रित्य प्र
हृत्युपपत्तेश्च तस्मादहं ब्रह्मास्मीत्यत्राभेदो वाक्यार्थ इ
ति स्थिते विनाशिजीवस्याविनाशिब्रह्माभेदो न संभवती

तिचोद्यं तदवस्थमेवेत्यस्वरसादाह यदि चेति ॥

यस्तु मेघाकाशकल्पो धीवासनाप्रतिबिं
ब ईश्वर उक्तः सोयं सुषुप्तस्थाने एकीभूतः
प्रज्ञानघन एवानंदमयो ह्यानंदभुगिति मां
डूक्यश्रुतिसिद्धः सोप्यानंदमयस्तद्वेवत
दनंतरमेव सर्वेश्वर एष सर्वज्ञ एषोन्तर्या
म्येष योनिः सर्वस्य ॥

कूटस्थो ब्रह्मजीवेशावित्येवं चिच्चतुर्विधेति श्लोकसंगृ
हीतानां कूटस्थब्रह्मजीवेश्वराणां चतुर्णां मध्ये ब्रह्म
चैतन्यं तावत्सत्यं ज्ञानमित्यादिवाक्यप्रसिद्धमिति तत्र वाक्य
प्रमाणत्वेन नोदाहृतं कूटस्थचैतन्ये अविनाशी वा अरे इति
वाक्यप्रमाणत्वेन दर्शितं उपाधिकृतं विनाशं तु विधा
स्यत्यतिविनाशवचनमंतःकरणगतचैतन्यप्रतिबिं
बरूपे जीवे प्रमाणमुक्तं परिशेषात्सर्वेश्वरे प्रमाणं
वक्तव्यं तदाह यस्त्विति तुशब्दोवधारणे य ईश्वर उक्तः
सोयं स्फुटमानंदमय एव नान्य इत्यर्थः सुषुप्तं स्थान
मस्येति सुषुप्तस्थानः जागरणे हि विज्ञानशब्दितांतः
करणेन तादात्म्याध्यासाद्धि ज्ञानमयत्वमनोमयत्वकर्तृत्वा
दीनि रूपाणि संति तथा देहे स्थूलोहमित्याद्यभेदाध्या
सात्स्थूलत्वकृशत्वब्राह्मणत्वादीनि रूपाणि संति त
था च स्वप्नादिषु काणोहं मूकोहमित्यादिरूपाध्यासा

१
सिं.ले
टी.
७५

75

कारणत्वादीनि रूपाणि संति एवमाकाशादिषु पदार्थेषु
ध्यासक्तिह्यानि ह्याकाशमयो वायुमय इत्यादिश्रुतिसं
गृहीतान्यनेन रूपाणि जीवस्य संति सुषुप्तेस्तु यथाद्यु
पाधिलयेन सर्वप्रकाराणि तिलयात्त्वानि सिद्धानि सर्वा
ण्यपि रूपाणि लीयंते इत्यभिप्रेत्य एकीभूतः इत्युक्तं
तदुक्तं विज्ञानमयमुख्यैर्यो रूपैर्युक्तः पुराधुना सल
येनैकतां प्राप्तो बहुतंडुलपिष्टवदिति पुराहमानस्व
र्वकाले लयेन रूपाणां लयेनेत्यर्थः प्रज्ञानं चैतन्यं त
स्य जाग्रदादौ वृत्तिभेदेन भेदरूपं प्रोक्तं लयं प्राप्यस्यिनं
सुषुप्ते वृत्तीनां विलयात्तु नैरेकत्वं प्राप्तमित्यभिप्रेत्य प्र
ज्ञानघनत्वमुक्तं आनंदोऽत्र विवभूतो ब्रह्मानंदो विवक्षि
तः तस्य प्रतिबिंबभूतो जीवस्यानंदमयः स च स्वरूपभू
तमानंदं सुषुप्तिकाले अविद्यावृत्तिभिर्भुंक्त इत्यानंदभु
गिति श्रुत्यर्थः ननु जाग्रत्स्वप्नयोः स्थूलावस्थांतःकर
णप्रतिबिंबरूपो जीवो विज्ञानमयः स्थूलांतःकरणस्य
विज्ञानशब्दवाच्यत्वात् स एव विज्ञानमयो जीवः स्वाप
काले सूक्ष्मरूपेण विलीनावस्थांतः ॥

प्रभवाप्ययौ हि भूतानामिति श्रुतेः सर्वेष्व
स्वविषयसकलप्राणिधीवासनोपाधि
कस्य तस्य सर्वज्ञत्वेन तत एव सर्वकर्तृत्वोप
पन्नेश्च न चास्मदादिवासनोपहितस्य कस्य
चित्सार्वज्ञं नानुभूयते इति वाच्यं वासना

नोपरोक्षत्वेन तदुपहितस्यापि परोक्षत्वादि
ति ॥
कारणोपाधिकस्य तु आनंदमयशब्दव्याने तथाचानंदम
यस्य जीवत्वादीश्वरत्वमसिद्धमित्याशंक्य सोऽयमानंदम
यस्यैवेश्वरत्वं वाक्यशेषो दर्शयतीत्याह नद्वैवेति मांडू
क्यश्रुतावेवेत्यर्थः सर्वेश्वरत्वे सर्वजगदुत्पत्तिकर्तृत्वं
योनिरुपादानं आनंदमयस्य सर्वोपादानत्वे हेतुमाह
प्रभवेति हि यस्माद्भूतानां प्रभवाप्ययौ जन्मलयौ सोऽय
मानंदमयात् भवतः तस्माद्देव सर्वस्य योनिरित्यर्थः
आनंदमयस्य श्रुत्युक्तसर्वज्ञत्वे युक्तिमप्याह सर्ववस्थि
ति एकैकाधीः किंचित्किंचिद्विषयीकरोतीति सर्वाभि
र्मिलित्वा सर्वं जगद्विषयीक्रियते एवं च सर्वबुद्धीनां
सर्वविषयकत्वासिद्धमति सर्वबुद्धिसत्त्वावस्थारूपा
णां सर्वबुद्धिवासनानामपि सर्वविषयकत्वं सिध्यति
तथा च सर्वप्राणिबुद्धिवासनोपाधिकस्यानंदमयस्य
सर्वज्ञत्वसिद्धिरित्यर्थः ननु धीवासनोपरक्ताज्ञानोपा
धिक ईश्वर इति यदुक्तं तत्र किं प्रतिबिंबेश्वरस्याज्ञानमे
वोपाधिः किं वासनोपरक्ताज्ञानं अथवा सर्वाः धीवासनाः
उत प्रत्येकं वासनानाद्यः धीवासनाख्यप्रतिबिंबितं चै
तन्यमीश्वरश्च युक्तिविरोधात् अज्ञानमात्रस्य ईश्वरोपा
धित्वे धीवासनानुसरणवैफल्याच्च नवाज्ञानोपाधि
कस्यैवेश्वरस्य सर्वज्ञत्वलाभार्थं सर्वविषयकधीवास
नानुसरणमिति वाच्य मज्ञानगतसत्वांशपरिणाम
रूपाभिस्सर्वविषयकवृत्तिभिरेव सर्वज्ञत्वोपपादन

संभवेन तदंशे धीवासनानामनपेक्षणादनन्त एव हि जी
वः अज्ञानमात्रस्य तदुपाधित्वसंभवात् युगपत्सर्वप्राणि
नां सुषुप्त्यसंभवेन सर्वबुद्धिवासनानां यौगपद्यासंभवा
च्च न तासामज्ञानविशेषणतया ईश्वरोपाधित्वसंभवः
तासां यौगपद्यासंभवादेव न तृतीयोपि कल्पः संगच्छते
सर्वासु धीवासनास्वव्यासक्ततया एकस्य ईश्वरत्वोपप
त्तिर्विवक्ष्यासंभवाच्च लोके व्यासज्यवृत्तिप्रतिविवाद
र्शनात् तस्मात् चतुर्थः कल्पः परिशिष्यते तत्रानुभव
विरोधमाशंकते न वास्मदिति अस्माकं प्राणिनामेकै
कबुद्धिवासनोपहितस्यानंदमयस्य कस्यापि स्वापकाले
ह सर्वज्ञत्वस्यानुभवो नास्तीत्यर्थः वासनानामिति जाग्रद
दौ स्थूलावस्थान्तःकरणानामिव सूक्ष्मो वासनात्मकान्तः
करणानां साक्षिप्रत्यक्षयौगपद्याभावेन तदुपाधिकानं
दमयानामपि नाहमनुभवयौगपद्यमित्यर्थः ॥

ब्रह्मानंदे तु सुषुप्तिसंयोगान्मांडूक्योक्ता
नंदमयो जीव इत्युक्तं तथाहि जाग्रदादिषु
भोगप्रदस्य कर्मणः क्षये निद्रारूपेण वि
लीनमन्तःकरणं पुनर्भोगप्रदकर्मवशा
त्प्रबोधे घनीभवति तदुपाधिको जीवो वि
ज्ञानमय इत्युच्यते स एव सर्वं सुषुप्तिसम
ये विलीनावस्थोपाधिकः सन्नानंदमय इ

स्युच्यते सदाव मांडूक्ये सुषुप्तिस्थान एकीभू
त इत्यादिना दर्शितत्वात् एवंसति तस्य सर्वे
श्वरत्वादिवचनं कथं संगच्छते इत्याशंक्याधि
दैवतमध्यात्मं च परमात्मनः सविशेषाणि
त्रीणि रूपाणि तत्रापि दैवते त्रीणि शुद्धचैत
न्ये चैतानि चत्वारि रूपाणि चित्रपटदृष्टांतेन वि
त्रदीपे समर्थितानि ॥

मांडूक्यश्रुत्युक्तानंदमयस्य सकलधीवासनोपाधिकस्य
उक्तरीत्या एकस्यासंभवात् प्रत्येकमेव धीवासनोपाधि
कस्यानंदमयो वाच्यस्य च जीव एवेत्याह ब्रह्मानंदे वि
ति चित्रदीपे श्रीविद्यारण्यगुरुभिरीश्वरत्वेनोक्तानंदमय
स्यैतैरेव ब्रह्मानंदाख्यग्रंथे जीवत्वमुक्तम् जीवत्वोक्तिरू
पविरोधार्थकस्त्वाह: सुषुप्तिसंयोगादिरुपलक्षण
वासनोपाधिकस्येश्वरत्वे जाग्रदादावीश्वराभावप्रसंगा
देकैकवासनोपाधिकस्य नानात्वेनेश्वरनानात्वप्रसंगा
त्सकलवासनोपाधिकस्य कस्यचिदसंभवाच्चेत्यपिद्र
ष्टव्यं तत्रोक्तप्रकारं दर्शयति तथाहीति जाग्रदादिष्वभो
गप्रदं यत्कर्म तस्य लये सतीत्यर्थः आदिपदं स्वप्नपरं ब
हुवचनं तु जाग्रत्स्वप्नव्यक्तिभेदापेक्षं निद्रारूपेणेति सु
षुप्तिरूपेणेत्यर्थः तदुक्तं पंचीकरणे बुद्धेः कारणात्म
नावस्थानं सुषुप्तिरिति आनंदमयस्य जीवत्वेनस्येश्व
रत्वप्रतिपादकवाक्यैः विरोधं शंकते एवं सतीति

सोऽशुमज्जीवरूपानंदमयस्य वस्तुत ईश्वरत्वाभावेपि ईश्व
राभेदविवक्षयात्तस्येश्वरत्ववचनं संगच्छत इति परि
हरति अस्यामित्यादिना मांडूक्यश्रुतौ जीवेश्वरयोरभेद
विवक्षां दर्शयितुं पीठिकां करोति संतीति परमात्मन
अधिदैवतं सविशेषाणि त्रीणि रूपाणि संति तथा पर
मात्मनोध्यात्मं च सविशेषाणि रूपाणि संतीति संबंधः
परमात्मन इत्यस्य निर्विशेषचैतन्यस्येत्यर्थः अधिदै
वतमित्यस्य देवतात्मकानीत्यर्थः अध्यात्ममित्यस्य च जी
वात्मकानीत्यर्थः अधिदैवतमध्यात्ममिति च पदद्वयम
व्ययं उक्तं प्रपंचयति तत्रेति अध्यात्माधिदैवतरूपाणां
मध्य इत्यर्थः जीवस्य त्रीणि सविशेषरूपाणि तुर्यपादात्म
कं निर्विशेषरूपं च मांडूक्यश्रुतौ कंठतो दर्शितानि ईश्व
रस्य तु निर्विशेषसविशेषरूपाणि न श्रुत्यभिप्रेतगत्यपि
श्रुत्या कंठतो नोक्तानि तानि तु श्रुतितात्पर्याभिज्ञैः श्री
विद्यारण्यगुरुभिश्चित्रदीपे समुदाहृतं ॥

यथा स्वतः शुभ्रः पटो धौतः अन्नलिप्तो घटि
त इति मष्यादिविकारयुक्तो लांछितो वर्ण
पूरितो रंजित इत्यवस्थाचतुष्टयमेकस्यैव
चित्रपटस्य तथा परमात्मा मायातत्कार्योपा
धिरहितः शुद्धः मायोपहित ईश्वरः अपंची
कृतभूतकार्यसमष्टिसूक्ष्मशरीरोपहितो हि

ण्यगर्भः पंचीकृतभूतकार्यसमष्टिस्थू
लशरीरोपहितो विराट्पुरुषइत्यवस्था
चतुष्टयमेकस्यैव परमात्मनः ॥

निरूपितानीत्याह चित्रपटेति तत्रायं दृष्टांतसंग्राहकः
श्लोकः स्वतः शुभ्रोत्र धौतः स्यात् घट्टितोन्नविलेपनात्
मष्याकारैर्लांछितः स्याद्रंजितो वर्णपूरणादिति एत
श्लोकसंगृहीतं दृष्टांतं विवृणोति यथेति स्वतश्चिदं
तर्यामी तु मायावी सूक्ष्मसृष्टितः सूत्रात्मा स्थूलसृष्ट्यै
व विराडित्युच्यते परः इति श्लोकसंगृहीतं दार्ष्टांतिकं द
र्शयति तथेति श्लोके परः स्वतश्चिदिति संबंधः अमु
मंशं विवृणोति परमात्मेति श्लोके तु शब्दोवधारणे त
थाच परः एव मायावी सन्नंतर्यामीत्युच्यत इति संबं
धः अमुमंशमाह मायोपहित ईश्वर इति श्लोके पर
एव सूक्ष्मसृष्टितः सूत्रात्मेति संबंधः अमुमंशं व्याचष्टे
अपंचीकृतेति अपंचीकृतानां भूतानां यत्कार्यं व्याप
कं सूक्ष्मशरीरं तदुपहित इत्यर्थः न च सूत्रात्मनो हिर
ण्यगर्भशब्दितस्य श्रुतिस्मृत्योर्जीवत्वप्रसिद्धेः कथं त
स्येश्वररूपत्वमिति वाच्यं जीवरूपहिरण्यगर्भस्य सम
ष्टिसूक्ष्मशरीराभिमानविशिष्टस्य सत्यलोकस्वामिनः
ईश्वरान्यत्वाभ्युपगमात् ईश्वरस्य तु समष्टिसूक्ष्मश
रीराभिमानाभावेपि समष्टिसूक्ष्मशरीरनियंतृतया
तदुपाधिकस्य समष्टिसूक्ष्मोपाध्युपहितत्वगुणयोगे

१
सिं·ले
टी·
७८

78

न हिरण्यगर्भसूत्रात्मपदाभ्यां निर्दिष्टस्येह विवक्षितत्वा
त्तथा च गौणमीश्वरस्य हिरण्यगर्भत्वमिति भावः अत
एव चित्रदीपे ईश्वररूपहिरण्यगर्भापेक्षया सत्यलोका
धिपतेर्वैलक्षण्यात्तत्र ह्यभिमतेश्वरपरिगणनावसरे
पृथगुपादानं कृतमिति मन्तव्यं श्लोके एष एव परः स्थू
लदृष्ट्या विराडित्युच्यत इति संबंधः अमुमंशं व्याकुर्वन्नस्प
ष्टयति पंचीकृतेति अयमीश्वररूपो विराट्पुरुषः पु
रुषसूक्ते वैश्वानरविद्यावाक्यादिरूपश्रुतिसिद्धो द्रष्टव्यः
सत्यलोकाधिपतेर्हिरण्यगर्भस्य पुत्ररूपो विराट्पुरु
षस्समष्टिस्थूलाभिमानी जीवो बृहदारण्यकश्रुतिसि
द्धोऽन्य एवेत्यपि द्रष्टव्यं इत्यवसेयेति उक्तप्रकारेण वस्तु
तपक्षस्यैव रूपचतुष्टयं द्रष्टव्यमित्यर्थः ॥

अस्मिंश्चित्रपटस्थानीये परमात्मनि चित्र
स्थानीयः स्थावरजंगमात्मको निखिलः
प्रपंचः यथा चित्रगतमनुष्याणां चित्राधा
रवस्त्रसदृशा वस्त्राभासा लिख्यंते तथा प
रमात्माध्यस्तदेहिनामप्यधिष्ठानचैतन्यस
दृशाश्चिदाभासाः कल्प्यंते ते च जीवनामा
नः संवर्तंतीति अध्यात्मे तु विश्वतैजसप्रा
ज्ञभेदेन त्रीणि रूपाणि तत्र सुषुप्तौ विली
नेंतःकरणेऽज्ञानमात्रसाक्षी प्राज्ञः योयमि

ह्यानंदमय उक्तः स्वप्ने व्याप्तिमत्सूक्ष्मशरीराभि
मानी तैजसः जागरे व्याप्तिमत्स्थूलशरीराभि
मानी विश्वः ॥

एवं प्रकृतोपयुक्तं रूपचतुष्टयं दर्शयित्वा प्रसंगादाह
अस्मिन्निति ननु कृत्स्नस्य जगतश्चित्रस्थानीयत्वे तद्वदेव
सर्वमचेतनं स्यात्तथा च चेतनाचेतनविभागो न स्यादिति
शंकां दृष्टान्तेन परिहरति यथेति वस्त्राभासा इति वर्ण
विशेषात्मकवस्त्राणां चित्राधारेण वस्त्रेणाकृतिसाम्येपि
शीतत्राणादिनिवर्तकत्वाभावादाभासत्वं देहिनामिति
स्थूलदेहवतामहंकाराणामित्यर्थः अंतःकरणात्मकाहं
कारेषु चैतन्यस्य प्रतिबिंबकल्पनस्य प्रयोजनमाह ते
चेतितत्वाच्च विदाभासयुक्ताः कार्यकारणसंघाताश्चेतनाः
अन्ये गिरिसमुद्रादयोऽचेतना इति विभागसिद्धिरिति भा
वः एवमीश्वरस्य रूपाणि दर्शितानि जीवस्याप्युक्तानि
सविशेषनिर्विशेषरूपाणि दर्शयति अध्यात्ममिति त
थाहि ईश्वरस्य सविशेषरूपाण्यपेक्ष्य जीवस्य सविशेषरू
पाणां वैलक्षण्यसूचनार्थः तदेव वैलक्षण्यं दर्शयति
विश्वेति रूपाणीति सविशेषाणीति शेषः तत्रेति रूप
त्रयमध्ये इत्यर्थः विलीन इति अंतःकरणे विलीने सति
सूक्ष्मरूपेण विलीनोऽन्तःकरणोपाधिकः संपद्यत इति भा
वः स्थूलान्तःकरणादिसादित्वव्यवच्छेदार्थं मात्रग्रहणं
ननु पूर्वं सौषुप्तजीवस्यानंदमय इत्युक्तमिदानीं कथं सए
व प्राज्ञ इत्युच्यते तत्राह योयमिति इहेति माण्डूक्यश्रुतावि

१ सि॰ ले॰ टी॰ ७५

79

त्यर्थः नन्वेवमानंदभुगित्यनंतरं चेतोमुखः प्राज्ञस्तृतीयः
पाद इति वाक्यशेषोपदर्शनादिति भावः चेतांसि वित्तवृत्ति
विवेकापेतान्यविद्यावृत्तिरूपाणि मुखानि स्वापकालीना
नंदानुभवसाधनानि यस्य स चेतोमुखः ननु सौषुप्तजी
वस्यानंदभुक्त्वे चेतोमुखत्वे च कृतमपि कथमुपपन्नमिति

तत्र मोङ्काङ्क्षति रहमनुभवे प्रकाशमान
स्यात्मनो विश्वतैजसप्राज्ञतुरीयावस्थाभे
दरूपपादचतुष्टयं सोऽयमात्मा चतुष्पादि
त्युपक्रम्य पूर्वपूर्वपादविप्रलापनेन निः
प्रपंचब्रह्मात्मकतुरीयपादप्रतिपत्तिसौ
कर्यीय स्थूलसूक्ष्मसूक्ष्मतरोपाधिसाम्या
द्विराडादीन्विश्वादिष्वंतर्भाव्य जागरितस्था
नो बहिःप्रज्ञः इत्यादिना विश्वादिपादानुद्र
पयत् पुनः प्राज्ञशब्दितेश्वरानंदमये व्याकृत
स्येश्वरस्यांतर्भावविवक्षितत्वात्तत्र सर्वेश्व
रादिनिर्देशवचनमिति ॥

चेदुच्यते सुषुप्तादुत्थितस्य हि सुखमहमस्वाप्समिति
स्वापकालविशिष्टसुखस्मरणोद्दृष्टेन तच्च न तदा सु
खानुभवमंतरेण न संभवति अनुभूतस्य सुखस्य
स्मरणायोगात् न च सुषुप्तावात्मरूपसुखस्यांतःक

रणवृत्तिभिरेवानुभवः संभवतीति वाच्यं तदा विली
नस्यांतःकरणस्य वृत्त्युत्पादनयोग्यत्वाभावान्न च मु
क्तिकाल इव स्वापकालेऽपि स्वरूपचैतन्येनैव सुखानु
भवसंभवात् किमविद्यावृत्तिप्रतिबिंबरूपचैतन्यकल्प
नयेति वाच्यं जाग्रत्स्वप्नयोश्चैतन्यप्रतिबिंबोपेतवृत्ति
भिरानंदानुभवदर्शनेन सुषुप्तावपि तथा संभवेऽप
रित्यागायोगात् मुक्तिकाले चोपाधिमात्रविलयाभ्यु
पगमात् वृत्त्यसंभवेऽपि चैतन्यसत्त्वात् सौषुप्तसुखा
नुभवस्य केवलनित्यसाक्षिरूपत्वेऽप्यनुभवनाशरूप
संस्काराभावप्रसंगेन सुखमस्वाप्समित्यनुसंधाना
भावापत्तेस्तस्माद्यथोक्तार्थाङ्गीकृतिरुपपन्नैव व्य
ष्टीति परिच्छिन्नेत्यर्थः एतेपादास्तात्ताक्षुत्वक्कार इत्या
ह नत्वेति उक्तरीत्या पादकल्पनोपपत्तौ सत्यामित्यर्थः
श्रुतिः पादचतुष्टयमुपक्रम्य विश्वादिपादानां रूपप्र
दिति संबंधः एतेन गम्यते च ब्रह्मात्मैक्यमभि
रीति पादादिस्वाद्यः इमां श्रुतिमभिप्रेत्य श्रौतपा
दकल्पनायाः प्रयोजनमाह एवं पूर्वेति अयमर्थः
सोऽयमात्मा चतुष्पादिति वाक्येन जीवस्य पादचतुष्ट
यवत्त्वमुपक्रम्य जागरितस्थानो वैश्वानरः प्रथमः
पादः इत्युक्तौ अत्र जीवपादानामेव वक्तुमुपक्रांतत्वा
द्विश्वः प्रथमः पाद इति वक्तव्ये वैश्वानरशब्दितस्य

विराट्पुरुषरूपे ॥

श्वरस्य प्रथमपादत्वोक्तिर्विश्वे वैश्वानरेश्व

१
सि॰ले
टी॰
प॰

80

रस्यांतर्भावं सूचयति न च हिरण्यगर्भस्य
रौ विहाय वैश्वानरेश्वरस्यैव विश्वांतर्भावे
किंनियामकमस्त्यभिमतमितिवाच्यं तयोः
स्थूलोपाधिकत्वरूपसाम्यस्येश्वरहिरण्य
गर्भव्याहृतस्यनियामकतयाविवक्षितत्वा
त्तथाद्वितीयपादप्रतिपादकवाक्ये स्वमस्था
नस्तैजसो द्वितीयः पाद इत्युक्तेश्च सूक्ष्मोपा
धिकत्वसाम्येन हिरण्यगर्भस्य तैजसे ऽन्तर्भा
वो विवक्षितः वैश्वानरः प्रथमः पाद इत्युप
क्रमात्प्रसाद्यात्तथातृतीयपादप्रतिपादके
सुषुप्तस्थानएकीभूतइत्यादिवाक्ये प्रागेवा
दाहृते प्राज्ञापि तृतीयपादत्वेनोक्ते प्राज्ञश
ब्दितानंदमये सूक्ष्मतरोपाधिकत्वसामान्ये
नेश्वरस्यांतर्भावो विवक्षितः तथा च वाक्य
शेषस्य एष सर्वेश्वर इत्यादेरानंदमयेश्वर
योरभेदस्य विवक्षिततया प्रकृतत्वान्नानुप
पत्तिः तथा तुरीयपादप्रतिपादकमिदं वा
क्यं अदृष्टमव्यवहार्यमग्राह्यमलक्षणम
चिंत्यमव्यपदेश्यमेकात्म्यप्रत्ययसारं प्रपंचो
पशमं शिवमद्वैतं चतुर्थं मन्यंत इति अद

ष्यं चक्षुराद्यविषयं अव्यवहार्यं प्रवृत्तिनि
वृत्तिलक्षणव्यवहारागोचरं अग्राह्यं कर्मे
न्द्रियागोचरं अलक्षणमसाधारणधर्मशू
न्यं अचिंत्यं शुष्कतर्कागोचरं अव्यपदेश्य
शब्दप्रवृत्त्यगोचरं एकात्मप्रत्ययसारं ए
कादिपदवाच्यस्यैकमेवाद्वयः स्वगत
भेदशून्यत्वमेकत्वं सर्वदेहेष्वप्येकत्वमात्म
त्वं प्रत्ययत्वं चिद्रूपत्वं सारत्वमानंदत्वं सार
मानंदरूपमर्थः अप्यानंदमयापिकरणभा
ष्या प्रपंचोपशमं प्रपंचाभावरूपं कल्पि
तपदार्थाभावस्याधिष्ठानानतिरेकात् य
द्वा प्रपंचं स्वरूपं ज्ञानसाध्यायास्तत्कारण
द्वैतनिवृत्तेरधिष्ठानात्मकतायावक्ष्यमाण
त्वात् शिवं शुद्धं सर्वदोषरहितं अद्वैतं द्वैत
रहितं चतुर्थं विश्वतैजसप्राज्ञरूपपादत्र
यापेक्षया चतुःसंख्यापूरकं पादं चिंतयंतीति
क्रत्यर्थः अत्र विश्वतैजसप्राज्ञलक्षणपादे
ष्वेव वैश्वानरहिरण्यगर्भेश्वराणामंतर्भावव
नेनैतेषामेकत्वचिंतनपरत्वं तथा विश्वादिपा
दानामोंकारावयवभूतमात्राणां चैकत्वचिं

१
सि. ले.
टी.
८२

तत्र मन्त्रविवक्षितं तथाच श्रुतिः पादा मात्रा
मात्राश्च पादा इति तथा गौडपादीयवचन
मपि ओंकारं पादशो विद्यात्पादा मात्रा न सं
शय इति संशय इत्यस्यायमभिप्रायः विश्वा
दिपादानाम्मात्राणांच यावत्संशयानिहति
एकत्वं चिंतनीयमिति मात्रास्वरूपं च श्रुत्यै
व दर्शितं अकार उकारो मकार इतीति एवं
विश्वादिपादानां वैश्वानरादीनां मात्राणां चै
कत्वचिंतनं सर्वेषामेतेषां निष्प्रपंचब्रह्मा
त्मकतुर्यपादे चिन्मात्रे प्रविलापनार्थं त
त्रचायं क्रमः विश्ववैश्वानराकाराणामेकं
त्वं प्रथमं विचिंत्य पश्चात्तैजसहिरण्यगर्भा
काराणामेकत्वं चिंतयेत् तत ईश्वरप्राज्ञ
मकाराणामप्येकत्वं चिंतयेत् तथा चिंता
क्रमेणैव प्रविलापयेत् अकारादित्रयमुका
रे उकारादित्रयं मकारे मकारादित्रयं चिन्मा
त्रे तुर्यपादे प्रविलापयेत् चिन्मात्रे प्रवि
लापं च चिंतनं तत्रैव स्थापयेत् उकारा
दौ प्रविलापनेनामाकारादित्रयमुकार
व्यतिरेकेणनास्ती ॥ ॥

ग्राहार्थ इति निश्चयपूर्वं प्रत्यहमुक्तप्रकारेण स
माधिं कुर्वतो ब्रह्मसाक्षात्कारो भवति तत्र
स्थवलप्रास्याकृतकल्पनेति मांडूक्यश्रुत्य
भिप्रायः इदं सर्वं मांडूक्यश्रुतेरिदं संग्रहे
णतात्पर्यकथनं परस्य भाष्यकारैः कृतपं
चीकरणस्य व्याख्यानरूपे वार्तिके सुरेश्वरा
चार्यैरभिहितं अकारमात्रं विश्वः स्यादुकार
स्तैजसः स्मृतः प्राज्ञो मकार इत्येवं परिपश्ये
त्क्रमेणतु अत्र विश्वादिषु वैश्वानरादीनामंत
र्भावं सिद्धं कृत्वा न पृथगुपादानं कृतमिति मं
तव्यं समाधिकालात् प्रागेवं विविच्यात्मनिश्चय
न्ततः स्थूलसूक्ष्मक्रमात्सर्वं चिदात्मनि विला
पयेत् अकारं पुरुषं विश्वमुकारे प्रविलाप
येत् पुरुषोत्र वैश्वानरः उकारं तैजसं सूक्ष्मं
मकारे प्रविलापयेत् अत्र समष्टिसूक्ष्मशा
रीरनियंत्रनयानडुपाहितः परमेश्वरः सूक्ष्म
शाह्यार्थः मकारं कारणं प्राज्ञं चिदात्मनि वि
लापयेत् अत्रांतर्यामी मायामात्रोपाधिकः
कारणशाह्यार्थः चिदात्माहं नित्यशुद्धबुद्ध
मुक्तसदद्वयः परमानंदसंदोहवासुदेवोऽह

१
सि॰ले
टी॰
८२

82

मोस्मीति यतोऽहं चिदात्मावशेषितः अतोऽहं
नित्यशुद्धबुद्धादिरूपो वासुदेव इत्यर्थे अंगी
कारात्मक ओंकार इत्यर्थः इतिशब्दस्सोनर
स्याकान्वयी ज्ञात्वा विवेचकं चित्तं तस्मिन्वि
लापयेत् इति उक्तप्रकारेण केवलचिदात्मा
नमवशिष्टं ज्ञात्वा विवेचकं विलापकं तच्चि
त्तं तस्मिन्निति यथा ज्ञेवासुदेवे विलापयेत्स्था
पयेदित्यर्थः चिदात्मनि विलीनं चेतश्चित्तं न
विचालयेत् पूर्णबोधात्मनासीनं पूर्णाचलस
मुद्रवत् चिरकालं समाधिं कुर्यादिति वार्ति
कार्थः एवं समाहितो योगी श्रद्धाभक्तिसमन्वि
तः जितेंद्रियो जितक्रोधः पश्येदात्मानमद्व
यं आदिमध्यावसानेषु दुःखं सर्वमिदं यतः
तस्मात्सर्वं परित्यज्य तत्त्वनिष्ठो भवेत्सदा यस्य
¨ तत्त्वनिष्ठाव्यतिरिक्तं प्रकृष्टसाधनं तत्वेन लो
कशास्त्रसिद्धं सर्वं कालत्रयेऽपि दुःखाविना
भूतं तस्मात्सर्वाविधिना संन्यस्य उक्तरीत्यात
त्वनिष्ठां समाधिलक्षणां कुर्यादित्यर्थः त
देवाह इमां विद्यां प्रयत्नेन योगी सन्ध्यासु
सर्वदा समभ्यसेदिहामुत्रभोगानासः ॥

क्तथीस्तथीरिति इमांसमाधिलक्षणांविद्यो
स्तथीरात्सिकतमोदिरक्तोभूत्वासंध्यास्तप
क्तस्तसदात्मसेदित्यर्थः यःपश्येत्सर्वगेशा
न्तमनंतात्मानमह्वयं नतेनकिंचिदाप्तव्यं
ज्ञातव्यंवावशिष्यते कृतकृत्योभवेद्विद्वा
न्जीवन्मुक्तोभवेत्सदा अविद्यातिमिरातीं
तंसर्वाभासविवर्जितं आनंदममलंशुद्धं
मनोवाचामगोचरं वाच्यवाचकनिर्मुक्तं हे
योपादेयवर्जितं प्रज्ञानघनमानंदंवैष्णवं
पदमश्नुतइति आभासपदंचिदाभासपरं
वाच्याःविश्वादयःवाचकाः आकारादयः प्र
कृतत्वात् हेयेडःखे उपादेयेविषयसुखे
मित्यर्थः तथामांडूक्यश्रुतौसमाधिनिष्ठा
विवक्षामभिप्रेत्यगौडपादीयेप्युक्तं युंजी
तप्रणवेचेतः प्रणवोब्रह्मनिर्भयं प्रणवे
नित्ययुक्तस्यनभयंविद्यतेक्वचित् इतिसंक्षे
पः ननुश्रवणादिरूपसांख्यमार्गेणैवतत्व
प्रतिपत्तिसंभवात्किमुमुक्षोर्योगविधिनेत्य
तआह प्रतिपत्तिसौकार्यायेति यस्मात्मु
ह्येस्त्वन्यासिनः बुद्धिमांद्यादकौशलस्तेन

पिन्यायवत्तुत्पादनक्रमशालाचार्यीयभावाद्धासं
ख्यमार्गेन संभवतीति तस्यानायासेन ब्रह्म
तत्त्वप्रतिपत्तिसाधनतया बुद्धिपूर्वकप्रवि
लापनक्रमेण समाधिविधानं मांडूक्यादौउ
क्तं मांडूक्यतापनीयपंचीकरणादौ विहित
ब्रह्मोपासनं प्रकृत्यध्यानदीपे ॥ इत्यमे
व भगवत्पादैर्गौडपादीयविवरणे व्याख्याते
दृक्दृश्यविवेके तच्चित्रदीयवत्सूत्पादितं कू
टस्थजीवकोटावेतद्भाव्यचित्रविध्यप्रक्रिये
वालेविनेतिविशेषः तत्र खलु कं जलाशय
तरंगबुद्बुदन्यायेनोपपत्तिपरिकल्पना जीव
स्त्रिविधः पारमार्थिको व्यावहारिकः प्राति
भासिकश्चेति तत्रावच्छिन्नः पारमार्थिको जी
वः ॥

श्रीविद्यारण्यगुरु भिरधिकारीदर्शितः अत्वं
तद्बुद्धिमांद्याद्धासामग्र्यावाप्यसंभवात् यो विचारं न ल
भते ब्रह्मोपासीनसोऽतिक्षामिति अव्याकृतस्येति अन
भिव्यक्तजगद्दाविनाऽव्याकृतपदेन लक्षणया परमे
श्वरस्तत्र न तत्र व्यवल्पित इति कृत्वा नेन तन्निर्देशः कृतः
मांडूक्यश्रुतावानंदमयस्य ईश्वरत्ववचनेन तदभेदवि
वक्षयेत्येतत्तन्मांडूक्यश्रुतिव्याख्यानरूपस्य गौडपादी
यस्य विवरणरूपे भाष्ये भाष्यकारैरेवोक्तमित्याह अत्र

मेवेति श्रीविद्यारण्यगुरुभिश्चित्रदीपेस्वोक्तं चिद्वात्त्रै
विध्यं विहाय ग्रन्थान्तरे जीवद्वैध्योविशुद्धाचिदिति वृद्ध
वचनसिद्धं त्रैविध्यमेवावलम्ब्य जीवस्य त्रैविध्याख्यो
विशेष उक्त इत्याह दृक्कूटस्थपविवेकेनेति तत्राह
उक्तविशेषाध्यकः कूटस्थस्य जीवत्वं कूटावन्तभावमे
वदर्शयति नत्वेति दृक्कूटस्थपविवेकाख्यग्रन्थ इत्य
र्थः हिशब्दः प्रसिद्धिद्योतकः जलाशयतरंगेति य
थासमुद्रादिजलाशये तरंगा उपरिभावेन तिष्ठंति
तेषु चोपरिभावेन बुद्बुदास्तिष्ठंतीति इदं प्रसिद्धमिति हि
शब्दार्थः न्यायो दृष्टांतः एवं कूटस्थस्योपरि व्यावहारि
कोंतःकरणप्रतिबिंबरूपो यावद्व्यवहारमनुवर्त्त
मानो व्यावहारिकजीवः कल्प्यते तस्य चोपरिभावे
न स्वप्नकालेवासनामयप्रातिभासिकरथादिवहास
नामयांतःकरणप्रतिबिंबरूपः प्रातिभासिकजीवः
कल्प्यत इत्यर्थः नत्वेति त्रिविधजीवमध्य इत्यर्थः अव
छिन्न इति देहद्वयावच्छिन्नकूटस्थ एवैतन्यरूप आत्मा
पारमार्थिकजीव इत्यर्थः अहं ब्रह्मास्मीति महावाक्ये
षु जीवब्रह्मणोरभेदः प्रतिपाद्यते स च पारमार्थिक
जीवकल्पने सति निर्वहति अन्यथा व्यावहारिकप्रा
तिभासिकजीवयोरपि ॥

तस्मिन्नवच्छेदकस्य कल्पितत्वेपि अवच्छेद्य
स्य तस्याकल्पितत्वेन ब्रह्मणाभिन्नत्वात् त
माहत्वास्थितायां मायायां कल्पितेंतःकरणे

चिदाभासोऽन्तःकरणतादात्म्यापत्त्याहमित्य
भिमन्यमानो व्यावहारिकः तस्य मायिक
त्वेऽपि यावद्व्यवहारमनुवृत्तेः स्वप्नेतमप्या
हत्याश्रितया मायावस्थाभेदरूपया निद्र
याकल्पिते स्वाप्नदेहादावभिमानी प्राति
भासिकः ॥

किंरूप्यादिवत्स्वरूपतो मिथ्यात्वेन सत्यब्रह्माभेदायोगात्
देहद्वयावच्छिन्नकूटस्थरूपपारमार्थिकजीवस्य त्वबे
दकीभूतदेहद्वयस्य कल्पितत्वेऽपि स्वतःसत्यत्वात् संभव
ति ब्रह्माभेद इति पारमार्थिकजीवकल्पनायाः प्रयोजनं द
र्शयति तस्मिन्निति अवच्छिन्नजीव इत्यर्थः व्यावहारिक
जीवं निरूपयति तमिति कूटस्थमात्मानमाहत्याविद्यायां
स्थितायां सत्यां कूटस्थात्मनि कल्पिते यदंतःकरणं तत्र य
श्चिदाभासः व्यावहारिकजीव इत्यर्थः तदुक्तं कूटस्थे क
ल्पिता बुद्धिस्तत्र चित्प्रतिबिंबक इति अहमित्यभिमन्यमा
न इति अहमित्येवकाराकाभिमानकर्तेत्यर्थः नन्वहमा
कारवृत्तिरूपेण परिणममानेनांतःकरणेनैवाहमभिमान
वत्त्वयुक्तं न तद्विस्फुलिंगबिंबस्यात आह अंतःकरणेति
तस्य व्यावहारिकत्वे युक्तिमाह तस्येति नच व्यावहारि
कजीवे मानाभाव इति वाच्यं अहंकर्ता भोक्तेत्यादिरूपा
हमनुभवस्यैतत्रमानत्वात्कर्तृत्वभोक्तृत्वाद्यात्मसंसा
राश्रयत्वस्यान्यत्रायोगाच्च नचांतःकरणे तत्संभवः त
स्य चिदाभासशून्यस्य चैतन्यधर्मत्वेन प्रसिद्धकर्तृत्वाद्या

श्रयत्वायोगात् चिदाभासस्य तु चेतनात्मप्रतिबिंबतया
मिथ्याभूतस्यापि चेतनत्वव्यवहारयोग्यत्वेन तद्धर्मा
णां चेतनधर्मत्वप्रसिद्धिविरोधाभावात् पारमार्थिक
जीवस्य च संसाराश्रयत्वेन संभवति न कूटस्थत्वादि
तिभावः तमपीति व्यावहारिकजीवमपीत्यर्थः व्याव
हारिकजीवो हि जाग्रद्दशायामात्मानं ब्राह्मणं देवदत्तं
यज्ञदत्तपुत्रं विष्णुभक्तं मन्यते स्वाप्नजीवस्तु स्वप्नावस्था
यामात्मानं दत्तप्रियं विष्णुशर्मनामानं नारायणपुत्रं म
हादेवभक्तं मन्यते अतो जाग्रज्जीवस्यावरणसिद्धप्रा
तिभासिकजीवक ॥

स्वप्रपंचेन सह तत्तद्द्रष्टृजीवस्यापि प्रबोधे
निवृत्तेरिति एवमेते प्रतिबिंबेश्वरवादिना
पक्षे भेदादर्शिताः विवरणानुसारिणस्त्वाहुः
विभेदजनकेऽज्ञाने नाशमात्यंतिकं गते आ
त्मनो ब्रह्मणो भेदमसंतं कः रिष्यति इति स्म
त्यापकस्यैवाज्ञानस्य जीवेश्वरविभागोपाधि
त्वप्रतिपादनाद्बिंबप्रतिबिंबभावेन जीवेन
जीवेश्वरयोर्विभागः नोभयोरपि प्रतिबिंब
भावेनोपाधिद्वयमंतरेणोभयोः प्रतिबिंबत्वा
योगात् ॥

ल्पकमाह निद्रयेति ननु मायायास्सर्वकल्पकत्वाभ्युप

१
सि॰ले॰
टी॰
८५

85

वामात्कथं निद्रायाः कल्पकत्वमप्रसिद्धं नापत्तेरित्याशं
क्य निद्रायास्तदवस्थारूपत्वाभ्युपगमान्नोक्तदोष इत्या
शयेनाह मायेति न च निद्रायां मायालक्षणाभावात्क
थं तदवस्थाविशेषरूपत्वमिति वाच्यं आवरणविक्षे
पशक्तिमत्त्वं हि मायालक्षणं तस्य लक्षणस्य जाग्रज्जी
वावरिकायां स्वप्नजगदात्मकविक्षेपकारिण्यां च निद्रा
यामक्षतत्वादिति भावः प्रातिभासिकजीवकल्पनायाः
प्रयोजनमाह स्वप्नदेहादाविति व्यावहारिकजीवस्य
हृतत्वेन स्वप्नकालेऽहमभिमानकर्तृत्वासंभवादिति
भावः तस्य प्रातिभासिकत्वे हेतुमाह स्वप्नप्रपंचे नेति
प्रबोधकाले ब्राह्मणोऽहं न क्षत्रिय इत्यादिरूपेण बोधे
न स्वप्नदृष्टक्षत्रियादिरूपस्य बाधानुभवादिति भावः
ईश्वरविषये उक्तं वक्ष्यमाणप्रकारभेदज्ञानार्थमुपसं
हरति एवमिति बिंबचैतन्यमेवेश्वरो न प्रतिबिंबवि
शेष इति वक्ष्यमाणविशेषार्थकस्तु शब्दः विभेदजन
कत्वं जीवेश्वरभेदस्येति प्रयोजकत्वं विवक्षितं न तु
यथोक्तं तेन भेदस्यानादित्वाभ्युपगमात् आत्यंतिक
मिति स्वापप्रलयादौ अज्ञानकार्यनाशेन तत्कारणा
ज्ञानस्यापि नाशोऽस्ति परिणामपरिणामिनोरभेदात्
स चाज्ञाननाशो नात्यंतिकः पुनरुत्थानात् मुक्तौ तु
तत्त्वज्ञानेन स्वरूपेणापि नाशोऽस्ति स चात्यंतिकः पु
नरुत्थानाभावादिति मत्वा अज्ञाननाशस्यात्यंतिकं वि
शेषणं दत्तं यद्वा जीवन्मुक्तिकाले अज्ञानस्यावरणां
शेन नाशेऽपि विक्षेपांशनाशाभावादनात्यंतिकस्तना

णः विदेहमुक्तौ तत्रात्यंतिकोऽस्तानुनाश इति तदभिप्रा
यं न हिष्ठावरणमिति भावः प्रतिबिंबत्वायोगादिति
न च जीवेशावाभासेन करोति माया चाविद्या च स्वय
मेव भवतीति श्रुत्या उभयोः प्रतिबिंबत्वप्रतिपादन
विरोध इति वाच्यं प्रतिबिंबत्ववद्बिंबत्वस्यापि कल्पित
तयाकृतिगताभासपदेन प्रतिबिंबवद्बिंबस्यापि ग्रह
णोपपत्तेः ॥

तत्रापि प्रतिबिंबो जीवः बिंबस्थानीय ईश्वरः
तथा सत्येव लौकिकबिंबप्रतिबिंबदृष्टांते
न स्वातंत्र्यमीश्वरस्य तत्पारतंत्र्यं जीवस्य च यु
ज्यते ॥

ननु लोके प्रतिबिंबत्वविशिष्टमुखे मुखाभासत्वव्यव
हारात् बिंबत्वविशिष्टमुखे तथाव्यवहाराभावादा
भासपदं मुख्यवृत्त्या बिंबचैतन्यं प्रतिपादयितुं न श
क्नोतीति चेत् प्रतिबिंबवद्बिंबस्यापि विशिष्टरूपेण
कल्पिततया कल्पितत्वगुणयोगेन बिंबपरमाभास
पदं वक्तव्यं तच्च न संभवति सकृदुच्चरितस्याभासप
दस्य मुख्यवृत्त्या प्रतिबिंबपरत्वं गुणवृत्त्या बिंबपरत्व
मिति कल्पनस्य व्युत्पत्तिविरुद्धत्वात् न वाजहल्लक्ष
णयाऽऽभासपदस्य बिंबप्रतिबिंबोभयपरत्वाभ्युप
गमे नायं विरोध इति वाच्यं उभयोरपि प्रतिबिंबरूपता
मादायाभासपदस्य मुख्यार्थपरत्वसंभवे सति लक्ष
णाकल्पनाया एवानिर्मूलत्वादिति चेदुच्यते यथाऽऽक

न्तं जीवेशयोरुभयोरपि प्रतिबिंबरूपत्वं न संभवति
बिंबभूतचैतन्यस्य सूर्यवदेकत्वेन उपाधिभेदं विना
प्रतिबिंबद्वयासंभवात् न च माया चाविद्या च स्वय
मेव भवतीति वाक्यशेषेण मायाविद्यारूपोपाधिद्व
यप्रतिपादनात्प्रतिबिंबद्वयानुपपत्तिरिति वाच्यं
तेन स्वयं शुद्धोपात्तायाः प्रकृतमूलप्रकृतेर्मायात्वा
विद्यात्वलक्षणरूपभेदप्रतिपादनेपि प्रतिबिंबद्वया
पेक्षितोपाधिद्वयाप्रतिपादनान्मायाविद्ययोः स्वरूप
तो भेदस्यासिद्धांतविरुद्धत्वाच्च तस्माद्यथाश्रुतासं
भवादेकस्यैवाज्ञानस्य जीवेशविभागप्रयोजकत्वप्र
तिपादकस्मृत्यनुरोधाज्जीवेशावाभासेन करोती ।
तिश्रुतावाभासपदमजहल्लक्षणया बिंबप्रतिबिंबो
भयपरमिति विवरणानुसारिणामाशय इति तत्रापी
ति बिंबप्रतिबिंबयोरुभयोर्मध्ये इत्यर्थः तत्र प्रश्न
माह तथा सत्येवेति बिंबचैतन्यस्यैवेश्वरत्वाभ्युपग
मे सतीत्यर्थः स्वातंत्र्यमिति एष सर्वेश्वर एष भूताधि
पतिरित्यादिश्रुतिसिद्धमिति शेषः तत्पारतंत्र्यमिति
एष ह्येव साधु कर्म कारयति यमात्मानमन्तरो यमय
यतीश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वेत्यादिश्रु
तिस्मृतिसिद्धमिति शेषः ॥

प्रतिबिंबगताः पश्यन्नृजुवक्रादिविक्रियाः
पुमान् क्रीडेद्यथा ब्रह्म तथा जीवस्थविक्रि
याः इति कल्पनं त्वकरीत्या लोकवत्तु लीला

कैवल्यमितिसूत्रमपिसंगच्छते स्वच्छा
नप्रतिबिंबितस्यजीवस्यांतःकरणरूपो
त्तानपरिणामभेदोविशेषाभिव्यक्तिस्था
नंसर्वतःप्रसृतस्यसवित्प्रकाशस्यद
र्पणाद्व ॥

लौकिकदृष्टांतमेवकल्पतरुश्लोकोदाहरणेनदर्शि
यति प्रतिबिंबगताइति यथालोकेकश्चित्पुरुषःस्व
प्रतिबिंबगताःऋजुवक्रादिविक्रियाः बिंबभूतस्वप्र
युक्ताःपश्यन्क्रीडतितथाब्रह्मापिजीवस्यविक्रियाः
प्राणिकर्मानुसारेणस्वप्रयुक्ताःपश्यन्क्रीडतीतियो
जनाकल्पतरूक्तरीत्याईश्वरस्यस्वातंत्र्यप्रतिपत्त्युप
योगित्वेश्वरस्यस्वातंत्र्यप्रतिपादकंसूत्रमपिसंगच्छ
तइत्यर्थः सूत्रार्थस्तुईश्वरस्याप्तकामत्वेनप्रयोजनो
द्देशाभावात् सृष्ट्यादिव्यापारेषुप्रवृत्तिर्नसंभवती
तिसर्वपक्षव्याहत्यर्थकस्तुशब्दःईश्वरस्यसृष्ट्यादिप्र
वृत्तिलक्षणाक्रियाकेवलंप्रयोजनोद्देशंविनैवली
लालोकवत् यथालोकेसार्वभौमादेस्सर्वैर्मानुषैः
भोगैस्संपन्नतमस्यप्रयोजनाभिसंधिंविनैवक्रीडा
दृष्टपनेनवत् किंचईश्वरस्यप्रयोजनोद्देशाभा
वेपिस्वभावादेवसृष्ट्यादिप्रवृत्तिरुपपद्यते दृ
श्यतेहिसुखोद्रेकानुभवप्रयुक्ताहासगानादि
रूपाप्रयोजनोद्देशराहित्यालीलाप्राणिनांस्वाभा

विकीनहितत्वप्रयोजनमपिसंभावयितुंशक्यते
डः खेदेकेरोदनवत्सुखोद्रेकेहासगानादेः प्रयो
जनरहितस्यसर्वानुभवसिद्धत्वात् अतए
वहसितरुदितादिष्वकारणमेवप्रवृत्तिन
प्रयोजनं उक्तंचमांडूक्यकृतौ देवस्यैषस्व
भावोयमाप्तकामस्यकास्पृहेति एषःस्पृहा
दिव्यवहारइत्यर्थः किंचस्वप्नसृष्टिवन्माया
मयीप्रपंचसृष्टिरस्माभिरुपेयते नचत
त्प्रयोजनप्रश्नोन्याय्यस्वप्नसृष्टौप्रयोजन
प्रश्नादर्शनादितिभावः नतुयद्यज्ञानंजी
वस्योपाधिस्तर्हिव्यर्थमंतःकरणस्यजी
वोपाधित्ववर्णनंसूत्रभाष्यादिषुतत्राह
अज्ञानेति विशेषाभिव्यक्तिस्थानमिति अ
विद्याप्रतिबिंबचैतन्यरूपस्यसुषुप्तिसा
धारणस्यप्रमातृत्वकर्तृत्वभोक्तृत्वादिवि
शेषरूपेणयाऽभिव्यक्तिरुपलब्धिस्तस्याः
स्थानमुपाधिरित्यर्थः ॥ ।

ऽनन्तस्य न तदुपाधिकत्वव्यवहारोपि नैना
वनाः ज्ञानोपाधिपरित्यागः अन्तःकरणो
पाधिपरिच्छिन्नस्यैव चैतन्यस्य जीवत्वेपागि
नः कार्यव्यवहारोपि स्यानत्वावपपनेः ॥

पनरुक्तं भवति कर्तृत्वादिधर्माणां केवलाज्ञानपरि
णामत्वाभावेन तदुपाधिमात्रजीवस्य कर्तृत्वादिध
र्मत्वपरिहारोपलाभः किं तु कर्तृत्वादिविशेषवदंतःक
रणतादात्म्याध्यासादेव तल्लाभ इति तदुपाधि
निरूपणावश्यमिति अत इति अन्तःकरणस्य विशे
षाभिव्यक्तिस्थानत्वाभ्युपगमादित्यर्थः व्यवहारो
पीति कार्योपाधिरयं जीव इति श्रुतौ तत्र भाष्यादि
षु चोक्तत्वेनेति शेषः विभेदजनके ज्ञाने नाशमात्यंतिकं ग
ते आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यतीति वि
ष्णुपुराणवचनेन जीवस्याज्ञानोपाधिकत्वव्यवहारव
दित्यपरार्थः ननु कार्योपाधिरयं जीव इति श्रुतिव
लादज्ञानोपाधिपरित्यागइति नः कार्योपाधिकत्व
विशेषणस्य कारणोपाधिकत्वव्यावर्तकत्वादित्या
शंकास्पष्टंनिविशेष्यात्रनस्य कारणोपाधिव्यावर्तक
त्वमेवपन्नइत्याशयेनाह नैतावतेति श्रुतौ कार्यो
पाधिकत्वविशेषणमात्रेणेत्यर्थः ननु श्रुतिविरो
धेस्पष्टेनैवात्र व्याख्यानयत्नसंभवेन ननु नयनप्रकारेश्च

सि॰ ले॰
टी॰
८८

स्य स्वनावत्तानपदेन तत्कार्यान्तःकरणपरं जीवोपा
ध्यन्तःकरणस्य नानात्वेप्यज्ञानस्यैकत्वं ज्ञानमभि
प्रायेण यद्वान्तःकरणावच्छिन्नश्चात्मा जीवस्तदनव
च्छिन्नश्चात्मा ईश्वर इति जीवब्रह्मविभागप्रयोजक
मन्तःकरणमिति स्वस्य पर्यो भविष्यतीति इमामाशं
कां निवर्तयितुं कार्योपाधिमात्रस्य जीवत्वोपाधित्वं
निराकरोति अन्तःकरणोपाधिपरिच्छिन्नत्वे तु ति
नाज्ञानोपाधिकस्येश्वरस्येव कायाद्यं अत्रयपतेरिति
कायव्यूहाधिष्ठाने हि युगपदनेकशरीरनिय
न्तृत्वं न च योगिनो योगप्रभावान्निर्मितेषु सर्वश
रीरेषु युगपदवस्थितस्य वक्तव्य न चान्तःकरणा
वच्छिन्नरूपस्य योगिनस्तत्सम्भवति न स्य परिच्छि
न्नादज्ञानस्य जीवोपाधित्वे तु तत्सम्भवति तस्य
व्यापकत्वेन तदुपाधिकस्य योगिजीवस्य युगपत्स
र्वशरीरेषु सन्निधानोपपत्तेस्तथा च स्वस्य पूर्वतया
स्स्तेईवैलत्वेपि कायव्यूहाधिष्ठानं वानुपपत्ति
रहितस्सन्नैवलवत्तानन्तदन्तरायेन कार्योपाधि
रयं जीव इति स्फुटो कार्योपाधिपदे स्वरूपकथन
मात्रपरं न कारणोपाधिव्यावर्तकविशेषणपर
मिति भावः ॥

न च योगप्रभावात् योगिनोन्तःकरणका

यव्यूहाभिव्यक्तियोगं वैपुल्यं प्राप्तो
योगिनन्दव्यक्तित्वसकायव्यूहापि प्रा
नस्वेषु ज्ञान इति वाच्यं प्रदीपवदावेशस्त
था हि दर्शयतीति यथा लोपस्यापि कर
णाभ्याद्यादिष्वका पद्वैहमतिदेहमे
नः करणसवत्वादिवेशिनसेवयाग
प्रभावान् स्वदेहरूपवर्णनान् ॥

वैपुल्यमिति व्यापकत्वमित्यर्थः अपि स्थानत्वमिति
मेरकत्वमित्यर्थः प्रदीपवदिति यथा एकस्य प्रदी
पस्यानेकवर्त्तिकावेशः तथा योगिनो योगप्रभ
वादनेकदेहकदावेशः यद्यपि प्रदीपस्य वर्त्या
दिहृदयानोच भेदोस्ति योगिनस्तु सर्वदेहेष्वेक
मिति हृदयानतदाहंतिकयोर्वैषम्यमस्ति तथा
पि दीपतज्जात्यभेदव्यक्तिस्थाशयतयोः संगतिरव
गन्तव्या तथा हि दर्शयति स्फुति रेकस्य योगिनो
नेकधाभावं स एकधा भवति त्रिधा भवति पंचधा
समयेत्यादिका न च योगिनो युगपदनेकशरीरे
ष्ववस्थानं मनेराग स्फुरति सिद्धानेकधाभाव उप
पद्यत इति सूत्रार्थः स्वदेहरूपवर्णनादिति तथा
एकस्यैवान्तः करणसकायव्यूहाभिव्यक्तियोगप
वैपुल्याभ्युपगमे भाष्यादिविरोध इति भावः अत्र

सि॰ ले॰
टी॰
८५

यद्यपि योगिनोऽनिन्नसिज्ञानः करणमेव योगप्रभा
वाद्देहत्वसाध्यसावच्छिन्नत्वेन स्वरूपस्य योगिनः
कायव्यूहाधिष्ठानभोगादिके बहूयनीमेव भा
ष्यादीनां नानार्यवक्रसूचिनेन नन्वयास्कनेना
नान्तःकरणसर्गैश्चागेन्कानेकान्तःकरण
सृष्ट्युपगमेऽप्यसत्कार्यवादापातात्कल्पनागौरवा
द्बहिरण्यगर्भादीनां योगप्रभावादेवाउव्यापित्व
महत्त्वान्तःकरणाभ्युपगमाद्व न हि हिरण्यगर्भादी
नां पूर्वजन्मनियजमानावस्थायां तदीयान्तःक
रणानां व्यापित्वे प्रमाणमस्ति नन्वासनासदा
येन्तःकरणानामपि व्यापित्वापत्तेः भाष्यादिषु
चान्तःकरणस्य विवर्धनस्य मतेनानराभिप्रायतो
पपत्तेश्चापि वक्ष्ये योगशास्त्रे सूत्रयोगिनामनेक
शरीरयोगप्रक्रियेति भाष्ये एवमतोऽनेकोपदर्शि
नात् योगशास्त्रे सैव वच एष्य प्रक्रियेति एव का
रान्वयोपपत्तेस्तथापि माहात्म्यापि करणय
थाष्कनभाष्याद्यभिप्रायप्रोदहृषणमिति मन्त
व्यं ॥

प्रतिबिंबे विवादे दमात्रस्याप्यसत्वेन स्व
रूपेण तस्य समन्वात् न प्रतिबिंबरूपजी
वस्य स्वमात्रान्वयासंभव इति ननु दीतिरे

केणामुक्तान्वयावच्छिन्नरूपजीवांतरे
वाप्रतिविंवजीवातिरिक्तजीवेश्वरविल
क्षणकूटस्थसाक्षिनैवेनन्यांतरेवाक
ल्पनैरपेक्ष्यविनाशीवारैः यमात्मेति श्रु.
वणंनीवस्यनडुपापिनिहूतोभ्यनिविं
वभावापगमेपिस्वरूपंनैवनश्यती
त्येनन्यारेननदतिरिक्तकूटस्थनामचै

तन्यांतरपरे ॥

वस्तुनस्त्वंग्रंतःकरणावच्छिन्नचैतन्यंजीवस्तदन
वच्छिन्नमीश्वरइतिपक्षेप्यंऽज्ञानगतचैतन्यस्यसर्वी
त्सनानदवच्छेदादनवच्छिन्नचैतन्यरूपेश्वरस्या
ज्ञहहिरेवसतंस्यादिवस्यमाणहषेणानान्यर्थ य
दिचानवच्छिन्नचैतनन्मीश्वरइस्यनेननिरूपाधि
कंचैतन्यमीश्वरइतिविवक्षितेननदानस्यसर्वेश्वरस
र्वेनोज्ञहहिरेवसनापतिदोषाभावेपिकारणो
पाधिरीश्वरइतिस्मृतिविरोधदोषाडवारस्तस्मा
त्कारणोपाधिकनमीश्वरवजीवस्यापुपगत
व्यस्तन्नसारादितिस्थितं यन्नविंवदीपमति
विंवचैतन्यंरूपजीवस्यस्वरूपतोमिथ्यात्वानस्व
रूपान्वयायोगइतितदन्वययोग्यकूटस्थना
मकजीवस्यरविलक्षणंकिंविच्चैतन्यपरिकल्प्य

सि॰ले॰
टी॰
५॰

90

विद्यानिर्विघ्नंदर्शितेनं यदपिवहक्कहद्यपविवेके
प्रतिबिंबमिथ्यात्वमेवाश्रित्यमनस्त्वयायाव
च्छिन्नचैतन्यस्यपारमार्थिकजीवत्वकल्पितेन
तुभयमप्युक्तं बिंबप्रतिबिंबयोर्भेदमात्रस्य
कल्पितत्वपक्षेतस्यपार्भेदमात्राभावादिना
मायेनाह प्रतिबिंबेबिंबादिति स्वप्नपक्षक
ल्पितत्वस्यवच्छेदेमात्रस्यावश्यार्थः ननदतिरेके
णेति प्रतिबिंबजीवातिरेकेणजीवान्तरंवाक्ष
दृश्यप्राद्भिनचैतन्यान्तरंवानकल्पनीयमितिसि
वेयः एवंव्यावहारिकजीवातिरेकेणप्रातिभा
सिकजीवोपिनकल्पनीयः प्रमाणाभावाच्चव्या
वहारिकजीवस्यस्वप्नकालेऽप्यहन्त्वेनतस्य
तदाव्यवहारत्वानुपपत्तिस्तत्कल्पनेप्रमाणमि
तिवाच्यं जीवचैतन्यस्यावरणाभावस्यसात्वेनि
रूपणावसरेवक्ष्यमाणत्वेनजाग्रज्जीवस्यस्वप्नेपि
व्यवहारकर्तृत्वोपपत्तेः योहंस्वप्नेश्रीकृष्णमद्रा
क्षमएवेदानींजाग्रन्तं स्मरामीतिजाग्रत्स्व
प्नमहोपावरभेदप्रत्यभिज्ञानात् संस्कारोह्येयाभा
वादिकारणवशादेवकदाचिदालम्बनतायप्र
तीत्युपपत्तेः स्वप्नस्यप्रपंचेनसहाहंकारस्य
शेनप्रातिभासिकजीवकल्पनेप्रमाणमितिवा
वा प्रबोधकालेनाहंतद्विषयइत्यादिरूपबाध ॥

नीलोपाधिनोन्तःकरणादिनावच्छिन्नं
चैतन्यं विंबभूतमीश्वर एव योविज्ञानेति
ष्ठन्नित्यादिश्रुत्या ईश्वरस्यैव जीवसन्नि
धानेनान्तर्यामिभावेनविकारोन्तरा
वस्थानश्रवणादिति ॥

कथमयमस्मान्न्यायोपि नन्वविद्यनादिमात्रवाचकत्वे
नस्वमद्रष्टृत्वापत्ताभावादन्यथा सर्वोदाहृतमदृष्टक
मन्यभिज्ञानविरोधान्न स्यान्याप्ति भासिकजीवकल्प
नमपि शमाणिकं न भवतीति वाच्यं यदपि विज्ञान
विंध्यवादिभिरुक्तं नान्यथानुविनश्यतीत्यविनाशी
वा अरे यमात्मेति वाक्याभ्यां प्रक्रान्तेनप्रज्ञानघनात्म
नि विनाशित्वाविनाशित्वरूपविरुद्धधर्मद्वयप्रसक्ति
पादनात्तदुपपत्तये विनाशिप्रतिबिंबव्यतिरेकेण वि
नाशरहितकूटस्थचैतन्यांशसद्भावो नीतितदपि मंदं श्रु
त्यापातिविंबचैतन्यरूपेजीवएवप्रतिविंबतद्रूप
विशेषणांशनाशाभिप्रायेणविनाशवचनस्यवि
शेष्यचैतन्यांशाभिप्रायेणाविनाशाभावप्रतिपाद
कवचनस्य चोपपत्तेर्यस्मिन् भेदकल्पनस्य गौरवदुष
त्वाहतत्वादित्याशयेनाह अविनाशीवेति तत्त्ववि
यायप्रतिविंबाजीवस्तत्त्वविंबईश्वरः विंबप्रतिविंवा
नुगतचैतन्यशुद्धचैतन्यमितिविवरणपक्षेदेहः

सि॰ ले॰
टी॰
८१

91

ह्वयोपादानतयानवच्छिन्नस्य पारमार्थिकजीव
नामकतया कूटस्थनामकतया च विद्वानविथ्य
वादिभिरंगीकृतस्य चैतन्यस्य रूपेणानभ्युपेय
ने न तावज्जीवस्वरूपचैतन्यस्यैवानुभवः संभवति
तेषां तदुपादानत्वाभावेन देहद्वयोपादानकूटस्थ
स्य तयोरनुभावायोगान्नापि बिंबभूतेश्वरेणास्या
नुभवः संभवति ईश्वरस्य जीववदुपाध्यन्तःक
रणादिसन्निहिततया देहादिविकारेष्ववस्था
नेषु प्रमाणाभावात् कूटस्थनामकचैतन्यस्यैव कू
टस्थवादिभिर्व्याख्यानांगीकारादित्यत आह जी
वेनापि नेति अविद्याप्रतिबिंबरूपजीवस्य विशे
षाभिव्यक्तिप्रयोजकोपाधिनेत्यर्थः प्राणवत्त्व
रादिकमादिपदार्थः ईश्वरेणैवेति न स्वरूपबल
नापि प्रतिबिंबरूपजीवस्यैवेत्येवकारार्थः चेतनाचे
तनात्मकेति विलक्षणं चोपादानत्वप्रतिपादकं
श्रुतिस्मृतिसहस्रस्य बिंबभूतेश्वरस्य देहाद्युपा
दानतया देहादिविकारेष्वनवस्थाने प्रमाणाभा
वात् कूटस्थस्य चेतनाभेदमानाभावादिति भावः।
न केवलमुपादानत्वप्रतिपादकप्रमाणमेवं तु प्र
माणं किंतु चेतनाचेतनात्मकसकलजगन्नियन्तृ
त्वप्रतिपादकमेतयोर्भिन्नलक्षणमपि बिंबभूतेश्व

रस्यविकारेष्वनवस्थानेप्रमाणमिमाह योवि
ज्ञानेतिष्ठन्निति ॥

अन्येनत्वनुपात्तेनपहितंनप्रतिबिंबोनयुक्तः
मनेनावनीरूपेणगगनप्रतिबिंबोदाहरण
मप्ययुक्तं ॥

तिष्ठन्निति विज्ञानादन्तरोयंविज्ञानंनवेदयस्य
विज्ञानंशरीरंयोविज्ञानमन्तरोयमयतीत्यादिवाक
मादिपदेनगृह्यते अत्रविज्ञानपदंजीवपरंबृहदार
ण्यके माध्यंदिनपाठेयआत्मनितिष्ठन्नितियथा
यस्मिन्काण्वपाठेयोविज्ञानेतिष्ठन्नितियोपा
ज्ञानदर्शनेनकाण्वपाठेविज्ञानपदस्यात्मपद
समानार्थकत्वावगमादात्मपदंवात्रजीवपरंनत्व
नत्वनूढत्वादात्मपदस्यजीवेश्वरसाधारणत्वेपि
नियमनलिंगेनप्रकृतेजीवपरत्वावगमंभावादि
तिभावः जीवसंनिधानेनेति ईश्वरस्यजीवादि
नियंतृत्वेहिव्याघ्रहिनराजादेःप्रजानियन्तृत्ववत्
भवति किंतुनियम्यजीवादिसंनिधानेनैवयथा
त्मनितिष्ठन्नितिसंनिधानप्रतीतेरित्यर्थः अन्तर्या
मिब्राह्मणवाक्यग्रहणस्यनेयमुपलक्षणं त
थाचभगवद्गीतास्मृतिः ईश्वरःसर्वभूतानांहृद्दे
शेर्जुनतिष्ठति भ्रामयन्सर्वभूतानियंत्रारूढानि

सि॰ ले॰
टी॰
५२

92

माययेति भूतानि प्राणिनः यंत्रे शरीरे तदारूढेन
ञाहं ममाभिमानेन वहं भ्रामयन्निति कर्मानुसारे
ण प्रवर्तयन्निवर्तयन्नर्थः ईश्वरस्यापि चेत्त्वं मायो-
पाधिकमेव न वास्तवमित्याशयेन माययेत्युक्तं
एवं चैतन्यस्य प्रतिबिंबत्वमुपगच्छतामनतभेदेन
जीवेश्वरविभागो दर्शितः इदानीं तदमन्यमुप
गतानामनेन जीवादिस्वरूपं दर्शयित्वा चैतन्यस्य
प्रतिबिंबं निराकरोति अन्येति रूपानुपहिते
ति लोके रूपवत एव चैतन्यादेः प्रतिबिंबो दृष्टो न
तु रूपरहितस्याकाशादेरिति व्याप्तिदर्शनान्नीरूप
चैतन्यस्य प्रतिबिंबत्वासंभव इत्यर्थः इतश्च चैतन्य
स्य न प्रतिबिंबत्वसंभव इत्याह स्वतरां नीरूपस्येति
प्रविद्यातः करणस्याविनियोगः रूपवत एव द्र
व्यस्य प्रतिबिंब इति नियमस्य वक्ष्यमाणरीत्या गग
ने व्यभिचारसत्वेपि रूपवत एव प्रायः प्रतिबिंब
इति नियमस्य न क्वचिदपि व्यभिचार इति मत्वा
स्वतरामित्युक्तं ननु नीरूपगगनस्य कूपजलत
टाकादौ प्रतिबिंबानुभवान्नीरूपद्रव्यस्य प्रतिबिं
बाभाव इति नियमो नास्तीत्याशंक्याह गगने
ति कूपजलादौ तावदालोकप्रतिबिंबसंभवात्तस्मि
न्नालोकेस्मिन् गगनप्रतिबिंबत्वभ्रमो लोकानामिति भा
कल्पनेनैव स्वतन्त्रः तत्र गगनप्रतिबिंबोस्तीत्युक्तं

नियमविरोधात् ॥ ॥

गगनाभोगव्यापिनि सवितृकरमण्डले स
लिले प्रतिबिम्बिते गगनप्रतिबिम्बत्वव्यव
हारस्य भ्रममात्रमूलकत्वात् यन्नो वर्ण
प्रतिबिम्बत्ववादोऽप्युक्तः व्यञ्जकतया
सन्निधानमात्रेणाध्वनियमीणामुदात्त
नादेनावर्णेष्वारोपो येन ध्वनेर्वर्णप्रति
बिम्बोऽपि न कल्पनायानिःप्रमाणक
त्वात् ॥

भ्रमप्रयोजकं दोषमाह गगनाभोगव्यापिनीति
आभोगो विस्तारः गगनोपरिभागे व्याप्य वर्तमान
स्य सवितृकिरणमण्डलादेर्जले प्रतिबिम्बदर्शना
न तत्त्वगगनस्य जले प्रतिबिम्बभ्रम इत्यर्थः नन्व
यथा बहिर्नीलं नभः विशालं नभ इत्यादिरूपेण
गगनमनुभूयते एवं कूपतटाकादिजलेऽपि नी
लं नभो विशालं नभ इत्यादिरूपेण भवत्येव स
प्रतिपन्नः न च कूपजलादौ प्रतीयमानं वैशाल्या
दिगुणकं नभो वस्तुतोऽस्ति अतः प्रतिबिम्बरूपमेव
नत्वदृश्यमानेन नभो भवतीति वक्तव्यं न तस्य कथं
गगनप्रतिबिम्बापलापः क्रियते न च नीरूपस्य

सि॰ ले॰
टी॰
५२

93

तिबिंबासंभवादितिवाच्यं रूपसंख्यापरिमाणादेर्नी
रूपस्यापि प्रतिबिंबदर्शनात् रूपद्रव्यत्वमपि विशेष
णं विवक्षितमिति वाच्यं सिद्धांते द्रव्यगुणादिपरि
भाषाया अनभ्युपगमात् तदभ्युपगमेपि गगनप्रति
बिंबानुरोधेन न रूपोपहितद्रव्यस्य प्रतिबिंबः तदु
पहितत्वे च वस्तुनः स्वगतरूपेण स्वस्मिन्नारोपितरू
पेण वेति नियमकल्पनोपपत्तेश्च तथा च बहिरा
रोपितनैल्यादिविशिष्टगगनस्य जलादौ प्रतिबि
बाभ्युपगमेनालोकं विहायैकं न च जलादौ सप्रति
पन्नालोकप्रतिबिंबातिरिक्तगगनप्रतिबिंबाभ्युप
गमे गौरवमेव बाधकमिति वाच्यं आलोकप्रतिबि
बे गगनप्रतिबिंबत्वस्याभ्युपगमेपि तद्भ्रमविषय
स्यालोकप्रतिबिंबाधिकरणकस्यैव क्लृप्त्या
दिवदिति वचनीयस्य गगनप्रतिबिंबत्वस्याभ्युपग
नव्यत्वेन गौरवस्यानल्पत्वादनुभवानुसारिगौर
वस्यादोषत्वाच्च न स्याद्रूपवन्नपवद्द्रव्यस्य प्रतिबिंब
इति नियमस्य गगनप्रतिबिंबस्थले व्यभिचाराद
वोर इति चेत्सत्यं तथापि चैतन्यस्य प्रतिबिंबो न सं
भवति नीरूपान्तःकरणादेः प्रतिबिंबोपाधित्वा
संभवादित्येवं चेतनार्थं ननु नीरूपेपि पवनेनोद
पटव्यात्मकवर्णानां प्रतिबिंबास्तीतिवक्तव्य
तथा सत्येव दर्पणस्थापामनायाः दर्पणगगनप्रतिबिं

वेणुरवेऽथवा ध्वनिगतानां नानात्वादीनां ध्वनिगतव
र्णांप्रतिबिंबद्वारावर्णेष्वारोपसंभवतितान्यप्या
एवनीद्वयोनः करणाहैनीद्वयात्मनः प्रतिबिंब
संभवइत्याशाकाह्हमानेविघटयति ध्वनाविति

प्रतिध्वनिरपिनसर्वशब्दप्रतिबिंबः पृथ्वी
करणप्रक्रियया पटहप्रयोनिर्थिप्रभृति
शब्दानां तिनिसलिलादिशब्दत्वेनप्रति
ध्वनेरेवाकाशशाब्दत्वेनतस्यान्यशाब्दप्र
तिबिंबत्वायोगात् वर्णाद्वयप्रतिशब्दोपि
न एवं वर्णप्रतिबिंबः वर्णाभिव्यंजकध्व
निनिमित्तकप्रतिध्वनेर्मूलध्वनिवदेव
वर्णाभिव्यंजकत्वेनोपपत्तेः तस्मान्नप्र
त्काशवदंतःकरणावच्छिन्नं चैतन्यं
जीवः नदंतवच्छिन्नं चैतन्यमीश्वरः ॥

ननुपटहाद्यवादिविशेषादिशब्दस्यतिकालेपाषा
णविशेषादिसंनिहिताकाशप्रदेशेषुप्रतिध्वनि
रूपतेस्तः सर्वशब्दप्रतिबिंबएवनमुख्यध्वनिस्त
दुत्पत्तौकारणाभावात् तथा चयथानीद्वयाकाशा
प्रदेशेषुनीरूपध्वनेः प्रतिध्वनिनिरूपः प्रतिबिंबः

सि॰ ले॰
टी॰
९४

94

न च प्रसक्तेन किं न स्यादिति नेत्याह प्रतिध्वनिरपीति
न च प्रतिध्वनेरुत्पादकाभाव शङ्कनीयः आका
शस्येवोपादानस्य सत्त्वान्स्वशब्दस्य निमित्तकारण
स्य सत्त्वाच्च न च प्रतिध्वनेः प्रतिबिंबत्वेनाकाशगु
णत्वं किं न स्यादिति वाच्यं बिंबप्रतिबिंबयोर्भेदप
त्ते प्रतिध्वनिरूपप्रतिबिंबस्य प्रातिभासिकत्वेन व्या
वहारिकगुणत्वानुपपत्ते स्तद्भेदपत्ते बिंबभूतश
ब्दस्यादिपादपेक्षया प्रतिध्वनिरूपप्रतिबिंबस्य भे
दाभावेन तस्याकाशगुणत्वानुपपत्तेरिति भावः
ननु वर्णरूपप्रतिशब्दस्य वर्णप्रतिबिंबत्वमवश्य
वाच्यं तत्सत्त्वे हि वर्णरूपत्वे प्रतिवर्णाभिव्यक्तिस्थ
ले वर्णव्यञ्जककण्ठताल्वादेरभावात् तथा च यथा
ऽत्र पर्वतगुहादिस्थविहिते प्रतीत्युपाधिकाशप्रदे
शे प्रतीत्युपाधिवर्णानां प्रतिबिंबत्वात्प्रसक्तेन किं
न स्यादिति नेत्याह वर्णरूपप्रतिशब्दोऽपीति प्र
तिध्वनिर्वर्णरूपोऽपि शब्दार्थः कण्ठताल्वादिस्थले प्र
न कण्ठादेर्वर्णव्यञ्जकत्वे किं तु कण्ठताल्वाद्यभिघा
तजन्यध्वनेःस्तथात्व यथा मूलध्वनिर्वर्णव्यञ्जकः
एवं प्रतिवर्णाभिव्यक्तिस्थलेऽप्यत्र प्रतिध्वनिर
वर्णव्यञ्जकः संभवतीति न प्रतिवर्णा
नां प्रतिबिंबरूपत्वमप्युपगन्तव्यमित्यर्थः चेतन्य
प्रतिबिंबनिराकरणमुपहरति नस्मादिति चेत

स्वप्रतिबिंबासंभवादित्यर्थः ॥

नैवमेजोनवर्णिनिश्चैतन्यस्यननदेतः
करणोपाधिभिः सर्वात्मनाजीवभा
वेनावच्छेदा ननदवच्छेदरहितवेन
नद्रूपस्यैश्वरस्योड्डहिरेवमनेस्तादि
निषेधविज्ञाने निष्प्रत्विस्यादावनर्थाभि
भावेनविकारान्तरावस्थानश्रवणः
विरुध्यते प्रतिबिंबपक्षेनजलगतस्या
भाविकाकाशस्यैवप्रतिबिंबाकाश
दर्शनादेकत्रद्विगुणीकृत्यस्यहृत्तिरु
पपद्यते इतिवाच्यं यतः प्रतिबिंबप
क्षेपिद्रूपायाबवनेनगीतस्यैवचैतन्यस्य
नप्रतिबिंबाच्यः नन्वजलवदन्याये
नहृत्स्वप्रतिबिंबः नेदनगीतभागस्य
नप्रतिबिंबासंभवात् नहिमेघाव
च्छिन्नस्याकाशस्यालोकस्यवाजलेप्र
तिबिंबवत्तज्जलोनगीतस्यापिनप्रति
बिंबोहरूपत्वेन नवाभ्रुवादीनोवहिरिस्थ

सि॰ ले॰
टी॰
५५

95

निस्तमयेइव जलेनानिर्मज्जनेपि प्रति
विंबोस्ति ॥
अंतःकरणानवछिन्नस्येश्वरस्यांतःकर
णादिषु सर्वविकारेषु परमेश्वरस्यानर्यामिभा
वेनावस्थानप्रतिपादकश्रुतिविरोधशंकने
नैववमिति विरुध्यतइति न श्रावश्रुतिवि-
रोधपरिहाराय प्रतिबिंबपक्षएव स्वीकर्तव्यइ
तिभावः प्रतिबिंबपक्षाश्रयणेपि श्रुतिविरोध
माशंक्याह प्रतिबिंबपक्षेपीति नथावत्स्व
नेविशेषमेवदर्शयति जलगतेति हि गुणाक्र
मेति प्रतिबिंबरूपजीवभावेनतदुपाध्यंतर्यामि
भावेनचेत्यर्थः प्रतिबिंबपक्षेपि अंतर्यामिब्राह्म
णविरोधोदुष्परिहरइत्याह यतइति यतश्च
चेश्वंतर्यामिब्राह्मणेजस्याभावस्तस्मात्तेनानुच
वाच्यमिति संबंधः नवेति अंतःकरणादावि-
त्यर्थः ननु यथा जले कृत्स्नस्य चंद्रमंडलस्य प्रति
बिंबत्वं तथा कृत्स्नस्यैव चेतन्यस्यांतःकरणादौ
प्रतिबिंबस्तनतत्पाप्यनेनगेनचेतन्यभागस्याउ
हिर्भूतस्य नप्राविविंबभूतेश्वरस्यांतरेपिस
त्वेनांतर्यामिब्राह्मणविरोधतादवस्थ्यमितिनेत्याह
नविनि सूक्ष्मेभवमेवदर्शयति नहीति आलोकस्य
वेतिवहिःस्थितस्यतिरोधः जलान्तर्गतस्यापीत्या

काशादेरिवानुषंगः नैवेति जलादेरिवन्यथा: उ
दाहरणेनरमाह नवेति ॥

श्वनोजलप्रतिबिंबप्रतिमेवाकाशादेरि
वानः करणाद्युपायप्रतिबिंबप्रतिन
दनेनगेनसेवबिंबनेस्यादितिबिंबमू
नस्यविकारोनरवस्यानायोगादीश्वरे
नद्यामिवालक्षणोजस्याभावलक्ष्य:

ननः किंनत्राह श्वनइति उपाध्येनगेनभागस्यनत्र
प्रतिबिंबासंभवादित्यर्थः नदनेनगेनसेवृतिवेन
स्वसेतिशेषः दृष्टान्तरोपिनाकस्यनापाइतिभावः
विकारोनभीति श्वेदोनगेनवैवेनस्वभागस्यउपाध्यान
गेनत्वानहहिस्थिनसेववैवेनस्यस्यबिंबनंवाच्यमि
तिबिंबमूनेश्वरोप्युपानवहिरेवस्यादित्यर्थः प्रदि
वप्रतिबिंबपत्तेईश्वरस्यसर्वान्तर्यामित्वप्रतिपादक
श्रुत्याद्यनुसारेणलोकहृहिमनाहस्यकृत्स्नवेन
स्वप्रतिबिंबमुपेत्यान्तर्यामिवालक्षणोजस्यमुपा
धेने नदानवच्छिन्नचेतन्यमीश्वरइतिपक्षेप्यतः
करणाभावावच्छिन्नचेतन्यमीश्वरइति[illegible]वक्ति
नमेनः करणस्यकल्पितत्वेनचेतन्येनः करणा
द्यवच्छेदनाप्यनः करणाभावस्यवास्तवस्यमेव

सि॰ ले॰
टी॰
९८

96

ननु देवद्विजत्वैननत्वरूपस्य रस्य सर्वविकारानन्त-
वस्यानसंभवात्तत्प्रतिपादकश्रुतिगणाजस्यानस
मिति समाधाने वोध्यं अभावस्यापीश्वरोपाधि
त्वमुक्तं न्यूनमिति दोषे अन्तःकरणसाहित्यराहित्या
भ्यां विशिष्टाने उपाधिर्जीवभावस्य ब्रह्मतायाश्च
नान्यथा यथाविधिरुपाधिः स्यात् प्रतिबिंबत्वस्या
न किं सर्वगतो ब्रह्मभेदेन स्फुलिंगत्वेन मिथ्यते श्र
न्यादृष्टिन्यप्यनुमातादिविधमस्तेव नन्वव वेदान्ताना
महत्निः स्यान्निद्रितोयं न्याचार्यं भाषितमिति श्लोका
नामयमर्थः जीवत्वब्रह्मत्वयोरुपाधिरन्तःकरण
साहित्यराहित्याभ्यां विशिष्टं नेमियन्नेनत्साहित्य
जीवत्वोपाधिः तद्राहित्यं ब्रह्मताया उपाधिरिति
जीवेश्वरोपाधिभेद इत्यर्थः नान्यथान प्रकारा
न्तरेण जीवभावाद्युपाधिरित्यर्थः ननु भावस्ये
वोपाधित्वं नाभावस्येत्याशंक्य विनिगमनाविरह
माह यथेति भाववदभावस्याप्यावनेकोपाधित्वे
विशेषो नास्तीत्यत्र हेतुमाह सर्वगतेति स्फुल
लिंगेनामयं ऐक्यं मेवारव्यावनेकत्वे ननुभावरू
पान्तःकरणादेरूपत्वादिरूपाणां जीवोपलब्धिसाध
नत्वात्तस्य जीवोपाधित्वमुक्तमित्याशंक्यान्तः
करणनिषेधस्यापि ब्रह्मोपलब्धिसाधनत्वात्
नस्य ब्रह्मोपाधित्वमुक्तमित्यभिप्रेत्यान तदुपाधि

निषेधस्य ब्रह्मोपलब्धिसाधनत्वे भाष्यकारैरुक्त
मित्याह अनध्याहृतीति अत्र ननु शौहेन ब्रह्मो
ध्यानेन न भवतीत्यनुद्देनः करणादिरूपमपायिज्ञा
ने तस्मान्न तो व्याहृतिर्निषेधः न तद्रूपेण नष्टोपन:
हारेणेत्यर्थः साक्षाद्विपिमुखेन चेदुहेस्यातीम:
न मस्यात्तीसर्वस्य सात्तीपपपन्नस्य एव मन्वानश्या
दिप्रकारेण व प्रहृतिर्वीर्यकन्याब्रह्मणेषापा

पनेनावच्छिन्नस्य जीवस्य कर्तृभोक्तृसमययो
त्पत्तेरन्तःकरणावच्छेदेनान्यप्रदेशा
सभिव्यक्तस्य नश्वरानात्मकानाभ्यागमप्रस
ग इति निरस्तं प्रतिबिम्बपक्षेऽपि सा तेन त
दीन स्वसन्निहितस्य चैतन्यप्रदेशस्यान्तः
करणप्रतिबिम्बस्य च कल्पनया तत्र तदन्तः
करणसंगमनेऽबिम्बभेदानन्तप्रतिबिम्बा
दिभेदाद्युक्तं भावेन दोषो नाप्यस्तु तदन्त
नः करणप्रतिबिम्बो जीव इति पक्षेऽदोष:
नैवाल्पापि विद्याप्रतिबिम्बो जीवः तस्य व तत्र
नत्रगान्तरमेनः करणे जलाशयव्यापिनो
महामेघस्येव जलप्रतिबिम्बस्य तदुपरि वि

सि॰ ले॰ टी॰ ९७

97

स्त्वरस्फीता लोकश्च न च विशेषाभिव्य-
क्तिहेतुरिति पक्षेनायं दोषः अंतःकरण
वदविद्यायोगस्य भावेन प्रतिबिंबभेदानो
पत्तेरितिवाच्यं ॥

मारणमिति न ह्याचउक्तरीत्या प्रतिबिंबावच्छेदपक्ष
योरुभयोरपि चैतन्ये मिथ्यात्वेनान्वयाभावाज्जस्यो
त्वस्यैव सति मनसो नीरूप इत्यादिना चैतन्यप्रतिबिंबा
संभवस्य दर्शितत्वान्न प्रतिबिंबपक्षेऽस्मत्काम्यवच्छेदपक्ष
पवादरणीय इति भावः एवमवच्छेदपक्षे दोषांतर
मपि वक्ष्यमाणदोषग्रस्तत्वादिनैव निरस्तमित्याह
एतेनेति सानंतरोक्तेनेति आगुक्तश्च किरच्छान्तःसये
पासस्तन्निहितस्येति विशेषणस्यायमभिप्रायः य
दि सर्वत्रैवांतःकरणमुत्पन्नं नेनगौनस्यात्तद्बहिर्वि-
षमानस्यैव चैतन्यस्याभागस्यैकस्य प्रतिबिंबस्य भवेत्
तदा बिंबचैतन्यप्रदेशभेदाभावात् अंतःकरणे
विबचैतन्यप्रदेशभेदेन प्रतिबिंबभेदापादनेन सं
भवेत् न चैतत्संभवति व्यवहितस्य प्रतिबिंबायो
गात् किंतु तत्तदंतःकरणसन्निहितस्यैव चैतन्यप्र
देशस्य बिंबत्वं वाच्यं तत्र च स्वरूपस्य प्रतिबिंबभेदा
पादनेन युक्तमिति दोषत्वादिति कृतहानाकृ
ताभ्यागमप्रसंगदोषग्रस्तत्वादित्यर्थः अविद्याया

विम्बतिविंबईश्वरःअंतःकरणेविम्बितविंबो
जीवइतिएवंप्रदर्शितेसंत्येषशारीरकपक्षेदो
षैतेऽस्यपिविवरणादिपक्षेउक्तदोषप्रसक्तेस्त
स्योपादेयत्वस्यादितिशंकने नवेति गगनगम
नशीलनङुपरीतिजलाशयोपरिस्थः विस्त
तैरीति यथानत्रनत्रजलप्रदेशेषुविस्तवैग
मनशीलोमेवलिढेभ्योनिस्तनःस्फीनालोकवि
ऽमहामेवमेउलप्रतिविंवस्यजलाशयव्यापक
स्यविशेषेणस्फुरणहेतुस्यध्यानत्रनतेरूपरत्व
कर्तृत्वभोक्तृत्वादिविशेषाभिव्यक्तिहेतुत्वेनांतःक
रणमिनिपत्तइत्यर्थः कृतहानादिदोषाभावेहे
नमाह अंतःकरणावदिति ॥

नैष्येवावच्छेदपक्षेप्यविद्यावच्छिन्नोजीव
इत्यभ्युपगमसंभवात् नत्राप्येकस्यजी
वस्यकविच्छेदेशेकर्तृत्वप्रदेशान्तरेभो
क्तृत्वमितिस्यवंकृतहानाकृताभ्यागमदो
षापत्तनयेवस्तोजीवैकस्यारणेक
रणेयत्वेनतत्त्वायादन्तःकरणोपाधिप
क्षेपिवस्तनस्येनत्येकस्यनदवच्छेदको
पाध्येकस्यवनत्राभ्युपगमेनदोषानेरा

सि० ले० टी० ५८

98

करणासंभवाच्च ॥

यदि प्रतिबिंबवादिनांतःकरणप्रतिबिंबो जीव
इतिपक्षमुक्तदोषभीतोऽस्मैनपरित्यज्याविद्याप्रतिबिंबो
जीव इतिपक्षः स्वीक्रियते तदावच्छेदवादिनापि
ऽन्तःकरणावच्छिन्नो जीव इति पक्षे कृतहानादिदोष
मुक्तेऽस्मत्काउक्तदोषरहितमविद्यावच्छिन्नो जीव इति
मतमुपादीयत इत्याह नयेवेति जीव इति उपलक्ष
णं चैतत् अविद्यायाः कल्पितत्वेन वास्तवतदभावाव
च्छिन्नचिदात्मा ईश्वर इत्युपगमे संभवात्तेऽन्यपि द्रष्टव्यं
एवमविद्याप्रतिबिंबो जीव इतिपक्षे कृतहानादिदो
षाभावमुपेत्य तत्साम्यमविद्यावच्छिन्नस्य जीवत्वप
क्षे दर्शितमिदानीमन्तःकरणावच्छेदपक्षे कृतहा
नादिदोषाभावे समर्थितमविद्याप्रतिबिंबो जीव
इतिपक्षेऽपि कृतहानादिदोषमाशंक्य परिहरति न
चापीति अविद्याप्रतिबिंबो जीव इतिपक्षेऽपीत्यर्थः
क्वचित्प्रदेश इति ब्राह्मणादिशरीरगतान्तःकरणा
वच्छिन्नप्रदेश इत्यर्थः प्रदेशान्तर इति देवादिशरीर
गतान्तःकरणावच्छिन्नप्रदेश इत्यर्थः वस्तुन इति
प्रदेशभेदस्यापि इह परस्य चाविद्याप्रतिबिंबरू
पजीवैकमात्रेण कृतहानादिदोषः परिहर्तव्यः
प्रतिबिंबवादिनागत्यन्तराभावादित्यर्थः सोऽयं प
रिहारप्रकारोऽन्तःकरणावच्छेदपक्षेऽपि समान इ-

स्यादिह न [illegible]याद्दिति वस्तुत इति इह परत्र वा
न करणावच्छेद्यचैतन्यभेदेऽपि चैतन्यस्य
वस्तुत एकत्वात् न कृतहानादिदोषप्रसङ्गः । न
नु वास्तवचैतन्यैकमात्रस्य जीवान्तरसाधारण
त्वादन्यकृतकर्मणोऽन्यस्य भोगप्रसङ्ग इत्यत आह
नेदवच्छेदकेति तस्यैव चैतन्यस्य परं तथा चैकान्त
ष्करणावच्छिन्नचैतन्यमेको जीवः अन्तःकरणान्त
रावच्छिन्नचैतन्यमन्यो जीव इति सांकर्याभावान्नातिप्र
सङ्ग इति भावः । अस्मिन्नवच्छेदपक्षे मायाकारीत्यादा
त्ववान्तष्करणाभावादवच्छिन्नचैतन्यमीश्वरः कारणो
पाधिरीश्वर इति श्रुतमतेनोपाधिनाविद्यावच्छिन्नचैतन
मेवाईश्वर इति बोध्यं ॥

नचावच्छेदपक्षे घटाद्यवच्छिन्नाकाशवि
वस्थानपाभिन्नावरूपैकोऽनुगच्छन् उपा
धिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजो
यमात्मा अतएव चोपमा सूर्यकादिवदिति
श्रुतिसूत्राभ्यां विरोधः अत्रवद्ग्रहणात्तु
न तथात्वमित्युदाहृतसूत्राणेन रत्नवेण ॥

अस्य पक्षस्य श्रुतिसूत्राभ्यां विरोधं शङ्कते नचावच्छेदप
क्ष इति यथा एको विवस्वान् पात्रभेदेन भिन्नाश्यपेक्षा

सि॰ ले॰
टी॰
५५

99

गच्छन्नवच्छिन्नत्वपात्रेषु प्रतिबिंबितस्सन्नियावद
हृपाभेदरूपः क्रियते औपाधिकं नानात्वं प्रतिप
द्यते एवं देवः स्वप्रकाशात्मा स्वतन्त्र एकस्सन् स्व
त्रेषूपाधिषु प्रतिबिंबितो भेदरूपः क्रियते नाना
त्वलक्षणः इति यावत् यथा एकस्य सूर्यस्य वञ्जहृण
पिषु प्रतिबिंबितत्वप्रयुक्तो भेद एवमात्मनोपि तेषु
षु प्रतिबिंबितत्वप्रयुक्तमेव नानात्वमिह विवक्षितं
मिति वक्तव्यमन्यथा हि स्वान्तदार्ष्टान्तिकयोरनन्व
त्वापत्त्या नयोरसामंजस्यप्रसंगात् तथा चावच्छेदपक्षः
श्रुतिविरुद्ध इत्यर्थः एवमेक एव तु भूतात्मा भूते भू
ते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रव
त् रूपं रूपं प्रतिरूपो बभूव जीवेशावाभासेन करो
तीत्यादिश्रुतयोपि चैतन्यस्य प्रतिबिंबावगमके
न द्रष्टव्याः भूतानां ब्रह्मादिस्तंबपर्यंतानामात्मास्व
रूपभूतः परः भूते भूत इति वीप्सया सर्वप्रतिबिंबोपा
धयो गृह्यंते तेषु प्रतिबिंबितत्वतया व्यवस्थितस्सन् ब
हुधा दृश्यते स्वतस्तु एकधा दृश्यते रूपं रूपमित्य
डुपाधिपरः अत्रापि वीप्सा सर्वोपाधिसंग्रहार्था प्र
तिरूपः प्रतिबिंबः पुरुषप्रतिबिंबे पुरुषप्रतिरूपोय
मिति प्रयोगदर्शनात् द्वितीयाध्यायगतसूत्रमुदाह
रति अत एव चेति यतश्चिदात्मनः स्वाभाविकमेकत्वं
नानात्वं चौपाधिकं श्रुतिषु विवक्षितमत एव चस्सोपा

थिकनानात्वे जलादिषु प्रतिबिंबिनः सूर्यादेर्दृष्टान्त
त्वेन स्फीतिह्रूपादीयत इति सूत्रार्थः रूपं रूपमिति
स्फैतौ प्रति रूपशब्दो न प्रतिबिंबवाचकः वायुर्य
थैको भवनं प्रविष्टो रूपं रूपं प्रति रूपो बभूवेत्या
दौ व्यभिचारात् नः सूर्यादिप्रतिबिंबदृष्टान्तस्वारस्या
देव चैतन्यप्रतिबिंबो वक्तव्यस्तत्प्रतिबिंबस्य रूपमेव
सूत्रकृदाक्षिपति अंबुवदिति ॥

यथा सूर्यस्य रूपवतः प्रतिबिंबोदययोग्ये
ततो विप्रकृष्टदेशे रूपवज्जले गृह्यते
नैवं सर्वगतस्यात्मनः प्रतिबिंबोदययो
ग्यं किंचिदस्ति ततो विप्रकृष्टमिति प्र
तिबिंबासंभवमुक्त्वा वृद्धिह्रासभाक्त्वम
न्तर्भावादुभयसामंजस्यादेवमिति न द
नेनरसूत्रेण यथा जलप्रतिबिंबितः
सूर्यो जलवृद्धौ वर्धत इव जलह्रासे ह्र
सतीव जलचलने चलतीवेति तस्याप्या
त्मिके जलानुरोधिवृद्धिह्रासादिभाक्
त्वमात्मनोंतःकरणादिनावच्छेदेनोपा
ध्यंतर्भावादाध्यात्मिके तदनुरोधिवृद्धिह्रा
दिभाक्त्वमित्येवं दृष्टान्तदार्ष्टान्तिकयोः

सि॰ले॰
टी॰
१॰॰

100

सामञ्जस्यादविरोधः इति स्वयं सूत्रकृतैव
वच्छेदपदेन योत्तात्पर्यकथनात् ॥

सूत्रे दृष्टान्तभागस्यार्थमाह यथेति प्रतिबिंबोदय
योग्यत्वं स्वच्छत्वं तदुपाध्यन्तर्गतस्य नतत्र प्रतिबिंबत्वा॰
भावेनाह ततइति बिंबभूतसूर्याद्यपेक्षयेत्यर्थः दार्ष्टा
न्तिकभागं व्याचष्टे नैवमिति ततस्तथात्वे विदात्मनः
प्रतिबिंबितसूर्यादितत्त्वं नास्ति कुतः अग्रहणात्
अन्तःकरणादेरात्मप्रतिबिंबोदययोग्यत्वेनाग्रह
णात् नह्यन्तःकरणमात्मापेक्षयापि प्रकृष्टदेशव
त्त्वं गतवानात्मनः नापि तदुद्भूतरूपवदङ्गीका
रात् विदात्मनोपि सूर्यादिवद्बिंबत्वयोग्यत्वेनाग्रह॰
णाच्च न स्पर्शोद्भूतरूपद्रव्यत्वात् तस्मात्प्रतिबिंबितसूर्यवि
दात्मनोर्दृष्टान्तदार्ष्टान्तिकभावानुपपत्तिरिति त
त्त्वार्थः दृष्टान्तदार्ष्टान्तिकयोः प्रतिबिंबितत्वां॰
शेन साम्याभावेपि तत्सद्भावविरोधोस्तीति विवक्षितां
शेन साम्यस्य तत्रापि संभवात् नहि तयोः सर्वसाम्यं॰
क्वचिदपि संभवति तथात्वे दृष्टान्तदार्ष्टान्तिक
भावोच्छेदप्रसंगादित्यभिप्रेत्य विवक्षितांशसाम्य
सूत्रकृद्दर्शयति दृष्टिहासेति तदनेनैतस्य सूत्रस्य
दभेदवदिति सूत्रपरं सूत्रं व्याचष्टे यथेति आख्यासि
कमिति ओतिसिद्धमित्यर्थः नयेति विदात्मनोबु
द्ध्याद्यवच्छिन्नतयोद्बुद्ध्याद्युपाध्यावेशभावात् गजादि

शरीरेण करणेन हस्त्यादौ चिदात्मा वर्द्धते इव मशका
दिशरीरेण करणेन ह्रासे ह्रसत इव न च चलने चल
न इव न ह्रसे देभिन्न इव च भाति तथा च श्रुतिः ध्या
यतीव लेलायतीवेति बुद्धौ ध्यायन्त्यामात्मा ध्या
यतीव चलन्त्यां चलन्त्यामात्मा चलतीव न तु वस्तुतो ध्या
यति चलति वेत्यर्थः एवमध्यासोऽसिद्धमेतत्करण
तोऽपि हृद्यादिमनमात्मनो न विवर्त्तते साम्यमित्य
र्थः तयोरिति चैतन्यस्फुरति विवितत्वगामकस्तु
तिन तन्मूलकसम्बन्धः एवमग्रे ग्रहणयोरित्यर्थः ॥

घटसंहतमाकाशं नीयमाने यथा घटे
घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः

अवच्छेदपक्षे तु केवलं श्रुतिसूत्रविरोधाभाव एव
किं तु श्रुतिसूत्रानुग्रहोऽप्यस्तीत्याह घटसंहतमिति
घटसंहतं घटावच्छिन्नमाकाशं प्रसिद्धमस्ति तद्वद्घटे
नीयमानेऽपि न नीयते यथा यद्वद्धातः तद्वज्जीवो न
भोपमः नभसा तुल्यः एतदुक्तं भवति जीवस्य न
भोपमशब्देन घटसंहताकाशतुल्यत्वमभिदधा
नाऽवच्छिन्नचैतन्यरूपत्वमुक्तमिति एवं प्रवेशश्रु
तिरपि चिदात्मनो बुद्ध्याद्यवच्छेदकत्वमेव हस्त्या
दिष्वन्तर्भेदं दर्शयति न प्रतिबिम्बभावकत्वेन न
याहि स एष इह प्रविष्ट आनखाग्रेभ्य इत्युपक्रम्य

सि॰ ले॰ टी॰ १२

१०१

प्राणन्नेव प्राणो नाम भवति वदन् वाक् पश्यंश्चक्षुः
शृण्वन् श्रोत्रं मन्वानो मन इति भुक्तप्रविपक्वालोणस्य यते
श्रयमर्थः सुः सर्ववेदान्तेषु प्रसिद्धः एव नामरूपव्याकृ
तेनेन सन्निहितः इह कार्यकारणसंघातेन नखाग्रप
र्वतीकृत्य प्रविष्टः ननु यथा देवदत्तस्य गृहे सर्पस्य
वा बिले प्रवेशः प्रसिद्धः न तथात्मनः प्रवेशः क
ल्पयितुं शक्यते तस्य सर्वगतत्वात् आपि जलादौ सु
र्यादिप्रतिबिम्बभाववत् प्रवेशः संभवति
तस्यैतैत्तिरीयकादौ प्रवेशवाक्यविचारावसरे भाष्य
कारैर्व्वर्णितत्वात् ननु कीदृशः प्रवेशः प्रविष्टपदे
न विवक्षित इति जिज्ञासायां यथा जले प्रतिबिम्बभावे
न प्रविष्टस्य सूर्यादेस्तद्धर्मवत्तया उपलभ्यमानत्वमस्त
स्ति एवमात्मनः संघातेऽपि प्राणनतया प्राकृसिद्ध
मेव प्राणत्वाद्यपि धर्मवत्तया उपलभ्यमानत्वमेव प्र
कृतेन प्रविष्टपदेन विवक्षितेनेन तु मुख्यः प्रवेश इति
मत्वा श्रुतिः स्वयमेव प्रविष्टपदं व्याचष्टे प्राणन्ने
वेत्यादिना प्राणं प्राणचेष्टां प्राणोपाधिद्वारा कुर्व
न् प्राणः स प्राण इत्यादिरुक्तो द्वितीयः प्राणपदवाच्यो
भवति वदन् वागिन्द्रियव्यापारं कुर्वन् वाचो हि वाच
मित्यादिरुक्तो द्वितीयवाक्पदवाच्यो भवति रूपं
पश्यन् रूपगोचरचाक्षुषवृत्तमेन करणतादात्म्याप
न्नात्कुर्वन् चक्षुषश्चक्षुरित्यादिरुक्तो द्वितीयचक्षु
ष्पदवाच्यो भवति शृण्वन् शब्दगोचरं श्रोत्रकरणको

हृतिमंतेकरणतादात्म्यापत्त्यैव कुर्वन् श्रोत्रस्य श्रोत्र
मित्यादिषूक्तौ द्वितीयश्रोत्रशब्दवाच्यो भवति मन्वा
नो मननरूपो वृत्त्यादिनिरपेक्षो वृत्तिं कुर्वन् मनसो
मन इत्यादिषूक्तौ द्वितीयमनःशब्दवाच्यो भवति व
त्त्यादिव्यापाराग्रहणात् कार्यकारणसंघातव्यापारमा
त्रस्योपलक्षणं ॥ ॥

अंशो नानाव्यपदेशादिति सूत्राभ्या
मवच्छेदपक्षस्यैव परिग्रहाच्च ॥

संघातधर्माणां सर्वेषामात्मन्युपलभ्यमानत्वा त्तन्वे
वमप्यवच्छेदपक्षस्य द्वितीयाध्यायगतेनाभासए
व चेति सूत्रेण तद्भाष्येण च विरोधोऽवीरस्तयोस्सैन
स्यप्रतिबिंबस्यैवमुक्तत्वात् सूत्रार्थस्तु आभासए
व जीवः परमात्मनः प्रतिबिंब एव न निरुपाधिकः
परमात्मैव जीवः नापि न्यायमत इव परमात्मनस्सका
शादत्यन्तभिन्नः तत्त्वमस्याद्यभेदश्रुतिविरोधात् प्र
तिबिंबस्य वस्तुतो बिंबाभिन्नत्वेन नाभासत्वपक्षेऽ
प्युक्तश्रुतिविरोध इति तत्र भाष्यार्थ इति चेन्न उदाहृत
सूत्रतद्भाष्ययोरुक्तप्रतिबिंबपक्षस्य मोक्षापत्तेरवि
भागश्चैषां लोकवदिति सूत्रोक्तसिद्धान्तवन्मतान्तर
त्वोपपत्तेः नैव तथाकल्पने किंविनिगमकमिति वाच्य
तृतीयाध्याये स्वयमेव सूत्रकृतैव न्यायपूर्वकं कृतस्यैव तु
स्य प्रतिबिंबनिरासस्यानियामकत्वादाभासस्यैव जी

सि॰ ले॰ टी॰ १०२

102

वस्यप्रतिबिंबत्वेउपपत्त्यादेरनुपन्यासाच्च भोक्त्रापत्ति
सूत्रस्यायमर्थः सर्वं खल्विदं ब्रह्मेति श्रुत्या प्रपंच
स्य ब्रह्माभेदः प्रतिपादिते शुद्धं ब्रह्मास्मीति श्रुत्या च
द्रष्टव्यार्थभूतभोक्तृवर्गस्य च ब्रह्माभेदः प्रतिपाद
ते तथा च श्रुतिद्वयानुसारेण भोक्तृभोग्यप्रपंचयो
रेकब्रह्माभेदसाकारे भोग्यप्रपंचस्य भोक्त्रापत्ते
र्भोक्तृभेदापत्तेरेवं भोक्तुरपि भोग्याभेदापत्तेरेकब्र
ह्माभिन्नयोस्तयोः परस्परमप्यभेदावश्यंभावाद् ब्र
ह्मापत्तिस्तथासम्यग्विभागः प्रसज्येत भोक्तृभो
ग्ययोर्विभागबोधकप्रत्यक्षादिविरोधः प्रसज्येते
ति चेद्ध्याने श्रुतिसिद्धे भोक्तृभोग्ययोरेकब्रह्माभि
न्नत्वेनयोः प्रत्यक्षादिसिद्धं परस्परं विभक्तत्वं चैतदुभयं
लोकवत्स्यादुपपद्यते यथा लोके एकसमुद्रविका
राणां फेनबुद्बुदतरंगाणामेकसमुद्राभिन्नत्वेपरि
णामानां परिणाम्यभेदस्यानुभवसिद्धत्वात् तेषामे
व फेनादीनां परस्परं भिन्नत्वं चास्ति भेदस्यानुभव
सिद्धत्वादेवमेकब्रह्मपरिणामयोर्भोक्तृभोग्ययो
रेकब्रह्माभिन्नत्वे परस्परं भिन्नत्वं चोपपद्यत इति
न श्रुतेः श्रुतीनां प्रत्यक्षादिविरोधप्रसक्तिरित्य
यं च विरोधपरिहारो न सिद्धान्तसंमतः कूटस्थनि
त्यस्य ब्रह्मणः परिणामित्वानुपगमात् किन्तु मतान्त
राभिप्रायेणेति भाष्यादिषु वेदान्तवादैः तथा प्रकृते न
पीति सन्तेपः श्लेषा इति जीवईश्वरस्याभासः ऊनः ना

नाव्यपदेशात् यच्चात्मानमंतरो यमयतीत्यादिश्रु
तिषु नियम्यनियामकभावादीनां जीवेश्वरयोर्ना-
नात्वस्य भेदस्य व्यपदेशादिति सूत्रभागस्यान्तरार्थः
अज्ञांशत्वं जीवत्वेन त्वस्य घटाकाशवदन्तःकरण
वच्छिन्नत्वरूपं विवक्षितं नतु महाव्योमैकदेशत्वं निरवय
वस्य ब्रह्मणो महाव्योमांशासंभवादिति तदधिकरण
भाष्ये स्फुटमिति भावः ॥ ॥

तस्मात्सर्वगतस्यैवैतस्यान्तःकरणादिना
वच्छेदो वर्णं भावी स्यादवर्णकत्वादवच्छेदो
जीव इति पक्षे रोचयन्ते अपरे तु न प्रतिवि
म्बो नाप्यवच्छेदो जीवः किंतु कौन्तेय सैव
राधेयवद्विकृतस्य ब्रह्मण एवाविद्य
या जीवभावः ॥

अवच्छेदपक्षसमर्थनमुपसंहरति तस्मादिति प्रति
बिंबासंभवात् अवच्छेदपक्षे विरोधाभावात्सावयकस्त
त्वाद्वेत्यर्थः अवच्छेदो चैतन्यस्य प्रतिबिंबत्वेपि सम्भ
तनयाउभयसंप्रतिपन्नस्यान्तस्यैव जीवत्वादिकल्पनं उ
चितं लाघवादित्याशयेनाह अवच्छेदो वर्णं भावीति अ
वच्छेद इति अन्तःकरणावच्छिन्नो जीवः जीवग्रहणमु
पलक्षणं अविद्यावच्छिन्न ईश्वरः कार्योपाधिरयं जीवः
कारणोपाधिरीश्वर इति श्रुतेर्जीवेशावाभासेन करो-
ति माया चाविद्या च स्वयमेव भवतीति श्रुतौ वच्छाभास

यदनवच्छिन्नपरं प्रतिबिंबासंभवस्योक्तत्वात् मायाय
देवप्रथमोपाधानजीवोपाधिभूतोन्तःकरणपरे कार्योपा
धिरयंजीवइति श्रुतेरेव मायायदोपानोन्तःकरणस्य
चमूलप्रकृत्यात्मकत्वेप्रकृतिविकारभावप्रयुक्तं ए
वमनवच्छिन्नस्येश्वरत्वोक्तिस्तु मिदीयवचनानुसारे
णाभावावच्छिन्नस्येश्वरत्वोक्तिस्तु संभवमात्रेण नतुता
त्पर्येण कारणोपाधिरीश्वर इति श्रुतिविरोधात् अनव
च्छिन्नस्य ईश्वरत्वपक्षेतु नस्योपाध्यभावेन सर्वज्ञानकर्तृ
त्वादेरसंभवात्तदभावस्य ईश्वरोपाधित्वपक्षेपि समानोयं
दोषः मायाविद्याव्याकृतनामरूपतत्त्वराकार्यादिशब्दित
भावरूपोपाधेरिव नस्य सर्वज्ञत्वादिप्रयोजकत्वायोगात्
अनएववाक्यवृत्तौ भगवत्पादैः सर्वज्ञत्वादिप्रयोजकोपा
धित्वमविद्यायादर्शितम्मायोपाधिर्जगद्योनिः सर्वज्ञ
त्वादिलक्षण इतीतिभावः अथकईश्वरःकश्चजीव
इतिप्रश्नेप्रतिवचनत्वेन मतान्तरमुपन्यस्यति अपरे
त्विति कस्तर्हि जीव इतिपृच्छति किंत्विति दृष्टान्तपूर्व
कं बुद्ध्यैव जीवइत्युत्तरमाह कौन्तेयस्येवेति कुन्तीकुमा
रस्यैवतनन्तन्यतिविंवादेरितस्येवकारार्थः राधायाश्च
पत्यराधेयस्तस्यभावस्तत्त्वेनेतिहृदित्यर्थः किंतविकृत
स्यैवेतिशेषः अवच्छेदप्रतिबिंबभावरहितस्येत्य
र्थः नत्रभाष्यवार्तिकसम्मतिमाह तत्त्वेनदर्शयति व्या
धेत्यादिना यथाराजकुलेजातःकर्णोजन्मप्रभृति व्या
धाकुलएवसंवर्धितस्तज्जातीयैस्सहवासादिजातित्वभ्रा
न्तिलक्षणाविद्ययात्मानं राधेयमन्यतेनतु स्वतःसि

ह्मपि कौंतेय त्वमनुभवति न नश्य ॥ ॥

व्याप्य कृत्स्नं वर्त्तिनं राजकुमार हंस्यो नेन
ब्रह्मैव स्वाविद्यया ते संसृति स्वविद्यया वि
मुच्यन इति बृहदारण्यकभाष्यप्रतिपाद
नात् राजसूनोः स्मृति प्राप्तौ व्याधभावो
निवर्त्तेनैवैवमात्मनो तत्समनवमस्यादि
वाकृत इति वार्तिकोक्तैश्च एवं च स्वाविद्य
या जीवभावापन्नस्यैव ब्रह्मणः सर्वप्र
वकाल्पनादीश्वरोपि सह सर्वज्ञत्वादि
धर्मैः स्वमोपलब्ध देवमावनीव कलि
नइत्यावदातेन ॥

कौंतेय त्वमप्युक्तोक्तेः यससकाप्रान्त्युनः सर्वज्ञा
नानाविधप्रापावमानादिलक्षणं व्रह्मविपदः एवमा
भवान्सचकदाचिद्भगवनाविवसुताकृणाकौंतेयो
स्मिन्नराधेयत्वस्यपदेशेकर्त्वनास्मारितनिजरूपस्म
न् नयास्त्मात्याप्यनराधेयनादेरविद्याकतसृनि
हनौसस्नोव्याधेयपनराधेयत्वकृत्ननानाविपडः एवम
काकौंतेयत्वस्मृतिप्रयुक्तश्चयः मामवान् तथाबल
प्यनादिसिद्धयास्वाविद्यया प्राप्ताहतनिजरूपस्मरणीव
भावेप्राप्यस्तनः सिद्धानित्यमिरतिप्रापानेदस्वरूपा

सि॰ ले॰
वी॰
१०४

104

त्यच्युतं भवति ननु स्वसंसरति एवं संसरद्रूपकल्पकत्वाचि
त्समदृशायामिव स्वाविद्याकल्पितेन गुरुणा शास्त्रे
ण चोत्पादितया स्वगोचरविद्यया जीवभावादिभ्यो ज
कादिद्याविनिवृत्तो मुच्यते निरस्तनिरतिशयानन्दम
नुभवति स्वरूपचैतन्येनैवेति भाष्यार्थः अस्ति
अज्ञानावृत्ततिज स्वरूपस्येत्यर्थः ननु मत्पादीति गुरूप
दिष्टात्मस्यादिवाक्यजन्यज्ञानेनाज्ञाननिवृत्तौ जीव
भावस्यात्मनो निवर्तनं इत्यर्थः एवं जीवं निरूप्य ईश्वरं
निरूपयति एवं चेति भाष्यवार्तिकपर्यालोचनया प्रति
बिंबभावादिरहितस्य स्वर्णलक्षणस्य जीवत्वे सिद्धे
सतीत्यर्थः ईश्वरोपि सर्वज्ञत्वादिधर्मसहजीवकल्पि
त इति सेवेयः यथोक्तजीवस्येश्वरकल्पकत्वे हेतु
माह साविद्ययेत्यादिना अन्यस्य कल्पकस्याभावादि
ति तात्पर्यकमवधारणं जीवस्येश्वरकल्पकत्वे दृष्टान्त
माह समेति यथा स्वप्ने स्वमदृष्टा जीव एव परां देवतां
सर्वज्ञत्वादिधर्मसहितां कल्पयति कल्पयित्वा च ताम
हर्निशमुपास्ते तदुपासनया चाभ्युदयनिःश्रेयसल
क्षणफलं लभते एवं जागरणेपीति दृष्टान्तादेरभिप्रा
यः ॥

अथायं जीव एकोऽतानेकः अत्रापदोक्त
पत्तावलंबिनः केचिदाहुः एको जीव
स्तेन चैकमेव शरीरं सजीवमन्यानि स्व
प्रदृष्टशरीराणीव निर्जीवानि तदज्ञान

कल्पिते सर्वं जगत् तस्य स्वप्नदर्शनव
यावद्विद्यं सर्वो व्यवहारः बद्धमुक्त
व्यवस्थापि नास्ति जीवस्यैकत्वात् शुक
मुक्त्यादिकमपि स्वाप्नपुरुषान्तरमुक्त्या
दिकमिव कल्पितं ॥

जीवेश्वरनिरूपणप्रसंगेन विचारान्तरमारभते
अनुपदोक्तेति ब्रह्मैव स्वाविद्यया संसरति स्वविद्य
यामुच्यत इत्यादिग्रन्थोक्तेरर्थः एक इति ब्रह्मण
एकत्वात् बन्धमोक्षव्यवच्छेदप्रतिबिंबभावयोरनंगीका
राद्वेत्यर्थः ननु जीवैकत्वे नैकमेव शरीरं सजीव
वित्तशुद्धिविविदिषारूपं स्वल्पक्रमावण्यं लभत इति प्र
तिपादनात्तन्मूलभूते विविदिषावाक्येऽपि सर्वेषामा
श्रमकर्मणामनुपलक्षणं युक्तमिति मतं स्वाश्रमक

३
सि॰ल॰
टी॰
८

र्मणामेवविनियोगइत्यत्रसोऽत्रलिंगमाहअत एवेति
आश्रमकर्मणामेवविनियोगाभ्युपगमादेवेत्यर्थः
आश्रमकर्मणांविविदिषावाक्येनविद्यार्थोविनियु
क्तत्वान्नतत्कामनारहितेनाश्रमिणास्वाश्रमविहितंकर्म
नानुष्ठेयमितिशंकायामुत्तरंसूत्रेणैतेनापिकर्तव्यमेव
तंप्रतिविहितत्वादन्यथाप्रत्यवायप्रसंगादितिसूत्रा
र्थोबोध्यः अन्येषामपिविनियोगइतिपक्षेनित्यकर्म
मात्रविषयतयापृथमेदर्शयति कल्पनगौविति क
ल्पनलाघवमितिसंक्षेपः आश्रमधर्मव्यतिरिक्तानाम
प्यस्तिविद्योपयोगइतिकल्पनस्फकारमनमयुक्तंसू
त्रेविद्यार्थकर्मत्वाश्रमकर्मण्यदृष्टप्रयोगविरोधात्व
चसौत्राश्रमकर्मपदस्यवर्णधर्मेष्वप्यजहल्लक्ष
णोपपत्तेर्नतद्विरोधइतिवाच्यं लक्षणायामेवप्रमा
णाभावादित्याशंक्यतत्रनियामकंदर्शयति नाश्र
मधर्माणामेवविद्योपयोगइति ॥

अंतराचापितुतद्दृष्टेरित्यधिकरणेआश्रम
रहितविधुराद्यनुष्ठितकर्मणामपिविद्यो
पयोगनिरूपणात् नचविधुरादीनामना
श्रमिणांप्राग्जन्माद्यनुष्ठितयज्ञाद्युत्पादि
तविविदिषाणांविद्यासाधनश्रवणादाव
धिकारनिरूपणमात्रपरंतदधिकरणंन
तुतदनुष्ठितकर्मणांविद्योपयोगनिरूप

णापरमितिशांकरं ॥

आश्रमधर्मव्यतिरिक्तानां वर्णधर्माणामप्यस्ति विद्यो
पयोगइत्येवकारार्थं हेतुमाह अंतराचापि तु ति वि
द्यां प्रति बहिरंगसाधनेषु कर्मस्वंतरंगसाधनेषु श्र
वणादिषु चानाश्रमिणामधिकारोस्ति न वेति संदेहे
सति नास्त्यधिकार इति पूर्वपक्षः आश्रमकर्मणामेव
विद्यायां विनियुक्तत्वात्तेषामाश्रमकर्माभावात् सा
धनचतुष्टयसंपन्नस्यैव श्रवणादिष्वधिकारात्तस्य
नाश्रमिणांच साधनचतुष्टयांतर्गतस्य उपरतिशब्दि
तसंन्यासस्याभावेन तत्संपत्त्यभावादिति सिद्धांतस्तु
सूत्रे तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः अंतराशब्दः आश्रमा
णामंतरालमनाश्रमित्वमाह तथाचानाश्रमित्वेव
र्तमानोपि पुरुषः श्रवणादिषु विद्यार्थकर्मस्वधि
क्रियते कुतः श्रुतिस्मृतिषु रैक्ववाचक्नवीप्रभृतीना
मनाश्रमिणामपि विद्यावत्त्वोपलब्धेः परिव्राजक
स्य श्रवणादिषु मुख्योधिकारेपि गृहस्थादीनामिव
अनाश्रमिणामपि गौणाधिकारोपपत्तेः तथाच त
दधिकरणे भाष्यं दृष्टार्था च विद्या प्रतिषेधाभावमा
त्रेणार्थिनमधिकरोति श्रवणादिवदिति अविद्यानिवृ
त्तिः विद्यायाः दृष्टफलं तदर्थिनमविद्यानिवर्तकसा
क्षात्कारार्थिनमधिकारित्वेन स्वीकरोति शूद्रस्यववे
दांतश्रवणादिष्वनाश्रमिणां प्रतिषेधाभावात् गौ
णाधिकारे संन्यासापेक्षा नास्तीति मत्वा मात्रपदमि

३
सि· ल·
टी·
५
9

ति भाष्यार्थः अंतरा चापीति त्वधिकरणमनाश्रमिणां
श्रवणाद्यधिकारमात्रनिरूपणपरं न त्वनाश्रमिकर्म
णामपि विद्योपयोगनिरूपणपरं तथा च सौत्राश्रम
कर्मपदस्य वर्णधर्मोपलक्षणत्वं न सिध्यतीति मत्वा
शंकते नचाविधुरादीनामिति ननु तेषां विद्यार्थकर्मा
भावे विविदिषोदयासंभवादनाश्रमिणां श्रवणाधि
कारनिरूपणमयुक्तमित्याशंक्याह प्राग्जन्मेति
अनाश्रमिणोपि पूर्वजन्मांतरीयाश्रमकर्मानुष्ठानज
नितविविदिषावंतः संन्यासहेतुतीव्रवैराग्याभावा
त्तुर्याधिकाराच्च्युतास्तु तेषां श्रवणाधिकारनिरू
पणपरं तदधिकरणं न त्वनाश्रमिमात्रविषयं अवि
विदिषूणां श्रवणादौ प्रवृत्त्यसंभवादेवेत्यर्थः इति
न च शंक्यमिति संबंधः ॥

विशेषानुग्रहश्चेति तदधिकरणसूत्रत
द्भाष्ययोः तदनुष्ठितानां जपादिरूपवर्ण
मात्रधर्माणामपि विद्योपयोगस्य कंठो
क्तेर्विहितत्वाच्चाश्रमकर्मापीति सूत्रे आ।
श्रमकर्मपदस्य वर्णधर्माणामप्युपल
क्षणत्वादित्यभिसंधायोक्तमाश्रमधर्मा
तिरिक्तानामप्यस्ति विद्योपयोगः किंत्व
नित्यानामेव तेषां हि फलं दुरितक्षयं वि

धापेक्षते न काम्यानां फलं स्वर्गादि ॥

नन्वंतराचापि त्विति सूत्रे विद्यार्थकर्मस्य विधुरादी
नामधिकारेस्तूत्पादिष्वनाश्रमिणां रैक्ववाचक्नवीप्र
भृतीनां विद्यावत्त्वदर्शने हेतुत्वेनोक्तं तदयुक्तं रैक्ववा
चक्नवीविदुरप्रभृतीनां जन्मान्तरीयविद्यासाधनानु
ष्ठानबलादेव विद्याजातेति शंकासंभवादतोऽनाश्र
मिकर्मणां विद्योपयोगः अन्यत्र तेषां विद्यावत्त्वदर्श
नमन्यथासिद्धं लिंगं न भवतीत्यस्वरसादनन्यथा-
सिद्धं हेतुमन्यमभिप्रेत्योक्तं विशेषानुग्रहश्चेति वि
शेषैः धर्मविशेषैः जपादिलक्षणैः ब्राह्मणत्वादिव
र्णमात्रसंबंधिभिरपि विनष्टं हि विविदिषादिद्वारा
श्राश्रमधर्मैरिव विद्याया अनुग्रहः उपकारः संभवत्ये
वकुतः जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः
गंगायां स्नानमात्रेणामुच्यते नात्र संशयः यस्यस्म
रणमात्रेणेत्यादिवचनैः जपतीर्थस्नानदेवताध्या
नादिधर्माणां शुद्ध्यादिद्वारा विद्यासाधनत्वस्य प्रति
पादनादिति सूत्रार्थः तदनुष्ठितानामिति अनाश्रमि
णः नछेद्यार्थः एवमनाश्रमधर्माणामपि सूत्रका
रेणैव स्पष्टं विद्योपयोगस्य साधितत्वात्तदविरोधा
य सौत्रमाश्रमकर्मपदं वर्णधर्माणामप्युपलक्षणं
वाच्यमित्याशयेनाह सूत्र इति एवं कल्पतरुकारा
णामभिप्रायमुपवर्ण्य तन्मतमुपपादयति आश्र
मधर्मेत्यादिना ननु यज्ञादीनां विनियोगः कल्प्यमा

३
सि· ले·
टी· ८

10

नः किं काम्यसाधारणः कल्प्यते किं वा नित्यानामेव
नाद्यः काम्यकर्मफलस्य स्वर्गादेर्विद्ययानपेक्षितत्वे
न तेषां विद्योपकारकत्वासंभवात् न द्वितीयः नित्य
कर्मफलस्य दुरितक्षयस्यापि प्रमाणाभावाद्विद्यापे
क्षितत्वे मानाभावेन तेषामपि विद्याविनियोगानुप
पत्तेरिति शंकते किं वेति समाधत्ते नित्यानामेवेति
ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः इत्यादि
वचनं नित्यकर्मफलस्य दुरितक्षयस्य विद्यायामपे
क्षितत्वे प्रमाणत्वेन सूचयति हीति प्रमाणजन्या
यामपि विद्यायां दुरितस्य प्रतिबंधकत्वसंभवात् दु
रितक्षयापेक्षा युक्तेति भावः काम्यकर्मणां विद्यानु
पकारकत्वमंगीकरोति नेति न च काम्यानां नित्या
नामिव दुरितक्षयफलकत्वमप्यस्ति तथा च तेषा
मपि विद्यापेक्षितदुरितक्षयलक्षणोपकारजन
कत्वं संभवतीति वाच्यं तेषां दुरितक्षयफलकत्वे
मानाभावेन विद्योपकारकत्वस्यासंभवादिति भा
वः ॥

न तु यथा प्रकृतौ क्रमोपकाराणामंगाना
मतिदेशस्तेन प्रकृतोपकारातिरिक्तो
पकारकल्पनमेवं ज्ञाने विविदिषुक्तानां य
ज्ञादीनां क्रमनित्यफलपापक्षयातिरेके
ण न नित्यकाम्यसाधारणविद्योपयोग्यु
पकारकल्पनमिति संक्षेपशारीरके

तु नित्यानां काम्यानां च कर्मणां विनियोग
उक्तः यज्ञादिशास्त्राविशेषात् प्रकृतौ क्लृ
प्तोपकाराणां पदार्थानां क्लृप्तप्राकृतोप
कारातिदेशमुखेनैव विकृतिष्वतिदेशे
न संबंधो न तु पदार्थानामतिदेशानंतर
मुपकारकल्पनेति न तत्र प्राकृतोपकारा
तिरिक्तोपकारकल्पनाप्रसक्तिः इह तु प्र
त्यक्षक्लृप्त्या प्रथममेव विनियुक्तानां यज्ञा
दीनामुपदिष्टानामिव पश्चात्कल्पनीय
उपकारः प्रथमावगतविनियोगनिर्वा
हाय क्लृप्तोपि सामान्यशास्त्रोपात्तसकल
नित्यकाम्यसाधारणः कथं न कल्प्यः ॥

कर्मणां विद्यायां विनियोगविधये क्लृप्तोपकारैः नित्य
कर्मभिरेव चारितार्थ्ये दृष्टान्तमाह तत्र यथेति यद्वा
काम्यानां पापक्षयफलकत्वस्यान्यतः प्राप्त्यभावे
पि यज्ञादीनां विनियोगबलादेव तेषां तत्कल्प्यता
मिति नेत्याह तत्रेति काम्यकर्मणो विद्यापेक्षितो
पकारहेतुत्वात्क्लृप्तो सत्त्वामित्यर्थः न नित्यानामिति गो
त्वादिति भावः आश्रमकर्मव्यतिरिक्तानामपि वि
नियोग इति पदं काम्यसाधारणं दर्शयति संबंधे
ति अविशेषादिति यज्ञादिशास्त्राणां नित्ययज्ञादिषि

इ
सि॰ ले॰
टी॰
११

वकाम्ययज्ञादिष्वपि शुद्धत्वाविशेषात् नित्यानामि
वकाम्यानामपि विनियोगः स्यात्त्वाभातीति तस्या
याऽरण्यपर्वकर्मणामुपकारः कल्प्यत इत्यर्थः काम्य
साधारणेपि न वियोपयोगस्युपकारकल्पनेन संभव
तितत्कल्पने पूर्वतंत्र्यायविरोधादिति मत्वा विकृ
तिष्वतिदिष्टान्येगानि दृष्टत्वेन कल्प्यत एवुदा
हृतानि नतानि यज्ञादीनां दृष्टत्वेनोदाहरणयो
ग्यानीत्याह प्रकृताविति दर्शपूर्णमासादिषु प्रकृ
तियागादिषु यः पदार्थानामुपकारः तस्यप्र
त्यममतिदेशः तत्प्रभावेन पदार्थानां विकृति
षु सौर्यप्रयागादिष्वतिदेशः नतु प्राकृतपदा
र्थानां अतिदेशेनाविकृतिषु विनियोगानंतरंप
दार्थानामुपकारकल्पनमिति नतत्क्रमोपका
रपरित्यागेनोपकारान्तरप्रसक्तिरस्तीत्यर्थः पत
उक्तं भवति प्रकृते यज्ञादीनां विनियोगानंतरमु
पकारकल्पनमतिदेशस्थले तु प्रकृतावुपका
रकल्पनानंतरं प्राकृतपदार्थानां विकृतिषु वि
नियोगः ततो दृष्टतो विघ्नमस्तीति इह विति दा
र्शीतिकरत्यर्थः प्रकृतावुपगतं दृष्टान्तमाह उ
पदिष्टानामिति दर्शपूर्णमासादिप्रकरणेष्वन्य
त्रवाम्नातानां पदार्थानां श्रुतिलिंगादिभिः दर्शपू
र्णमासादिषु विनियुक्तानां प्रथमावगतविनि
योगनिर्वाहाय यथायोग्यं दृष्टादृष्टलक्षणोउ
पकारः कल्प्यते यथा तथाउपकारोऽत्रापि कल्प्य

एवं न त्वप्रथमावगतविनियोगपरित्याग उचितः
यज्ञाद्यविशेषश्रुतिबाधप्रसंगादित्यर्थः सामान्य
शास्त्रेति नित्यकाम्यसाधारणयज्ञादिशास्त्रेत्यर्थः ॥

अध्वरेश्वरमीमांसकैरप्यस्तूपकारमुद्दे
न पदार्थान्वयपक्षे क्रमोपकारनियमः
पदार्थान्वयानन्तरमुपकारकल्पने त्वक्र
मोऽपि विनियुक्तपदार्थानुगुण एवोपका
रः कल्पनीय इति संप्रतिपत्त्यैव बाधलक्ष
णारंभसिद्ध्यर्थमुपकारमुखो विकृतिषु
प्राकृतान्वयो दशमाद्ये समर्थितः ॥

यथा क्रमोपकारातिरिक्तोपकाराकल्पने कल्पतरु
कारोक्तं मीमांसकसंमतं तथा प्रथमावगतविनियो
गानुसारेणाक्रमोपकारकल्पनमपि मीमांसकसं
मतमेवेत्याह अध्वरेश्वरेति कर्ममीमांसकैरपीत्यर्थः
अध्वरमीमांसकैरपि संप्रतिपत्त्यैव प्राकृतान्वयः स
मर्थित इति संबंधः पदार्थान्वयपक्षे इति पदार्थान्वय
स्थल एवेत्यर्थः क्रमोपकारनियमः क्रमोपकारा
तिरिक्तोपकाराकल्पनमित्यर्थः एवकारव्यावर्त्यमा
ह पदार्थान्वयानन्तरमिति उपकारकल्पनस्थले त्वि
त्यर्थः संप्रतिपत्त्यैवेति स्वीकृत्यैवेत्यर्थः बाधलक्ष
णेति बाधाध्यायारंभसिद्ध्यर्थमित्यर्थः प्राकृतान्वय

इति प्रकृतिप्रयोगादौ शेषभूता ये पदार्थाः तेषां विकृ
तिप्रयोगादिष्वतिदेशेन प्राप्तिरित्यर्थः एतदुक्तं भ
वति पूर्वतन्त्रे दशमाध्याये विकृतावतिदिष्टानाम
ङ्गानां प्रकृतौ क्लृप्तस्योपकारस्यासंभवे बाधो निरूप्य
ते तच्च बाधनिरूपणं विकृतिष्वतिदेशेन पदार्थप्रा
प्त्यनन्तरमुपकारकल्पनपक्षेण सिध्यति प्रकृतौ
श्रुत्यादिभिर्विनियुक्तपदार्थानां दृष्टोपकारासंभ
वेऽदृष्टोपकारकल्पनवत् विकृतिष्वतिदेशेन
विनियुक्तानां पदार्थानां दृष्टोपकारासंभवेऽदृष्टो
पकारकल्पनप्राप्तौ तस्मिन् पक्षे सर्वेषामेवाङ्गानामनु
ष्ठानावश्यंभावेन केषांचिदङ्गानामननुष्ठानं तदति
देशप्रमाणप्रयुक्तबाधासंभवादतो बाधनिरूपणसि
द्ध्यर्थं प्रकृतिक्लृप्तोपकारमुखेनैव प्राकृतानामन्वयो
विकृतिष्विति दशमाध्यायप्रथमाधिकरणे साधित
स्तथा च यत्र पदार्थानां विनियोगानन्तरमुपकारक
ल्पनं तत्र तत्पदार्थसामर्थ्यानुसारेण प्रथमावग
तविनियोगनिर्वाहाय क्लृप्तोपकारकल्पनं मीमां
सकसंमतमिति प्रतीयते यदि विनियोगानन्तरमु
कारकल्पनास्थलेऽपि क्लृप्तोपकारासंभवे विनियुक्त
पदार्थपरित्याग एव न त्वक्लृप्तोपकारकल्पनं तत्सं
मतं भवेत्तदोपकारमुखेनैव पदार्थानामतिदेश
इति निरूपणपरमधिकरणं व्यर्थं स्यात् पदार्थाना
मेवश्रयणावघातादीनामतिदेशेन विनियोगापि
विकृतिगतकृष्णलादिष्वश्रयणादेर्विक्लित्तिरूप

विमोकरूपदृष्टोपकारस्यालोकसिद्धस्याभावाद
त्क्रमोपकारकल्पनानैर्गीकाराच्च श्रयणादेरनु
ष्ठानादिलक्षणावायस्यदर्शमात्ययेति रूपणीय
स्यासंभवेन तदर्थमुपकारस्तुत्वेनैव पदार्थानाम
तिदेश इति निरूपणस्यानपेक्षितत्वात् तस्माद्वि
विदिषावाक्येनाविशेषेणानित्यकाम्यसाधारणो वि
नियोगे प्रथममवगते सति तन्निर्वाहाय क्रमोप
कारकल्पने युक्तमेवेति ॥

किंचक्रमोपकारालाभान्नित्यानामेवायं
विनियोगइत्यभ्युपगमे नित्येभ्यो दुरित
क्षयस्य तस्माद्धज्ञानोत्पत्तेरन्यतः सिद्धौ व्य
र्थोयं विनियोगः अन्यतस्तदसिद्धौ ज्ञानोत्पे
त्तिनोपकारजनकत्वे नित्येषु तत्क्रमसिद्धेर
विशेषान्नित्यकाम्यसाधारणो विनियोगो
दुर्वारः ननु नित्यानां दुरितक्षयमात्रहेतु
त्वस्यान्यतः सिद्धावपि विविदिषाज्ञानोत्पत्ति
प्रतिबंधकदुरितनिवर्हकत्वं न सिद्धं किं
तु अस्मिन् विनियोगे सति ज्ञानोद्देशेन नि
त्यानुतिष्ठतो वश्यं ज्ञानं भवति इतरथा
शुद्धिमात्रमनियता ज्ञानोत्पत्तिरिति सार्थ
कोयं विनियोग इति चेत् न हि नित्यानाम

पदक्रममेव नियमतो ज्ञानोत्पत्तिप्रतिबं
धकदुरितनिवर्हणात् ॥

वस्तुतस्तु नित्यकर्मस्वपि विद्यापेक्षितोपकारजन
कत्वक्रमसिद्धेरित्याह किंचेत्यादिना अलाभादिति
काम्येष्विति शेषः नित्यानां विद्यापेक्षितदुरितक्ष
यलक्षणोपकारद्वारा विद्याहेतुत्वं विविदिषावा
क्यादन्यतः सिद्धमसिद्धं वा नत्र नाद्यः विविदिषावा
क्यवैयर्थ्यप्रसंगादित्याह नित्येभ्य इति विनियोग
इति शेषः तच्च पविनियोगबोधकशास्त्रमित्यर्थः द्वि
तीये नित्येष्वपि विद्योपकारकत्वमक्रमेव कल्प
नीयमिति नित्यकाम्यसाधारणोपकारकल्पने क्र
क्रमेवेत्याह अन्यतस्तदसिद्धाविति नित्यानां वि
द्योपकारकत्वासिद्धावित्यर्थः अन्यतः सिद्धिपक्ष
मवलंब्य विनियोगार्थवत्त्वमुपपादयति नन्विति दुरितं
तावत् हि विद्यं ज्ञानोत्पत्तिप्रतिबंधकं ज्ञानोत्पत्ति
प्रसक्तदासीनं समनन्तरकादिप्रदं च तथा च नित्यानां
ज्ञाने विनियोगाभावे नित्यकर्मभिर्ज्ञानप्रतिबंध
कदुरितस्यैव क्षयश्रुत्यसमानं नास्ति धर्मेणापाप
मपनुदति यज्ञो दानं तपश्चैव पावनानि मनीषिणां
इत्यादिश्रुतिस्मृतिवचनानां नित्यानां दुरितसामा
न्यक्षयहेतुत्वबोधनमात्रपरत्वादतो नियमेन ज्ञा
नप्रतिबंधकदुरितक्षयहेतुत्वं नित्यकर्मणामन्य
तो न प्राप्तमिति तत्प्राप्त्यर्थो यं विनियोग इत्यर्थः

नित्यैरेव यज्ञादिभिर्दुरितक्षयद्वारा ज्ञानं संपाद
येदिति प्रकारेण विविदिषावाक्यीये नित्यानां ज्ञा
ने विनियोगे सति वाक्यार्थज्ञानप्रतिबंधकदुरित
स्यैव क्षयो नित्यानुष्ठानतो लभ्यत इति पृच्छति किं
त्विति तत्रोभयप्रकारमाह अस्मिन्निति प्रवक्ष्यमि
ति नित्यानुष्ठानात् ज्ञानप्रतिबंधकदुरितक्षये सति
प्रतिबंधकरहितमहावाक्यादवश्यं ज्ञानं भवती
त्यर्थः इतरथेति एतद्धि नियोगाभावे इत्यर्थः दुरि
तसामान्यक्षयरूपा शुद्धिर्भवति न तु नियमेन ज्ञान
प्रतिबंधकदुरितक्षयरूपशुद्धिविशेषो भवति ज्ञा
नोद्देशेन नित्यानामनुष्ठानात् तथा च बहुजन्मसु
नित्यकर्मानुष्ठानशीलस्यापि नियमेन ज्ञानं न जाय
ते किं तु दैवयोगात्कदाचित् ज्ञानप्रतिबंधकदुरित
मेव स्यातिः शेषक्षयसंभवात् ज्ञानमपि कदाचित्
भवतीत्यनियतात् ज्ञानोत्पत्तिरित्यर्थः ज्ञानापेक्षि
तोपकारो नित्येषु कल्प्य इति मतं निरालंबनमि
त्यभिप्रेत्य काम्येष्विव नित्येष्वपि कल्प्यसोपकारक
ल्पनं तल्प्यामिति दूषयति तदिति नित्येषु ज्ञानो
पकारकत्वनियमासिद्धावित्यर्थः ॥

ज्ञानसाधनविशिष्टगुरुलाभश्रवणमन
नादिसंपादकापूर्वं वहारे कल्पनीयमित्य
ल्कमोपकारकल्पनाविशेषात्सामान्य

३
सि॰ ले॰
टी॰
६४

14

क्रत्वापादितो नित्यकाम्यसाधारणविनि
योगो भंजनीय इति नन्वेवमपि कथं कर्म
णैव हि संसिद्धिमास्थिता जनकादय इत्या
दिस्मरणनिर्वाहः न च तस्य विद्यार्थकर्मानु
ष्ठानपरत्वे विविदिषावाक्ये ब्राह्मणग्रहणे
न ब्राह्मणानामेव विद्यार्थकर्मण्यधिकार
प्रतीतेः अतो जनकाद्यनुष्ठितकर्मणां सा
तादेवमुक्तानुपयोगो वक्तव्यः नैवं विविदि
षावाक्ये ब्राह्मणग्रहणस्य त्रैवर्णिकोप
लक्षणत्वात् ॥

नन्वेवमपि नित्यानामेव विनियोगपक्षे विधेर्लाघ
वमस्ति तेषां पक्षे ज्ञानप्रतिबंधकदुरितनिबर्हक
त्वस्य वचनांतराप्राप्तत्वेन नियममात्रविधिलभ्य
त्वात् काम्येषु तु ज्ञानप्रतिबंधकदुरितनिबर्हकत्व
मवेद्यं न प्राप्तमिति काम्यानामपि विनियोगपक्षे
विधेस्तात्पर्यगौरवमपरिहार्यमिति चेत् सत्यं तथा
पि यज्ञादिश्रुतीनां संकोचलक्षणाबाधपरिहाराय
काम्यानामपि विनियोगस्यावश्यकत्वात्तत्रैव तात्पर्य
बोध्यं नित्येभ्यो ज्ञानप्रतिबंधकदुरितस्येव तत्तद्रूप
शुद्धिविशेषलाभेऽपि तावन्मात्रान्न ज्ञानोत्पत्तिरस्ति
प्रमाणप्रमेयासंभावनादिरूपप्रतिबंधकस

ज्ञावृत्तः तन्निरासोपयोगिनामुक्तकृच्छ्रगुरुतरतदधीनश्र
वणमननध्यानादीनां संपादकोऽदृष्टजनकत्वेनित्या
नामक्रममेव विविदिषावाक्यीयविनियोगबलात्
कल्पनीयमित्याह ज्ञानसाधनेति एवं विविदिषाद्वा
राविद्यायां कर्मणां विनियोगान्निरूप्यते त्रैवर्णिका
नामधिकार इति निरूपणार्थमाक्षेपव्याजेन प्रसंग
दर्शयति तत्त्वित्यादिना एवमपीति तस्मादिहेत
विज्ञानेकर्मबोक्तं महाभुत इति ज्ञानकर्मसमुच्चय
प्रतिपादकस्मरणस्य विविदिषावाक्याविरोधेन ज्ञा
नं साक्षाद्ब्रह्मप्राप्तिसाधनं कर्म च विद्याद्वारा तत्सा
सिसाधनमिति क्रमसमुच्चयपरतया निर्वाहेपी
त्यर्थः अत्रावधारणेन संसिद्धिशब्दितमुक्तिंप्रति
कर्मानतिरिक्तोपायनिषेधात् जनकाद्यनुष्ठितक
र्मणां मुक्तिं प्रति साक्षादेवोपयोगः प्रतीयते तच
विविदिषावाक्यविरुद्ध इति समुच्चयस्मरणवदस्य
स्मरणस्यानिर्वाहोनसिध्यतीत्यर्थः अस्यापि विवि
दिषावाक्याविरुद्धं संसिद्धोत्यभिमतमर्थमाशंक्यनि
षेधति नचतस्येति विद्यार्थेति अस्मिन्स्मरणेसं
सिद्धिपदं विद्यापरं तथाच शुद्धिद्वारा कर्मणैव विद्यां
प्राप्ता इति स्मरणार्थ इति भावः तस्य स्मरणस्य विद्या
र्थकर्मानुष्ठानपरत्वेन चेत्यत्र हेतुमाह विविदिषा
वाक्य इति अन्तरा इति विविदिषावाक्यबोध्येविद्यासा
धनकर्मणि त्रैवर्णिकानामनधिकारादित्यर्थः
उपलक्षणत्वादिति तथाच भाष्ये ब्राह्मणग्रहणमु

३
सि॰ले॰
टी॰
१५

15

पलक्षणार्थं स्वविशिष्टेष्वधिकारः त्रयाणां वर्णाना
मितितथा च विद्यार्थिकर्मस्वजनकादीनामप्यधिका
रसत्वात् कर्मणो वहीति स्मरणा विद्यार्थिकर्मानुष्ठान
परमेवेति न तद्वलात् तमेव विदित्वाति मृत्युमेति
नान्यः पन्था इत्यादिश्रुति विरुद्धः साक्षादेव कर्मणां
मुक्त्युपयोगो वक्तव्य इति भावः ॥

यथाहुरत्र भवंतो वार्त्तिककाराः ब्राह्मणग्र
हणं चात्र द्विजानामुपलक्षणं स्वविशिष्टाधि
कारित्वात्स्वैर्वैषामात्मबोधने इति नहि विद्या
कामो यज्ञादीननुतिष्ठेदिति विपरिणमते
विद्याकामाधिकारविधौ ब्राह्मणपदस्याधिका
रिविशेषणसमर्पकत्वं युज्यते उद्देश्ये वि
शेषणायोगात् नापि राजा स्वाराज्यकामो
यो राजकर्तृकेण राजसूयेन यजेतेति निक
टेन याग विशेषणत्वेन विधेयस्य राज्ञो
राजकर्तृकराजसूयस्याराज्ञा संपादयितु
मशक्यत्वादर्थादधिकारिकोटिनिवेशव
दिह यज्ञादिकर्तृतया विधेयस्य ब्राह्मणस्या
र्थादधिकारिकोटिनिवेश इति युज्यते ॥

राजसूयेन यजेतेति स्वाराज्यकामाधिकारे राजसूयविधौ स्वाराज्यकामो ७

अत्र भवं न इति हृद्याद्यन्यर्थः आत्मबोधन इति आ
त्मबोधसाधनयज्ञादिकर्मणोन्यर्थः विद्यार्थकर्मा
धिकारस्यैव प्रकृतत्वादिति मंतेतव्यं ननु विविदिषा
वाक्ये ब्राह्मणपदस्यैव त्रैवर्णिकोपलक्षणत्वे सिद्धे त्रै
याणां वर्णानामविशेषेण विद्यार्थकर्मस्वधिकारः
सिध्यति तत्र सर्वेषांत्र विशिष्टाधिकारत्वे सिद्धे त
दनुरोधेनैव ब्राह्मणग्रहणस्योपलक्षणत्वं सिध्यती
ति परस्पराश्रयत्वप्रसंग इति चेन्न ब्राह्मणग्रहणस्य
द्विजोपलक्षणत्वमनुपजीव्यैव सर्वेषां हि जानां वि
द्यार्थकर्मस्वधिकारसिद्धेर्वार्तिकवचनेन विवदित
त्वात् ननु विविदिषावाक्ये ब्राह्मणग्रहणेन ब्राह्म
णस्यैव विद्यार्थकर्मस्वधिकारे प्रतीयमाने कथं व
र्णत्रयसाधारणाधिकारः सिध्येदिति चेत् तत्र वक्तव्यं किं
ब्राह्मणपदस्य यज्ञादिविधावुद्देश्यविशेषणसम
र्पकतया ब्राह्मणमात्राधिकारज्ञापकत्वं किं वा विधे
यकर्तृसमर्पकतया तदुभयसमर्पकत्वाभावेपि स्व
संनिधिमात्रेण तन्मात्राधिकारज्ञापकत्वं वा गत्यन्त
राभावात् तत्र नाद्य इत्याह तद्धीति यज्ञादीनां विद्या
लक्षणफले विनियोगपरे विधौ विद्याकामस्याधि
कारः सिद्ध एव तथा च ब्राह्मणविशिष्टस्य विद्याका
मस्याधिकारो विवदित इति स्वीकृत्य ब्राह्मणपदस्या
धिकारिविशेषणसमर्पकत्वं वक्तुं न शक्यते नैविधे
य यज्ञादिति[illegible]पितोद्देश्यतायाः विद्याकाममात्रे
पर्यवसानसंभवेन ब्राह्मणपदरूपविशेषणस्याना

इ
सि॰ ले
टी॰
१९

16

कांक्षितत्वया विद्याकामं प्रति विधेयत्वेनान्वया
योगात् विशिष्टस्योद्देश्यत्वकल्पने गौरवाच्च विद्या
कामब्राह्मणयोः प्रत्येकमुद्देश्यत्वे च वाक्यभेदप्र
संगात् विद्याकामो यज्ञादीननुतिष्ठेत ब्राह्मणो य
ज्ञादीननुतिष्ठेदिति भावः हिनीयेम सदृष्टान्तमाशंक्य
निरोति नापीति स्वाराज्यकामवाक्ये राजपदस्य पूर्वो
क्तरीत्या स्वाराज्यकामं प्रति विधेयत्वान्वयोगात् क
र्तृविधायकत्वं स्वीकृत्य राजसूये राज्ञः सतः स्वाराज्य
कामस्याधिकारः साधित इत्यर्थः राज्ञोर्थाद्धिकारि
कोटिनिवेशवदिति संबंधः अर्थादिति पदोक्तम
र्थापत्तिं स्फुटयति राजकर्तृकेति इहेति विविदिषा
वाक्य इत्यर्थः विधेयस्येति विद्याकामो ब्राह्मणकर्तृ
कयज्ञादीननुतिष्ठेन इत्येवं विधेयस्येत्यर्थः अर्था
दिति ब्राह्मणकर्तृकयज्ञादेर्ब्राह्मणेन संपादयितु
मशक्यत्वादित्यर्थः ॥

सर्वव्यापित्वप्रवोभयलिंगादिति सूत्रेऽन्यत्र
विहितानामेव यज्ञादीनां विविदिषावाक्ये
फलविशेषसंबंधविधिर्नापूर्वयज्ञादिवि
धिरिति सर्वव्यापित्वेन प्राप्तयज्ञाद्यनुवा
देनैकस्मिन्वाक्ये कर्तृरूपगुणविधिः फल
संबंधविधिश्चेत्युभयविधानान्वाक्यभे

दापतेः नाधिराजस्य वाक्ये राज्ञः कर्तृत्वेन या
विधेयत्वाभावपक्षे राजपदसमभिव्याहा
रमात्राद्विशिष्टकर्तृत्वलाभवदिह वाक्या
भेदाय कर्तृत्वेन या ब्राह्मणादिधानेपि ब्राह्म
णपदसमभिव्याहारमात्रेण ब्राह्मणकर्तृत्व
लाभात् तदधिकारपर्यवसानमित्युपप
द्यते अन्यत्रैवर्णिकाधिकारकत्वेन श्रू
मानानामिष्टापि त्रैवर्णिकानामविद्यार्थत्वे
न विधीयमानानां यज्ञादीनां त्रैवर्णिका
धिकारित्वस्य युक्तत्वात् विधिसंसर्गहीन
ब्राह्मणपदसमभिव्याहारमात्रादधिकार
संकोचासंभवेन ब्राह्मणपदस्य यथाप्रा
मविद्याधिकारिमात्रोपलक्षणत्वं स्यात्

अर्थादधिकारिकोटिनिवेशश्चान्यापि न युज्यत इत्य
त्र दृष्टान्तवैषम्यमभिप्रेत्य हेतुमाह सर्वव्यापीत्या
दिना यज्ञादीनामाश्रमकर्मत्वपक्षे विद्यासहका
रित्वपक्षे च यावज्जीवादिवाक्येषु येऽग्निहोत्रादयो ध
र्मा विहितास्तएवानुष्ठेयाः अतः श्रुतिस्मृतिरूपो
भयलिंगात् श्रुतिस्तावद्विविदिषावाक्यगतयज्ञा
दिश्रुतिरेव तया प्रसिद्धयज्ञादीनां प्रसिद्धदानादी

२
सि· ले·
टी·
१२

17

नांच प्रत्यभिज्ञायमानत्वाद्दर्वियज्ञादिविधायक
त्वे प्रत्यभिज्ञाविरोधात् प्रसिद्धयज्ञाद्यनुवादेनफल
संबंधमात्रबोधनेलाघवाच्च यज्ञादीनां स्वत्वंनयज्ञा
दिपदोपात्तत्वेनात्रविधेयत्वाप्रतीतेश्च स्मृतिश्च
नाश्रुताकर्मफलमित्याद्याप्रसिद्धयज्ञादीनामेव
फलाभिसंधिं विनानुष्ठितानां विद्याहेतुत्वं दर्शय
तीतिस्तत्रार्थः अन्यत्रेति विविदिषावाक्यादन्यत्र
कर्मकांड इत्यर्थः उभयविधानादिति राजसूयवा
क्ये तु कर्त्रादिगुणविशिष्टस्यापूर्वकर्मण एवविध्यु
पगमान्नवाक्यभेदप्रसक्तिरिति तत्र राजपदस्य
कर्तृरूपगुणविधायकत्वमुक्तमिति भावः तृतीय
स्यपि सदृष्टांतमाशंकां निराकरोति नापीति राज्ञ
इति राज्ञः कर्तृतयाविधेयत्वाभावेपि राज्ञ एव राज
सूयाधिकारः सिध्यति राजपदसंनिधानेन स्वाराज्य
कामपदस्य क्षत्रियपरत्वावगमादन्यथा राजपद
वैयर्थ्यप्रसंगादिति तात्पर्येणायेषां मते राज्ञः कर्तृ
तयाविधिर्नाभ्युपगम्यते तेषां पक्ष इत्यर्थः ब्राह्मणा
धिकारपर्यवसानमित्यपि नोपपद्यत इत्यत्राहेत्तमा
ह अन्यत्रेति कर्मकांड इत्यर्थः इहापीति विविदिषा
वाक्येपीत्यर्थः त्रैवर्णिकाधिकारात्मविद्येति ब्राह्म
णवत्क्षत्रियवैश्ययोरपि विद्यायामर्थित्वलक्षणाधि
काराविशेषात् शूद्रस्यैव विद्यार्थयज्ञादिश्रुतयोः
प्रतिषेधाभावाच्चेत्यर्थः युक्तनयेति अधिकारिणा
मसंकोचस्यविधिगतानुष्ठापकत्वलक्षणप्रामा

णोपपादकत्वादिति भावः अन्यत्रकृत्स्नत्वाच्चोपप
त्तित्रयप्रामस्यापि क्षत्रियवैश्ययोरधिकारस्य ब्राह्म
णपदं अपवादकमित्याशंक्याह विधिसंसर्गहीने
ति उद्देश्यसमर्पकतया विधेयसमर्पकतया वा वि
धिवाक्यार्थान्वययोग्यतानुपयोगीत्यर्थः राजसूयवा
क्ये राजसूयस्यैव विधेयत्वेन त्रैवर्णिकाधिका
रिकत्वेनान्यत्रासक्तत्वाच्चोक्तं विधिसंसर्गहीनराज
पदसमभिव्याहारमात्राद्राजकर्तृनियम इति भावः
ननूक्तन्यायेन ब्राह्मणपदाभावेऽपि क्षत्रियवैश्ययो
रिव ब्राह्मणस्यापि विद्यार्थकर्मस्वधिकारसिद्धेः ब्रा
ह्मणग्रहणं व्यर्थमेव स्यादिति चेन्न विद्यार्थकर्मसु
ब्राह्मणस्य सुतराधिकारज्ञापनार्थतोपपत्तेः वैय
र्थ्यानवकाशादिति भावः ॥

ननु विद्याधिकारिमात्रोपलक्षणत्वे शूद्रस्या
पि विद्यायामर्थित्वादिसंभवेन तस्यापि वि
द्यार्थकर्माधिकारप्रसंग इति चेन्न अध्यय
नगृहीतस्वाध्यायजन्यतदर्थज्ञानवत एव
वैदिकेष्वधिकार इत्यपशूद्राधिकरणे अ
ध्ययनवेदवाक्यश्रवणादिविधुरस्य शूद्र
स्य विद्याधिकारनिषेधात् न शूद्राय मतिं
दद्यादिति स्मृतेगपात्ततोऽपि तस्य विद्याम

हिमाःवर्गस्तुपायासंभवेनतदर्थित्वानुपप
त्तेश्चतस्यविद्यायामनधिकारादितिकेचि
त् अन्येत्वाहुः शूद्रस्याप्यस्त्येवविद्यार्थिकर्मा
धिकारः तस्यवेदानुवचनाग्निहोत्राद्यसंभ
वेपिकेचोक्तसर्ववर्णाधिकारस्त्रीपंचाक्षर
मंत्रराजविद्यादिजपपापक्षयहेतुतपोदा
नपाकयज्ञादिसंभवात् वेदानुवचनेनय
ज्ञेनदानेनेत्यादिपृथक्करणविभक्तिश्रुते
विधुरादीनांविद्यैजपदानादिमात्रानुष्ठा
नानुमतेश्चवेदानुवचनादिसमुच्चयान
पेक्षणात् ॥
ब्राह्मणग्रहणस्योपलक्षणत्वपक्षेतिद्वसंगापेक्षाकते
न्विति अविधेयायांहिविद्यायामधिकारोनामविद्या
र्थित्वमात्रंतच्चशूद्रस्यापिसंभवतीतिक्षत्रियादेरिवत
स्यापिविद्यार्थिकर्मस्वधिकारोदुर्निवारइत्यर्थः शूद्रस्य
शुश्रूषासगुणब्रह्मविद्यासुनिर्गुणब्रह्मविद्यासाध
नवेदांतश्रवणादिषुचाधिकारमापेक्ष्यनास्त्यधिका
रइतिनिर्णीतमपशूद्राधिकरणेनस्याधिकाराभावे
चभाष्येहेतुरुपन्यस्तः वेदाध्ययनाभावादितिशूद्र
स्यवेदोच्चारणश्रवणसाधारणनिषेधेनवेदाध्यय
नाभावेपिवेदार्थभूतोपासनाद्यनुष्ठानेकिंनस्यादि
त्याशंक्यअध्ययनविधिनावेदजन्यवेदार्थज्ञानस्य

वेदार्थानुष्ठानेष्वनियमितत्वादध्ययनशून्यस्य तदभा
वात् न सगुणनिर्गुणविद्यानुष्ठानेष्वधिकारश्शुद्रके
नर्थाच तत्स्यार्थितया विद्यार्थकर्मस्वप्यधिकारो नास्ती
त्यर्थः ननु शूद्रस्य वेदोक्तयज्ञादिष्वधिकाराभावेपि व
स्यमाणरीत्या तस्य विद्यासाधनकर्मणां संभवाद्विद्या
कामनया शूद्रस्यापि तेषामनुष्ठानं संभवतीत्याशं
क्यातस्य विद्याकामनैव न संभवतीत्याह नशूद्रायेति
मतिं धास्यार्थज्ञाने विद्यामहिमा निरतिशयानंदब्र
ह्मप्राप्तिसाधनत्वे शूद्रस्यापि विद्यार्थकर्माधिकारप्र
संग इत्यत्र इष्टापत्तिरित्याह श्रव्येतिवत् कंठत उक्तः स
वैवर्णाधिकारो यस्मिन्नताहृष्टा विद्यादिजपे समनर्थोक्तः
श्रीमत्पंचाक्षरमेव मंत्रराजविद्याश्चादिपदं वशागामि
कपौराणिकमंत्रांतरसंग्रहार्थं नत्था च वह्नोत्तरखंडे
किं तस्य बहुभिर्मंत्रैः किं तीर्थैः किं तपोध्वरैः यस्योंनमः
शिवायेति मंत्रो हृदयगोचरः मंत्राधिराजराजो यः स
र्ववेदांतशेखरः सर्वज्ञाननिधानं च सोयं शैवषडक्षरः
श्रवणेन तिना मंत्रः सोयं पंचाक्षरस्स्तनः स्त्रीभिः शूद्रैश्च
संकीर्णैर्धार्यते मुक्तिकांक्षिभिरिति पाकयज्ञादीत्यादि
पदं द्विजसुश्रूषानामकीर्तनतीर्थस्नानादिसंग्रहार्थं
ननु विविदिषावाक्ये शूद्रसाधारणवर्णधर्माणामुप
लक्षणेपि यज्ञादीनामेकवाक्योपादानात्तेषां समुच्चय
स्य विद्यासाधनत्वं भाति यज्ञादिषु समुच्चयस्य शूद्रे वा
धित इति कथं तस्य विद्यार्थकर्माधिकार इत्याशंक्याहेत्व
सिध्या इत्यप्ययाति वेदानुवचनेनेति वेदानुवचनेनावि

३
सि॰ले
टी॰
१९

विविदिषंति यज्ञेन विविदिषंतीत्यादिरूपेण प्रत्येकं साध
नत्वप्रतीतेः न समुच्चयापेक्षा न हि वक्तायां हि वेदानु
वचनयज्ञदानतपोभिर्विविदिषंतीति वाक्यं स्यात् पृ
थक्करणविभक्तिश्रवणेऽपि वेदानुवचनेन यज्ञेन
च दानेन च तपसा चेति प्रतिपदार्थं चकारश्रुतौ वा वा
क्यं स्यात् यदग्नये च प्रजापतये चेत्यादिवदिति भावः

न च शूद्रस्य विद्यायामर्थित्वासंभवः श्राव
येच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः इत्या
दीतिहासपुराणश्रवणे चातुर्वर्ण्यस्याधिका
रस्मरणेन पुराणाद्यवगतविद्यामाहात्म्य
स्य तस्यापि विद्यार्थित्वसंभवात् न शूद्राय
मतिं दद्यादिति स्मृतेस्तु तदध्ययनानुपयो
ग्यग्निहोत्रादिकर्मज्ञाननिषेधपरत्वात् अ
न्यथा तस्य स्ववर्णधर्मस्याप्यवगत्युपायासं
भवेन शूद्रः चतुर्थो वर्ण एकजातिस्तस्यापि
सत्यमक्रोधः शौचमाचमनार्थे पाणिपाद
प्रक्षालनमेवैकं श्राद्धकर्म भृत्यभरणं स्व
दारतुष्टिः परिचर्या चोत्तरेषामित्यादितद्ध
र्मविभाजकवचनानामनुष्ठानलक्षण
प्रामाण्यापत्तेः न चैवं सत्यप शूद्राधिकार

णस्य निर्दिष्टत्वं तस्य न शूद्रे पातकं किं
चिन्न च संस्कारमर्हतीति स्मृतेर्गुरूपस
दनाख्यविद्यांगोपनयनसंस्कारविधुर
स्य शूद्रस्य सगुणविद्यासु निर्गुणविद्या
साधनवेदांतश्रवणादिष्वधिकारनि
षेधपरत्वात् ॥

यत्नापातनो विद्यामहिमावगमनुपायासंभवेन वि
द्यायामर्थित्वलक्षणाधिकारानुपपत्तिरिति तदनू
द्य निराकरोति न च शूद्रस्येति श्रावयेदिति ब्राह्मण
इति शेषः यदा तु त्रियादीन् श्रावयेत्तदा विशेषमा
ह कृत्वेति पुराणादिभिः साधनभूतैरवगतं विद्या
माहात्म्यं येन शूद्रेण सतथा तस्येत्यर्थः मतिनि
षेधवचनस्य संकोचं दर्शयति न शूद्रायेति ग्रन्थे
ति शास्त्रार्थज्ञानमात्रदाननिषेधपरत्वमित्यर्थः शू
द्रस्य स्वतः पुराणादिपठननिषेधादन्येभ्यो पि पुर
णादिश्रवणाभावे स्वधर्मावगतिर्न संभवतीत्यर्थः
इष्टापत्तिमाशंक्याह शूद्रश्चतुर्थो वर्ण इत्यादिना
जातिर्जन्म उपनयनाख्यद्वितीयजन्मशून्य इत्यर्थः
प्रक्षालनमेवेति न तु पांशुशयनमंगस्पर्शनादिकं
चेत्येवकारार्थः उत्तरेषामिति द्विजानामित्यर्थः
न शूद्राय मतिं दद्यादिति स्मृतेः शास्त्रार्थज्ञानमात्र
दाननिषेधपरत्वेपि वृद्धौ च मातापितरौ भार्या सा
ध्वी सुतः शिशुः अप्यकार्यशतं कृत्वा भर्तव्या मनुर

इ
सि·ले·
टी·
२·

20

ब्रवीदित्यादिवचनदर्शनेनतयैवाल्पणाउक्तलक्षण
मात्रादिसंरक्षणोपयोगपर्थेलाभायशूद्रास्त्रतिपु
राणादिपठनेप्रवर्तंतेतेभ्योविद्यामाहात्म्यस्वयमे
योरवगतिसंभवान्नकाप्यनुपपत्तिरितिमंतव्यं
नचैवमिति शूद्रस्यापिविद्यार्थकर्माधिकारस्वीका
रइत्यर्थः निर्विषयत्वमिति तदधिकरणस्यशूद्रा
धिकारनिषेधपरत्वादितिभावः सत्यंतदधिकर
णंशूद्राधिकारनिषेधपरंकिंतुविद्यार्थकर्माधि
कारनिषेधपरंनभवतिवेदांतश्रवणाधिकारनि
षेधपरत्वात्तस्येतिपरिहरति तस्यनशूद्रइत्यादि
ना वेदांतश्रवणसगुणोपासनेष्वधिकाराभावे
हेतुगर्भविशेषणमाह गुरूपसदनाद्येति शूद्र
स्यसंस्कारशून्यत्वमानमाह नशूद्रइति पातकमि
ति अभक्ष्यभक्षणादिकृतमित्यर्थः अध्ययनांगोप
नयनलक्षणः विद्यांगोपनयनलक्षणश्चद्विविध
मपिसंस्कारं निषेधति नचसंस्कारमर्हतीति शि
ष्यत्वेनस्वीकृत्यसमीपेस्थापनरूपंविद्यांगोपन
यनमाचार्यकर्तृकंतच्चशिष्यकर्तृकगुरूपसदन
सर्वेकत्वात् गुरूपसदनाद्यमित्युक्तं गुरूपसदने
चतद्विज्ञानार्थंसगुरुमेवाभिगच्छेदित्यादिनावि
द्यांगत्वमविहितंतथातेहोपनिन्यइत्यादिश्रुत्या
विद्यांगत्वेनोपनयनेचप्रतीयतइतिभावः तं
विद्यार्थिनंगुरुरुपनीतवानित्यर्थः ॥

निर्गुणविद्यायांशूद्रस्यापिविषयसौंदर्य

प्रयुक्तस्यार्थित्वस्य निषेद्धुमशक्यत्वात्
श्रविधेयायां च तस्यां तदतिरिक्ताधिकारा
प्रसक्त्या न निषेधायोगाच्च न च तस्य वेदां
तश्रवणासंभवे विद्यार्थकर्मानुष्ठानसं
भवेऽपि विद्यानुत्पत्तेर्न तस्य तदर्थकर्मानुष्ठा
नेऽव्यर्थमिति वाच्यं तस्य वेदांतश्रवणाधि
काराभावेऽपि भगवत्पादैः श्रावयेच्चतुरो
वर्णानिति चेतिहासपुराणाधिगमे चातु
वर्ण्याधिकारस्मरणादिह दृष्टवैफल्येनाल्प
धिकारः शूद्राणामिति स्थितमित्यपशूद्रा
धिकरणोपसंहारभाष्ये ब्रह्मात्मैक्यपरपु
राणादिश्रवणे विद्यासाधनेऽधिकारस्य द
र्शितत्वात् ॥

नन्वस्तु सगुणोपासनेष्विव निर्गुणविद्यासाध
नवेदांतश्रवणादिष्विव च निर्गुणविद्यायामप्यधि
कारनिषेधपरमपशूद्राधिकरणं किं तु स्याद्धि निगम
काभावात् तथा च निर्गुणविद्यायामधिकाराभावेन त
त्साधनकर्मस्व शूद्राधिकारो न सिध्येदित्यत आह
निर्गुणविद्यायामिति ब्रह्मविद्यालक्षणस्य विषय
स्य सौंदर्यं मुक्तिसाधनत्वं तज्ज्ञानं प्रयुक्तस्य विद्या
यामर्थित्वलक्षणाधिकारस्य तदधिकरणाभ्याये

३
सि॰ले॰
टी
२१

21

न निषेद्धुमशक्यत्वादित्यर्थः ननु शूद्रस्य विद्यायाम
र्थित्वलक्षणाधिकारसत्त्वेपि तदतिरिक्तस्य श्रुत्यधीन
वेदत्वादिरूपविशेषणांतरस्याभावात् कथं तस्यापि
कारो विद्यायामित्यत आह अविधेयायामिति चश
ब्दः शंकानिरासार्थः तदतिरिक्तेति अर्थित्वातिरिक्ते
त्यर्थः स्वर्गानुभववत् ब्रह्मानंदानुभवरूपाया निर्गु
णविद्यायाः फलरूपत्वादविधेयत्वं फलस्याविधेय
त्वात् तथा च यथा स्वर्गानुभवादौ फले तदर्थित्वमात्रम
धिकारस्तथा निर्गुणविद्यायामपि तदर्थित्वमात्रमे
वाधिकारः स च न निषेद्धुमशक्यः विधेयेष्वेवोपासना
दिषु त्रैवर्णिकाधिकारिविशेषणांतरापेक्षा शास्त्रे नि
रूपितेति विषमो दृष्टांत इति भावः असंभव इति
अपशूद्राधिकरणन्यायेन तदसंभवे सतीत्यर्थः तस्य
वेदांतश्रवणासंभवेपि ब्रह्मात्मैक्यपरपुराणादिश्र
वणाधिकारस्य भाष्ये दर्शितत्वात् शूद्रस्यापि संभवति
विद्योत्पत्तिरित्यर्थः भाष्ये तुशब्दोवधारणार्थः श्रावये
च्चतुरो वर्णानिति वचनेन शूद्रस्य पुराणादिश्रवणा
भ्यनुज्ञानेपि मनननिदिध्यासनयोरभ्यनुज्ञानाभा
वात् न मननाद्यनुष्ठानं तस्य सिध्यति न च मननादेः
श्रवणांगत्वात् तन्न पृथगभ्यनुज्ञानापेक्षेति वाच्यं प्र
याजदर्शपूर्णमासादेरिव प्रकृते शेषशेषिभावबो
धकप्रमाणाभावेन श्रवणादिष्वंगांगिभावव्यवहा
रस्य गौणत्वात् तथा च शूद्रस्याद्वैतपरपुराणादिभा
गश्रवणकृतेपि विद्योदयासंभवात् विद्यार्थकर्मा

नुष्ठानवैयर्थ्यं तदवस्थमेवेत्येवं स्वरसादाह विद्योत्प
त्तियोग्येति यद्वा इतिहासपुराणाभ्यां वेदं समुपबृंह
येदिति वचनादितिहासादिगतब्रह्मात्मैक्यपरभा
गस्य वेदान्तश्रवणाङ्गत्वेन वेदान्तार्थज्ञानोपकारक
त्वमात्रमेव न तु वेदान्तश्रवणमनपेक्ष्य स्वातन्त्र्येण ब्र
ह्मात्मैक्यज्ञानजनकत्वमिति निश्चीयते तथा सत्ये
वतद्वचनपूर्वार्द्धं संगच्छते बिभेत्यल्पश्रुताद्वेदो मा
मयं प्रहरेदितीति अयमर्थः अल्पं वेदमात्रं श्रुतं वि
चारितं येन पुरुषेण सोऽल्पश्रुतः ॥

विद्योत्पत्तियोग्यविमलदेवशरीरनिष्पा
दनद्वारा मुक्त्यर्थं भविष्यतीति त्रैवर्णिका
नां क्रममुक्तिफलकसगुणविद्यार्थकर्मा
नुष्ठानवत् वेदान्तश्रवणयोग्यत्रैवर्णिक
शरीरनिष्पादनद्वारा विद्योत्पत्त्यर्थं भवि
ष्यतीति शूद्रस्य विद्यार्थकर्मानुष्ठानाविरो
धात्तस्माद्धि विदिषावाक्ये ब्राह्मणपदस्य
यथाप्राप्तविद्याधिकारिमात्रोपलक्षणत्वे
न शूद्रस्यापि विद्यार्थकर्माधिकारः सिद्ध्यत्ये
वेति नन्वस्तु कर्मणां चित्तशुद्धिद्वारा वि
द्योपयोगः संन्यासस्य किंद्वारा तदुपयोगः
केचिदाहुः विद्योत्पत्तिप्रतिबंधकदुरिता

इ
सि. ले.
टी.
२२

नामनेनत्वात किंचिद्विज्ञातायत्नुष्ठाननिवंधि
किंचित्संन्यासापूर्वनिवन्धमिति कमेव वि
नश्युद्धिद्वारैव संन्यासस्यापितदुपयोगः

तस्मात्पुरुषात्तेन श्रुतो वेदो बिभेति कथं बिभेतीत
त्राह मामिति अयमल्पश्रुतः पुरुषः मां श्रुतं वेदप्रत
रेत् मद्विचारनूपायो मीमांसायां न्यायाभासत्वादिदो
षयामामप्यर्थान्तरपरं संभावयेत् इति घृष्टो हेत्वर्थः
एवं प्रतारणासंभवाद्धेतोः इतिहासपुराणाभ्यां वेदं
समुपबृंहयेत् इतिहासपुराणवचनैर्मीमांसानु
सारिभिः तत्संप्रदायन्यायतत्त्वनिश्चयसंपादनद्वारा मी
मांसानिर्णीतार्थमेव मां वेदं ग्राहयेदिति तथा च शू
द्रस्य वेदान्तश्रवणरहितस्य वेदान्तार्थोपबृंहणरूप
त्वात्मैकपरेतिहासादिश्रवणे प्रवृत्तावपि ना
स्ति विरोधः श्रावयेच्चतुरो वर्णानिति वचनमपि
शूद्रस्याद्वैतपरपुराणादिश्रवणोपोद्बलकार्थमभ्यु
नुज्ञापरं अपशूद्राधिकरणभाष्येपि शूद्रस्याद्वैतपुरा
णश्रवणादिवर्णनं बिभेत्यल्पश्रुतादिति वचनं ना
स्तीति कृत्वाकृतमिति न भाष्यविरोधोपि तथा च वे
दान्तश्रवणैकसाध्याद्विद्यातदभावे शूद्रस्य नास्ति य
द्वैवत्पक्षरसादाह वियोत्पत्तियोग्यतिसुक्ष्मार्थमिति
सूत्रणाच्चैवापासनमिति शेषः वियोत्पत्त्यर्थत्वमिति
शूद्रस्य मद्गुप्तिनयमीणपवियोत्पत्त्यर्थत्वमविघ्न

नीति निश्चयेन तदनुष्ठानसंभवादित्यर्थः तस्मा
दिति शूद्रस्य विद्यार्थकर्मानुष्ठाने वाधकाभावादित्य
र्थः विद्याधिकारिमात्रेति नन्वब्राह्मणपदस्य ब्राह्मण
मात्रपरत्वं न वा त्रैवर्णिकमात्रपरत्वमिति मात्रपदा
द्यर्थः ब्राह्मणपदस्य द्विजोपलक्षणत्वे वार्तिकवच
नैयोर्हेतुरुक्तः त्रयाणामात्मबोधनसाधनकर्मस्व
धिकाराविशेषादिति तस्य हेतोः शूद्रसाधारणत्वादि
तिभावः किंद्वारेति किमदृष्टद्वारा विद्योपयोगः कि
वा दृष्टद्वारा नाद्यः विद्योत्पत्तिप्रतिबन्धकदुरितस्य
यज्ञाद्यनुष्ठानजनितापूर्वेणैव निवर्तितत्वेन संन्या
सजनितापूर्वनिवर्त्यदुरिताभावे सति संन्यासवै
यर्थ्यप्रसंगात् न द्वितीयः तदनुपलंभादित्याद्ये
पाभिप्रायः तत्राद्यपक्षं समर्थयन्ते केचिदाहुरिति
ननु संन्यासात्पूर्वस्य न विद्योदयहेतुत्वम् संन्या
सिनामपि केषांचिद्विद्याऽदृष्टेन श्रवणाद्यनुष्ठा
नदर्शनात् केषांचित्संन्यासं विनैव विद्योदयस्य
प्रमाणसिद्धत्वाच्चेत्यत आह ॥

तथा च गृहस्थादीनां कर्मच्छिद्रे श्रवणा
द्यनुतिष्ठतां तत्रास्मिन्नु जन्मनि विद्याऽवाप्तिः
किं तु जन्मान्तरे संन्यासलब्धवयैषां तु गृह
स्थानामेव सनकजनकादीनां विद्याऽदृष्टप्य
तेन तेषां पूर्वजन्मनि संन्यासाद्विद्याऽवाप्तिः

अतो न विद्यायाः संन्यासापूर्वं व्यभिचारशं
कापीति अन्येतु शान्तो दान्त उपरत इत्यादि
श्रुतौ उपरतशब्द गृहीतेन तया संन्यासस्य
साधनचतुष्टयान्तर्गतत्वात् सहकार्यन्त
रविधिरिति सूत्रभाष्ये तद्वतो विद्यावतः
संन्यासिनो बाल्यपांडित्यापेक्षयान्तरीय
मिदं मौनं विधीयते तस्माद्ब्राह्मणः पांडि
त्यमित्यादिश्रुतौ ततः प्राक् भिक्षाचर्यं च
रंतीति संन्यासाधिकारादिति प्रतिपादना
त् ॥

तथा चेति संन्यासस्य विद्यां प्रति दृष्टद्वारानुपलंभे
नादृष्टद्वारैव विद्यावाप्तिहेतुत्वे संन्यासविधिना
सिद्धे सतीत्यर्थः न च दृष्टद्वारानुपलंभो सिद्धः लौ
किकवैदिकव्यापारविक्षिप्तचित्तस्य विद्योदयासं
भवेन सर्वकर्मसंन्यासस्य विक्षेपनिवृत्तिरूपदृष्ट
द्वारा विद्याहेतुत्वसंभवादिति वाच्यं लौकिकवैदिक
कर्मवतामपि केषांचित्पुरुषधौरेयाणां दैन्यहर्ष
क्रोधभयादिलक्षणविक्षेपनिवृत्तेरनुभवसिद्धत्वे
न तदर्थं संन्यासानपेक्षणादिति भावः संन्यासस्या
दृष्टद्वारकत्वपक्षमेवावलंब्य संन्यासापूर्वस्य श्रव
णाद्यधिकारिविशेषणत्वेन विद्योपयोगं सप्रमा
णमाह अन्येतीति शान्त इति तितिक्षुः समाहितः

श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येदिति श्रुति
शेषः शमः अन्तरिन्द्रियनिग्रहः दमो बाह्येन्द्रिय
निग्रहः उपरतिर्नित्यकर्मत्यागः ननु शान्तदान्त
पदाभ्यामेव कर्ममात्रस्य वारितत्वादुपरतिश्रु
तिर्व्यर्थेति चेन्न शमदमविधिशास्त्रस्य सामान्य
शास्त्रत्वात् तस्य नित्यकर्मविधिना विशेषशास्त्रे
ण नित्यनैमित्तिककर्मव्यतिरिक्तबाह्यान्तःकरण
व्यापारनिवृत्तिमात्रपरतया संकोचे सति नित्य
कर्मत्यागालाभात् पुनरुपरतिश्रुत्या नित्यकर्म
त्यागो बोध्यत इति न तस्यावैयर्थ्यं तितिक्षुः शीतो
ष्णादिद्वन्द्वसहिष्णुः समाहितः श्रवणाद्यपेक्षित
चित्तसमाधानवान् देवतागुरुवेदान्तेषु श्रद्धैव
वित्तं यस्य सः श्रद्धावित्तो भूत्वेत्यस्य प्रत्येकमन्वयः
आत्मन्येव कार्यकारणसंघात एव संघा
तसाक्षिणमात्मानमहं ब्रह्मास्मीति पश्येदिति श्रु
त्यर्थः साधनचतुष्टयेति नित्यानित्यवस्तुविवेकः
ऐहिकामुष्मिकभोगविरागः शमादिषट्कं मुमुक्षा
चेति साधनचतुष्टयं तच्च श्रवणाद्यधिकारिविशे
षणमित्यवस्थापितं प्रथमसूत्रे इति भावः सं
न्यासाश्रमस्याधिकारिविशेषणत्वे हेत्वन्तरमाह
सहकार्यन्तरेत्यादिना प्रतिपादनादित्यन्तेन सह
कार्यन्तरस्य विद्याप्रतिसाधनान्तरस्य मौनस्य वि
धिरथ मुनिरिति शाह इति सूत्रभागार्थः सोऽप
दं तद्वत इति तस्याख्यानं विद्यावत इति श्रव

णाद्यनुष्ठानोपयोग्यापातज्ञानवत इत्यर्थः तद्धतः
सहकार्यंतरविधिरिति सूत्रे संन्यासिन इति कथं ल
भ्यते तत्राह तस्मादिति तस्मादित्यपि श्रुतिपदमे
व यस्मादतीताः ब्राह्मणाः आपाततो ब्रह्मात्मानं वि
दित्वा तत्वसाक्षात्कारार्थं व्युत्थानशाहितं संन्यासं
कृतवंतः तस्मादिदानीतनोपि ब्राह्मणो मुमुक्षुः
संन्यस्य पांडित्यादिकं तत्वसाक्षात्कारार्थमनुतिष्ठे
दिति श्रुत्यर्थः पांडित्यं श्रवणं मौनं ध्यानं तत इति
तस्माद्ब्राह्मण इति वाक्यात्पूर्वमित्यर्थः ॥

स्यक्ताशेषक्रियस्यैव संसारं प्रजिहासतः
जिज्ञासोरेव चैकात्म्यं त्रय्यंतेष्वधिकारि
तेति वार्त्तिकोक्तेश्च संन्यासापूर्वस्य विद्या
साधनवेदांतश्रवणाद्यधिकारिविशे
षणत्वमिति तस्य विद्योपयोगमाहुः अ
परे तु श्रवणाद्यंगतयाम्नातानफलता
संन्यासस्यासिद्धेति विवरणोक्तेरनन्यव्या
पारतया श्रवणादिनिष्पादनं कुर्वतस्त
स्य विद्यायामुपयोगः दृष्टद्वारे संभवत्य
दृष्टकल्पनायोगात् यदि त्वनलसस्य धी
मतः पुरुषधौरेयस्याश्रमांतरस्थस्यापि

कर्मच्छिद्रेषु श्रवणादि संपद्यते ॥

संन्यासात्पूर्वस्याधिकारिविशेषणत्ववार्तिकसंमति
रूपहेत्वंतरमाह त्यक्तेति वार्तिके प्रथमविशेषणं सं
न्यासपरं ततश्च संन्यासमुमुक्षाजिज्ञासानां समुच्चया
र्थेन चकारेण मुमुक्षुत्वादेरिव संन्यासस्यापि वेदांत
श्रवणादिष्वधिकारिविशेषणत्वं भातीति भावः संन्या
सात्पूर्वस्येति संन्यासस्य त्यागलक्षणक्रियारूपेणानु
ष्ठानयोगादपूर्वपर्यंतस्थावत्वमिति संन्यासस्य दृष्ट
द्वाराविद्योपयोग इति द्वितीयपक्षं समर्थयते अपरे
त्विति ननु संन्यासस्य विद्यांगत्वबोधकश्रुत्यादिहेतस्य
श्रवणाद्यंगत्वबोधकप्रमाणाभावाद्विवरणोक्तिरयु
क्तेत्याशंक्य तस्यास्तात्पर्यमाह अनन्यव्यापारतयेति
कादाचित्कं श्रवणादिकं विद्योदयद्वारा नात्मतत्त्वसा
धनं किंतु सार्वकालिकं ब्रह्मसंस्थोमृतत्वमेति आ
सुप्तेरामृतेः कालं नयेद्वेदांतचिंतयेत्यादिश्रुतिस्मृ
तिशतेभ्यः तथा चानन्यव्यापारतया श्रवणाद्यनुष्ठा
नं विदधता शास्त्रेण संन्यासोपेक्ष्यते गृहस्थादेः स्वा
श्रमविहितकर्मव्यग्रस्य सदा श्रवणाद्यनुष्ठानासंभ
वात् तथा विद्यासाधनत्वेन संन्यासं विदधतापि शा
स्त्रेण द्वारतया निरंतरश्रवणाद्यनुष्ठानमपेक्ष्यते सं
न्यासस्य साक्षाद्विद्यासाधनत्वाभावात् दृष्टद्वारसंभ
वेऽदृष्टद्वारकल्पनानुपपत्तेश्च तत्रापि श्रवणादि

कंतत्वंबंजकत्वादर्थतः प्रधानं भवति संन्यासस्तूक्तहे
त्वभावाद्गुणभूततया भवति ह्येवं श्रवणादिविधेः
संन्यासविधेश्च परस्परापेक्षावलादेकवाक्यभावमाप
न्नाभ्यां विधिभ्यां संन्यासांगकं मनननिदिध्यासनसहि
तं श्रवणं विधीयत इति सिद्धं संन्यासस्य श्रवणांगत
याऽऽत्मज्ञानफलकत्वेति भावः यद्वा विवरणोक्तेरयं
भावः श्रवणविधिस्तावत् श्रवणसाधनतया विक्षेपनि
हतिं तद्धेतुसंन्यासं चापेक्षते विक्षिप्तस्य चेतसः श्रवणा
द्यनुष्ठाने प्रवृत्त्यसंभवात् गृहस्थादेश्च स्वाश्रमकर्म
करणकालातिरिक्तकालेऽपि बहुविघ्नतया विक्षे
पावश्यंभावात् संन्यासविधेरपि विक्षेपनिहतिरूपदृ
ष्टद्वारा श्रवणादिकं घटयित्वा विद्यां संपादयतः संन्या
सस्य विधानेन चारितार्थ्यसंभवे अदृष्टद्वारा विद्यासाध
नसंन्यासविधायकत्वासंभवात् तथा च पूर्ववत् संन्या
सस्य श्रवणांगतयैव विद्याफलकत्वेन त्वदृष्टद्वारे
ति सिद्धमित्यस्मिन् व्याख्याने अनन्यव्यापारतयेत्यस्य
विक्षेपनिहतिद्वारेत्यर्थो विवक्षितः तस्येति संन्यासस्ये
त्यर्थः ननु संन्यासस्य विक्षेपनिहतिद्वारा श्रवणांग
भावमापन्नस्य विद्यासाधनत्वमुक्तमनुपपन्नं संन्यासं
विनापि विक्षेपनिहतिः केषुचित् श्रवणाधिकारिषु सं
भवादिति शंकते यदि त्विति अनलसस्येति सत्त्वगुण
प्रधानस्येति यावत् धीमत इति विषयेषु दोषदर्शनशी
लस्येति यावत् पुरुषधौरेयस्येति विषयेभ्यः सकाशा
दिंद्रियाणां निग्रहे समर्थस्येत्यर्थः ॥

तदा चतुर्थाश्रमेषु संन्यासाश्रमपरिग्रहेणै
व श्रवणादि निवर्तनीयमिति नियमोऽस्तु पे
य इति नन्वस्मिन्पक्षे क्षत्रियवैश्ययोः क
थं वेदान्तश्रवणाद्यनुष्ठानं संन्यासस्य ब्राह्म
णाधिकारत्वात् ब्राह्मणो निर्वेदमायाद् ब्रा
ह्मणो व्युत्थाय ब्राह्मणः प्रव्रजेदिति संन्यास
विधिषु ब्राह्मणग्रहणात् अधिकारिविशेष
समर्पणाय ब्राह्मणग्रहः न संन्यासविधिर्यस्मा
त्कृतेन क्षत्रियवैश्ययोरिति वार्तिकोक्तेश्चेति
चेत् अत्र केचिद् यदि वेतरथा ब्रह्मचर्यादेव प्र
व्रजेद्गृहाद्वा वनाद्वेत्यविशेषश्रुत्या ब्राह्मणः
क्षत्रियो वापि वैश्यो वा प्रव्रजेद्गृहात् त्रयाणां
वर्णानां वेदमधीत्य चत्वार आश्रमा इति स्मृत्य
नुगृहीतया क्षत्रियवैश्ययोरपि संन्यासाधि
कारसिद्धेः श्रुत्यन्तरेषु ब्राह्मणग्रहणं श्रेयाण
मुपलक्षणं अत एव वार्तिकेऽप्यधिकारिविशे
षस्येति श्लोकेन भाष्याभिप्रायमुक्त्वा त्रयाणा
मविशेषेण संन्यासः श्रूयते क्वचिद्यदोपल
क्षणार्थं स्याद्ब्राह्मणग्रहणं तदेत्यनन्तरश्लोके
न स्वमतेन क्षत्रियवैश्ययोरपि संन्यासाधिका

३
सि॰ले॰
टी॰
२९

26

रोदर्शितइत्यनयोः श्रवणाद्यनुष्ठानसिद्धिं
समर्थयेते अन्येत्वनेकेषु संन्यासविधिवाक्ये
षु ब्राह्मणग्रहणादुदाहृतजाबालश्रुतौ सं
न्यासविधिवाक्ये ब्राह्मणग्रहणाभावेपिक्ष
त्रियेतरसिद्धब्राह्मणाधिकारमेवसिद्धं कृत्वा
संन्यासावस्थायामयज्ञोपवीतीकथं ब्रा
ह्मणइतिब्राह्मणपरामर्शाच्च ब्राह्मणस्यैव
संन्यासाधिकारः ॥

एतैर्विशेषणैर्विक्षेपहेतूनामभाववचनात् विक्षेप
निवृत्तिरुक्ता संन्यासफलस्य विक्षेपाभावस्य संन्यासा
देवसंन्यासादन्यतोपिप्राप्तौ संन्यासस्य विधिरस्ति तस्य
श्रवणाद्यपेक्षितविक्षेपनिवृत्तिप्रतिपक्षप्राप्तिः पक्षे
वाप्राप्तिरितिलभ्यते तथा च माभूत् संन्यासाश्रमवि
धिरपूर्वविधिः नियमविधिस्तु भवेदेवेतिसमायाते
नदेति परिग्रहेणैवेति विक्षेपनिवृत्तिद्वारेतिशेषः
नन्वस्मिन् पक्षद्वयइति संन्यासस्याधिकारिविशेषण
त्वपक्षे श्रवणाङ्गत्वपक्षे चेत्यर्थः कथमिति संन्यासा
भावादितिभावः तयोः संन्यासाभावे हेतुमाह संन्या
सस्येति ब्राह्मणस्यैवसंन्यासाधिकारेमानमाह ब्राह्मण
इतिनिर्वेदं वैराग्यं तत्पूर्वकसंन्यासंन्यासंकुर्यादित्य
र्थः निर्वेदप्राप्तिहेतुवैराग्यस्य संप्रति सामग्रीत्वेन तस्मि
न सति संन्यासस्यावश्यकत्वात् संन्यासविधिरेवाय

मितिभावः अनुत्पाद्येति संन्यसेदित्यर्थः यस्माद्भुताव
धिकारिविशेषस्य ज्ञानाय ब्राह्मणग्रहः तस्मात्क्षत्रि
यवैश्ययोः संन्यासविधिर्नास्तीति वार्तिकयोजना
अत्र केचित्तयोः श्रवणाद्यनुष्ठानसिद्धिं समर्थयंत
इति संबंधः ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी
भूत्वा प्रव्रजेदिति पूर्वं श्रुतौ चातुर्णामप्याश्रमाणां
समुच्चयं प्रतिपाद्य येतेषां विकल्पं दर्शयति यदि
वेतरथेति यदि वेत्यस्य ब्रह्मचर्याश्रमएव वैराग्य
मुत्पन्नं चेदित्यर्थः तत्र तदनुत्पन्नावाह गृहाद्वेति
गृहाश्रमेपि तदनुत्पन्नावाह वनाद्वेति अविशेषे
ति ब्राह्मणादिविशेषग्रहरहितेत्यर्थः अतएवेति
वर्णत्रयसाधारणतया संन्यासस्य श्रुतिस्मृतिसि
द्धत्वादेवेत्यर्थः यदायदिवेति श्रुतौ श्रूयते तदाउ
पलक्षणार्थं स्यादिति संबंधः अन्येति भाष्यानु
वर्तिन इत्यर्थः श्रुत्यंतरसिद्धमिति ब्राह्मणो व्युत्था
येत्यादि श्रुत्यंतरसिद्धमित्यर्थः सिद्धं कृत्वेति विशे
षेण संन्यासविधिवाक्यानां सर्वेषामेकवाक्यत्वा
दितिभावः कृष्णमिति तत्र यज्ञोपवीतादेर्ब्रह्म
णत्वव्यंजकत्वात्तत्परमहंससंन्यासे च तदभावाद
पीत्यर्थः यद्यत्र क्षत्रियवैश्ययोरपि संन्यासो विव
क्षितः स्यात्तदा कथं ब्राह्मण इति वत्कथं क्षत्रियः
कथं वैश्य इत्यपि श्रूयेत न तु श्रूयते तस्मात्तयोः
संन्यासः श्रुत्यभिमत इति भावः ॥

रु
सि. ले.
टी.
२२

27

विरोधाधिकारणात्पायेन श्रुत्यविरुद्धस्ये
व सन्न्यासस्याश्रमत्वात् यत्तु संन्यासस्य
सर्वाधिकारत्वे वार्तिकवचनेन तद्धि हन्तसंन्या
सविषयं नत्वान्तरविविदिषासंन्यासे भा
ष्याभिप्रायविरुद्धसर्वाधिकारप्रतिपाद
नपरं सर्वाधिकारादिवेदविज्ञानं चेदपे
यते ज्ञानाधिकारनियमो व्याख्यानेक्रियते
वलादित्यनन्तरश्लोके न ब्रह्मज्ञानोदया
नन्तरं जीवन्मुक्तेन क्रियमाणो विद्वत्संन्या
सेपदाधिकारनियमनिराकरणात् एवं
च ब्राह्मणानामेव श्रवणाद्यनुष्ठाने संन्या
सोऽङ्गत्वात् क्षत्रियवैश्ययोस्त्वाश्रयेत्तः श्रवणा
द्यधिकार इति तयोः श्रवणाद्यनुष्ठानं नि
र्वाहः न हि संन्यासस्य श्रवणापेक्षितत्वप
क्षे श्रवणमात्रस्य तदपेक्षा नियतं शाकाते
कमुक्तिफलकसगुणोपासनया देवभा
वेप्राप्तस्य श्रवणादौ संन्यासमन्तरेणापि स्या
वश्यं वक्तव्यत्वात् ॥

एवं संन्यासविधीनामेकवाक्ये स्थिते सति ब्राह्मणः
क्षत्रियो वापीति वचनं जाबालश्रुतितात्पर्यीस्तान

स्मृति

मूलत्वादप्रमाणमित्याह विरोधाधिकरणन्यायेने
ति प्रत्यक्षश्रुतिविरुद्धस्मृतिवचनमप्रमाणमिति वि
रोधाधिकरणन्यायः तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्ये
त्यादिश्रुतौ संन्यासाधिकारानुरोधेन ब्राह्मणः संन्यस्य
पाण्डित्यादिकमनुतिष्ठेदिति वाक्यार्थलाभात् विद्या
र्थसंन्यासे विविदिषुणा क्रियमाणे ब्राह्मणस्यैवाधिका
र इति भगवतो भाष्यकारस्य मतं यदि वार्त्तिकवचन
स्य प्रमाणमूलभाष्यकारमतविरुद्धेऽर्थे नान्यार्थकल्प
ना तदा संन्यासस्य साधारण्यप्रतिपादकस्मृतिवचन
वद्वार्त्तिकवचनमपि हेयमेव स्यादतो भाष्याविरुद्धा
र्थपरं वार्त्तिकवचनमित्याह तद्धीद्धसंन्यासविष
यमिति विविदिषासंन्यासे सर्वाधिकारप्रतिपादन
परं न संभवतीत्यत्र हेतुं वदन्नस्माह सर्वाधिकारेति क्ष
त्रियवैश्ययोस्तत्त्वज्ञानमप्युपेयं तेन वा नात्यः जनका
दीनां तत्त्वज्ञानवत्त्वप्रतिपादकशास्त्रविरोधानापः
तत्त्वज्ञानेन कर्माधिकारप्रयोजकवर्णाश्रमाद्यध्यास
निवृत्तौ सकलकर्मनिवृत्तिरूपविद्वत्संन्यासस्य क्ष
त्रियवैश्ययोरपि वारयितुमशक्यतया विविदिषासं
न्यासवद्विद्वत्संन्यासेऽपि ब्राह्मणस्यैवाधिकार इति
नियमासंभवादिति भावः अतो बलान्नियमः क्रियते
तादृशं बलं नास्तीत्यर्थः एवं चेति अवर्णगत्वेनापि
कारिविशेषणत्वेन वा विद्यासाधने विविदिषासंन्या
से ब्राह्मणस्यैवाधिकार इति सिद्धे सतीत्यर्थः ननु सं
न्यासस्याधिकारिविशेषणतया अंगतया वा श्रवणा

पेक्षितत्वपक्षे श्रवणमात्रस्य संन्यासापेक्षत्वावग
मात् क्षत्रियवैश्ययोर्विविदिषासंन्यासरहितयोः
श्रवणानुष्ठानं नास्तीत्येव पर्यवस्यति न तु तयोः श्र
वणसंन्यासनिरपेक्षमिति तथा च कथं तयोः श्रव
णाद्यनुष्ठाननिर्वाहः तत्राह नहीति देवभावप्राप्त
स्येति न च सगुणोपासकस्य ब्रह्मलोकंगतस्योपास
नया देवभावप्राप्तस्य निर्गुणब्रह्मसाक्षात्कारायोपा
सके न क्रियमाणे श्रवणादौ संन्यासस्याव्यभिचार इ
त्युक्तं तस्य सगुणविद्यासामर्थ्यादेव निर्गुणसा
क्षात्कारसंभवेन श्रवणाद्यनुष्ठानस्याभावादिति वा
च्यं देवताधिकरणे सगुणविद्यया देवभावप्राप्तमु
पासकमेव प्राधान्येन विषयीकृत्य श्रवणादौ देवा
द्यधिकारस्य निरूपितत्वेन तस्यापि श्रवणाद्यनुष्ठानं
विना विद्योदयस्य प्रागेव श्रवणविधिविचारावस
रे दर्शितत्वात् तथा च तत्र व्यभिचारात् संन्यासो न
श्रवणमात्राङ्गं किं तु ब्राह्मणकर्तृकश्रवणस्यैवाङ्ग
मिति क्षत्रियवैश्ययोः संन्यासाभावेऽपि श्रवणाद्यनु
ष्ठाननिर्वाह इत्यर्थः ॥

देवानां कर्मानुष्ठानाप्रसक्त्या तत्त्यागरूपस्य
संन्यासस्य तेषु संभवादित्याहुः अपरे तु ब्र
ह्मसंस्थोऽमृतत्वमेतीति श्रुत्युदितायस्य ब्रा
ह्मणसंस्थासमाभिरनन्यव्यापारत्वरूप
[illegible]न्निष्ठत्वेन तस्य श्रवणादिष्वप्यधिकारः

गच्छन्तिष्ठन्नो वापि जाग्रतः स्वप्नोपि वा न
विचारपरं चेतो यस्यासौ स्मरन्नुच्यते आस
मेवास्मरतेः कालेन येहदानविं नयेत्यादिस्मृ
तिषु सर्वदा विचारविधानात् सा च ब्राह्मणि
संध्याविना संन्यासमाश्रमान्तरस्थस्य न सं
भवति स्वस्वाश्रमविहितकर्मानुष्ठानवै
यग्र्यादिति संन्यासरहितयोः क्षत्रियवैश्य
योर्न मुख्यः श्रवणाद्यधिकारः ॥

ननु देवानामपि कुतः संन्यासाभावः तत्राह देवाना
मिति ननु दैवकर्तृकश्रवणे संन्यासाश्रमस्य यदि
व्यभिचारः नहि त्रैवर्णिकमनुष्यकर्तृकश्रवणे संन्या
साश्रमस्य हेतुत्वमस्तु न तु ब्राह्मणमात्रकर्तृके तथा
संकोचे मानाभावात् उक्तं हि प्रागेव चतुर्थाश्रमेषु
संन्यासाश्रमपरिग्रहेणैव श्रवणादिर्निर्वर्तनीय
मिति स चाश्रमविभागो वर्णत्रयसाधारणः एवं न
ब्राह्मणमात्रगतः तथा च संन्यासिनो ब्राह्मणस्येव
संन्यासहीनयोः क्षत्रियवैश्ययोः श्रवणादौ नाधि
कारः संभवतीत्यस्वरसादाह अपरेत्विति अस्तु दि
ना ब्राह्मणि संध्या यस्य संभवति तस्य मुख्योधिका
र इति संबंधः संध्यापदस्य व्याख्यानं समाधिलस्या
पि व्याख्यानमनन्येति अस्मतत्वकामस्य नैरंतर्येण

३
सि॰ले॰
टी॰
२५

विचारकर्त्तव्यतायां स्मृतिवचनान्युदाहरति गच्छन्
इतिस्वपन्निति ध्यायन्नेवेत्यर्थः सजीवति मनो यस्य
मननेनैव जीवतीत्यादिवचनसंग्रहार्थमादिपदं मन
नेन तत्त्वचिन्तनेन तद्रहितो जीवन्नेव मृत इत्यर्थः अयं च
मुख्याधिकारः संन्यासिनामेवेत्याह सा चेति वैयग्र्या
दिति व्यग्रत्वादित्यर्थः सार्वकालिकी विक्षेपनिवृत्ति
रसंन्यासिनां न भवतीति भावः न मुख्य इति प्राप्तौ यो
धिकारो नास्तीत्यर्थः अयं भावः ब्रह्मसंस्थोऽमृतत्वमेती
ति श्रुत्या पाण्डित्यश्रुत्यैव ब्रह्मनिष्ठायामेकः संन्यासा
श्रमो विधीयते ब्रह्मसंस्थाशब्दितायाः ब्रह्मनिष्ठायाः
संन्यासाश्रमे संभवादाश्रमान्तरेष्वसंभवादिति प्रति
पादितं संन्यासाधिकरणे भाष्यादौ तथा च ब्रह्मनिष्ठ
त्वस्य संन्यासाश्रमधर्मत्वेन विहितत्वात् संन्यासिनो ब्रा
ह्मणस्य ब्रह्मनिष्ठत्वं स्वधर्म इति संन्यासिनः तत्र मु
ख्याधिकारः तस्य ब्रह्मनिष्ठाव्यतिक्रमे प्रत्यवायाव
गमाच्च तथा च परमहंसोपनिषदि श्रूयते काष्ठदं
डोऽधृतो येन सर्वाशी ज्ञानवर्जितः स याति नरकान्
घोरान् महारौरवसंज्ञकानिति काष्ठदंडोपलक्षितः
संन्यासाश्रमोऽधृतः परिगृहीतो येन सः सर्वाशी सर्वं
विषयजातमशितुं भोक्तुं शीलमस्यास्तीति सर्वाशी
बाह्यान्तःकरणजयरहितः इति यावत् ज्ञानवर्जितः
ज्ञानाभ्यासरहित इत्यर्थः यः संन्यस्याश्रमादिसहितं
ब्रह्मनिष्ठत्वेनानुतिष्ठति स नो वाङ्गं निगच्छतीत्य
र्थः यथा संन्यासिनो ज्ञाननिष्ठाविधायकानि संन्य

स्यश्रवणं कुर्यात् गच्छतस्तिष्ठतो वापि आसुप्तेरामृ
तेः कालमित्यादीनि स्मृतिवचनानि सहस्रशः सन्ति
तथा नित्यपरित्यागे प्रत्यवायबोधकान्यपि स्मृतिवच
नानि सहस्रशः सन्ति च पदार्थविवेकाय संन्यासः
सर्वकर्मणां स्वरूपाद्विधीयते यस्मात्त्यागी पतितो
भवेत् नित्यकर्म परित्यज्य वेदान्तश्रवणं विना वर्त
मानस्तु संन्यासी पतत्येव न संशय इत्यादीनि सर्वा
श्रमसाया ॥

किंच दृष्टार्थश्च विद्याप्रतिबन्धाभावमात्रे
णाप्यर्थिनमधिकरोति श्रवणादिष्विति
अन्तरा चापि तु तद्दृष्टेरित्यधिकरणभाष्ये
क्न्यायेन शूद्रवत्प्रतिषिद्धयोर्विधुरादी
नामिव देहान्तरे विद्याप्रापकेणानुख्या
धिकारमात्रेण श्रवणानुमतिः नत्वन्तरा
चापि तु तद्दृष्टेरित्यधिकरणे विधुरादीना
मनाश्रमिणामङ्गीकृतः श्रवणाद्यधिका
रो मुख्य इति वक्तुं शक्यते ॥

रणेनापि स्वधर्मस्य विगुणस्यापि परित्यागे महान
नर्थः स्मर्यते श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठि
तात् स्वधर्मे निधनं श्रेयः परधर्मो भयावह इत्यादौ सं
न्यासाधिकरणे भाष्यकारैरेवमनन्तर्वमभिप्रेत्य संन्या

इ
सि· ले
टी·
इं
30

स्मिनोनन्यथापारतयाश्रवणादितिप्पादनमयुक्तवे
तःपातित्यकंठतएवोक्तंतथाचभाष्यंब्रह्मनिष्ठत्व
मेवहितस्यप्रशमाद्युपबृंहितंहितंत्वाश्रमविहितंकर्म
यज्ञादीनीवेतरेषांतद्व्यतिक्रमेचतस्यप्रत्यवायइ
तितस्माच्छ्रवणादेर्भिन्नंप्रतिविहितत्वात् तदति
क्रमेभिक्षोःप्रत्यवायावगमाच्चसंन्यासिनःश्रवणा
दौमुख्योधिकारः संन्यासरहितानुप्रतितुश्रवणा
देरविहितत्वादकरणेप्रत्यवायानवगमाच्चनास्ति
तेषांमुख्योधिकारइतिनतुतत्रियादिकंप्रतिश्रव
णादिविधानाभावेसत्यधिकारएवनास्तीतिउक्तो
नोच्यतेइतिशंकतेकिंविति त्रैवर्ण्याधिकाररूपमुख्या
धिकारासंभवेधिकारमात्रापिकाररूपगौणाधिकारसं
भवान्नैवमितिभाष्येणोत्तरमाह दृष्टार्थेवेति किं
त्वमुख्याधिकारमात्रेणश्रवणाद्यनुष्ठितिरितिसर्व
थः यथाभुजिक्रियात्तृप्त्यानिहतिरूपदृष्टफला
तथाविद्यापिसर्वानर्थमूलाविद्यानिहतिरूपदृष्ट
फलाक्रांतिसिद्धातथाचतस्यांविद्यायामनर्थनिह
तिकामानांसर्वेषामेवार्थित्वलक्षणाधिकारःसंभव
ति तथाचविद्याधिकारिणांसर्वेषामविशेषेणावेदां
तश्रवणादावधिकारप्रसक्तौशूद्रस्यवेदश्रवणादि
प्रतिषेधात्ताधिकारइत्युक्तमपशूद्राधिकरणेतत्रि
यादीनांचतथाप्रतिषेधाभावाद्वेदांतश्रवणाधिका
रोभाष्याद्गम्यतेविधुरादेरित्यस्यार्थः नन्वमुख्याधि
कारिभिरनुष्ठितश्रवणादेरपिविद्योत्पादकत्वम

वश्यं वाच्यं अन्यथा गौणाधिकारनिरूपणपरभाष्यवै
यर्थ्यप्रसंगात् विद्योत्पादकत्वावरूपभावे च न कस्या
धिकारस्य गौणत्वं मुख्यगौणाधिकारयोः फलतो वि
शेषाभावादित्यत आह देहान्तर इति अयं भावः मुख्या
धिकारिणामनन्यव्यापारतया प्रत्यहं निर्बध्यमानं श्र
वणादिकं निरंकुशप्रबलचर्याहिंसाशमदमादियुक्तं
मस्मिन्नेव जन्मनि प्रायेण विद्योत्पादकं संपद्यते अ
मुख्याधिकारिणां तु श्रवणादिकमनन्यव्यापाररूप
त्वाभावात् संकुचितबलचर्यादियुक्तत्वाच्चास्मिन् ज
न्मनि विद्योत्पादनयोग्यमेव न भवति किं तु बहुषु ज
न्मसु किंचित्किंचिच्छ्रवणादिकं संपाद्यमानं संभूय देहा
न्तरे क्वचिदेवं ज्ञानमुत्पादयेदिति महान्फलभेदो गौ
णमुख्याधिकारयोः तथा च स्मृतिः अनेकजन्मसंसि
द्धस्ततो याति परां गतिमिति अनेकेषु जन्मसु कृतश्र
वणादिना क्वचिज्जन्मनि संसिद्धः उत्पन्नविद्यः सन्नन्त
तः सिद्धिबलान्मुक्तिं गच्छतीति स्मृत्यर्थः ननु तन्निय
वैशम्पयोर्विदुरादीनामिवामुख्याधिकार इत्ययुक्तं
दृष्टान्तासंप्रतिपत्तेरित्यत आह नहीति वक्तुं हि न
शक्यत इति संबन्धः ॥

अन्तरा चापि तु तद्दृष्टेर्लिंगाच्चेति सूत्रकारेण व
तेषाममुख्याधिकारस्फुटीकरणात् न च
तत्र तेषां श्रवणाधिकारप्रवचनोक्तः किं त

दीयकर्मणां विद्यानुग्राहकत्वमिति शंक्य
दृष्टार्थाच विद्येस्तदाह न तदपि करणभा
ष्यविरोधात् न च क्षत्रियवैश्ययोः संन्यासा
भावादमुख्याधिकारे तत एव देवानामपि
श्रवणादिष्वमुख्य एवाधिकारः स्यात्
तथा च कर्ममुक्तिफलकसगुणविद्यादे
वभावं प्राप्य श्रवणाद्यनुतिष्ठतां विद्यार्थ
थें संन्यासार्हे पुनर्ब्राह्मणजन्म वक्तव्यमिति
ब्रह्मत्वमभिसंपद्यते न स पुनरावर्तते तन्नश्च ना
वृत्तिः शब्दादित्यादिश्रुतिसूत्रविरोध इति
वाच्यं देवानामनुष्ठेयकर्मवैयर्थ्याऽभावात्त्व
त एवानन्यव्यापारत्वं संभवतीति कर्ममुक्ति
फलकसगुणविद्याविधायिशास्त्रप्रामाण्या
द्विनापि संन्यासं तेषां मुख्याधिकाराभ्युप
गमादित्याह ॥

यद्यपि संन्यासिन एव मुख्योऽधिकार इति पूर्वं प्रतिपादि
तं तथैव न विधुरादीनां संन्यासाभावादेव गौणाधिकारः
सिद्धस्तथापि तेषां गौणाधिकारे सूत्रसंगृहीतामप्यु
पपत्तिमाह अतस्त्वितरदिति अतः अनाश्रमिभिरनुष्ठि
तविद्यासाधनापेक्षया इतरदाश्रमिभिरनुष्ठितं विद्या
साधनं कर्मश्रवणादिकं ज्यायः प्रशस्तं विद्यासाध

नेत्याय यस्त्वावधारणार्थस्तत्राह श्रुतिलिंगानुसृति
लिंगाच्चेतेनैति ब्रह्मवित्पुण्यकृदिति वाक्यं श्रुतिलिं
गं अनाश्रमी न तिष्ठेत्तत्क्षणमेकमपि द्विज इत्यादिवा
क्यं स्मृतिलिंगं तेन पुण्यलब्धेन ब्रह्मवेदनेन ब्रह्म
एति ब्रह्म प्राप्नोतीति श्रुत्यर्थः अत्र श्रुतौ पुण्यत्वेन
प्रसिद्धानामाश्रमधर्माणामेव विद्याब्रह्मप्राप्ति
साधनत्वप्रतिपादनादाश्रमिधर्माणां विशेषानु
ग्रहश्चेति सूत्रोक्तन्यायेन विद्योपयोगीनामपि निक
र्मीभाति स च ति कर्मी विधुरादीनां विद्यार्थकर्मस्व
वणादिषु च मुख्याधिकाराभावप्रसक्त एवेति वक्त
व्यं हि तेन तदभावादनाश्रमित्वस्य निंदितत्वाच्च न हि
कर्मज्ञानयोर्मुख्याधिकारी निंदार्ह इति सूत्रभाष्य
कारयोरभिप्राय इत्यर्थः ननु विधुराधिकरणे विधु
राद्यनुष्ठितं कर्म विद्यासाधनमित्येतावदेवोक्तं न तु
विधुरादेः श्रवणाधिकारोऽपि तत्र प्रतिपादितः न
चाच श्रवणादौ विधुराद्यधिकारस्य गौणमुख्यत्व
चिंतानिरालंबनेत्याशंक्य परिहरति न च तत्रेति
विधुराधिकरण इत्यर्थः तत एवेति संन्यासाभावा
देवेत्यर्थः अस्त्वपुनर्ब्राह्मणजन्मेत्यत आह ब्रह्म
लोकमिति न स पुनरिति ब्रह्मलोकमभिसंपद्यते पु
नरिमं लोकं प्रतिनावर्तत इत्यर्थः एतच्छ्रुतिमूलं सू
त्रमुदाहरति अनावृत्तिरिति अनावृत्तिरिहृत्तिरिति
ब्रह्मलोकं गतानामुपासकानामावृत्तिर्नास्ति उदा
हृतश्रुतेरित्यर्थः स्मृतेश्चेत्यादिसूत्रसंग्रहार्थमादि

३
सि॰ ले॰
टी॰
३२

32

पदं तथा च स्मृतिः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसं
चरे परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति ते
ब्रह्मलोकवासिनः ब्रह्मोपासकाः प्रतिसंचरे महा
प्रलये परस्य हिरण्यगर्भस्य ब्रह्मलोकस्वामिनः आ
युषोऽन्ते कृतः साक्षात्कृतः आत्मा यैस्ते तथा ननु
न्यथापारत्वसंभवेऽपि संन्यासो नास्तीत्याशंक्या
ह क्रमश इति मनुष्येष्वेव संन्यासो मुख्याधिकार
प्रयोजकः वर्णाश्रमविभागस्य मनुष्यविषयत्वादि
तिभावः ॥

ननु मुख्याधिकारिणा दृष्टफलं न वा
क्यार्थावगत्यर्थं स्वविहितशास्त्रान्तरवि
चारेव क्रियमाणे वेदान्तविचारः कथं ज
न्मान्तरीयविचाराभावादुपपद्यते न केवल
विचारस्यादिनान्तरीयाविचारार्थावगतिरिह
न्त्वपपद्यते इहजन्मान्तरीयतद्धेतुत्वं न
चवाच्यं मुख्याधिकारिणा परिव्राजकेन
क्रियमाणमपि श्रवणं दृष्टार्थमेव सर्वत्र
विचारार्थावगते दृष्टफलत्वात्तस्य यथा प्रा
रब्धकर्मविशेषरूपप्रतिबंधादिह जन्म
नि फलमजनयतो जन्मान्तरे प्रतिबंधका
पगमेन फलजनकत्वमैहिकमप्यप्रस्त

तप्रतिबंधेन तद्दर्शनादित्यधिकरणेन स्थापि
णीयात् एवमुमुक्ष्वाधिकारिकृतस्यापि ः
स्यादिति यतः शास्त्रीयांगयुक्तश्रवणमपू
र्वविधित्वपक्षे फलपर्यंतमपूर्वनियमवि
धित्वपक्षे नियमादृष्टं वा जनयति तच्च जा
तिस्मरत्वप्रापकादृष्टवत्प्राग्भवीयसंस्का
रमुद्बोध्य तन्मूलभूतस्य विचारस्य जन्मांत
रीयविघ्नप्रयोगिनो घटयतीति प्रज्यने शा
स्त्रीयांगविधुरश्रवणेनादृष्टोत्पादकमिति
ऊतस्तस्य जन्मांतरीयविघ्नोपयोगित्वमुपप
द्यते घटकादृष्टं विना जन्मांतरीयप्रमाण
व्यापारस्य जन्मांतरीयावगतिहेतुत्वोपगमे
तिप्रसंगात् ॥

अविहितेति न्यायशास्त्रादिविचारवदित्यर्थः एतज्जन्मी
यवेदांतविचारस्यागामिजन्मीयवेदांतार्थावगतिप्र
तिहेतुत्वासंभवे कैमुतिकन्यायेन दूषयति न खल्वि
ति मुमुक्ष्वाधिकारिकृतविचारदृष्टांतेन गौणाधिकारि
श्रवणादेरपि जन्मांतरीयविघ्नप्रयोगं शंकते न च
वाच्यमिति ततः किं तत्राह तस्येति यथा तस्य मुमुक्ष्वा
धिकारिकृतश्रवणस्य प्रतिबंधादिहजन्मनि विद्याल
क्षणं फलमजनयतो जन्मांतरे फलजनकत्वं एवं श्र

३
श्रि·ले·
टी·
३३

33

मुख्याधिकारिकृतमपि श्रवणं जन्मान्तरे फलजनकं स्या
दिति न च वाच्यमिति संबंधः मुख्याधिकारिकृतश्रव
णस्य सति प्रतिबंधके आमुष्मिकं विद्याजन्मेत्यत्र मा
नमाह ऐहिकमपीति प्रस्तुतप्रतिबंधे असति विद्या
जन्म इह जन्मन्यपि भवति अपिशब्दात्सति प्रतिबंधे
जन्मान्तरे भवति कुतः तद्दर्शनात् तस्य प्रतिबंधक
वशात् जन्मान्तरे विद्योदयस्य वामदेवादिषु दर्शना
दित्यर्थः दृष्टान्तवैषम्येणोत्तरमाह शास्त्रीयोगयुक्त
मिति शास्त्रीयोगं संन्यासः तद्युक्तं संन्यासिनानुष्ठी
यमानमिति यावत् तथा च शास्त्रीयोगसहितं श्रव
णं श्रवणविधिरसत्वे विधिरिति पक्षे स्वयमेव विद्याल
क्षणफलपर्यंतमदृष्टं जनयति श्रवणविधिर्निय
मविधिरिति पक्षे त्वमाह दृष्टो श्रवणं नियमविशिष्ट
सत् फलपर्यंतं नियमादृष्टं जनयतीत्यर्थः तद्वेति
श्रवणजनितादृष्टमित्यर्थः जातीति जातिर्जन्म तत
श्च यथा जातिस्मरत्वसंपादकमदृष्टं पूर्वजन्मतद्वृत्ता
न्तानुभवजन्यसंस्कारमस्मिन् जन्मन्युद्बोध्य तदुद्बोध
नद्वारा पूर्वजन्मतद्वृत्तान्तस्मृतिं घटयति तथा प्राचि
भवे श्रवणादिजनितं संस्कारमुद्बोध्य तत्संस्कारका
रणभूतस्य श्रवणस्याभावे जन्मनि विद्योपयोगित्वं
घटयतीत्यर्थः शास्त्रीयोगविधुरमिति संन्यासरहि
तेन क्षत्रियादिना क्रियमाणं श्रवणमदृष्टोत्पादकं न
भवति क्षत्रियादिकं प्रत्यविहितत्वाच्छ्रवणादेरि
ति भावः नन्वविहितश्रवणस्यादृष्टानुत्पादकत्वे

पि संस्कारजनकत्वसंभवात् न हत्वा देवजन्मांत
रीयविद्याहेतुत्वकृतो नस्यादित्यत आह वटकादे
हुंविनेति श्रुतिप्रसंगादिति जन्मांतरानुभूतसकल
पदार्थस्मृतिप्रसंगादित्यर्थः ॥

ज्ञानेश्रमुख्याधिकारिणाप्युपसन्नवि
विदिषेणाक्रियमाणं श्रवणं द्वारभूतवि
विदिषोत्पादकपुण्यवीनयत्वायपुनुष्ठान
जन्मापूर्वपूरुणकमिति न देवापूर्वं विद्या
रूपफलपर्यंतं प्राप्रियमाणं जन्मांतरी
यायामपि विद्यायां स्वकारितश्रवणस्योप
कारिकत्वं चटयतीति नानुपपत्ति श्रवणा
दौ विध्यभावपक्षेन संन्यासपूर्वकृतस्यापि
श्रवणस्यादृष्टानुत्पादकत्वात्तत्र प्रतिबंधे
तस्य जन्मांतरीयविद्याहेतुत्वमित्यमेव
निर्वाहं आचार्यास्तु नियमविधिपक्षेप्य
यमेव निर्वाहः श्रवणमभ्यसतः फलश्रा
मेरवीकृप्रयाणेनान्नियमादृष्टस्यानुत्पत्ते
स्तस्य फलपर्यंतानाहतिगुणकश्रवणानुष्ठा
ननियमसाध्यत्वात् नहि नियमादृष्टज
नकः श्रवणनियमः फलपर्यंतमावर्तनी

इ
सि· ले·
टी·
३५

यस्य श्रवणस्योपक्रममात्रेण निवर्त्तितो
भवति येन तज्जन्यनियमादृष्टस्यापि फ
लपर्यन्तं श्रवणावृत्तेः प्रागेवोत्पत्तिः संभा
व्येत ॥

कर्मणां विद्यायां विनियोग इति पक्षमाश्रित्य परिहर
ति उच्यत इति यज्ञादिभिर्विद्यायां संपादनीयायां द्वा
रभूतया विविदिषा तस्या उत्पादके प्राचीने यद्विद्या
र्थयज्ञाद्यनुष्ठाने तज्जन्येत्यर्थः स्वपदे यज्ञाद्यनुष्ठान
जन्यापूर्वं परं वाचस्पतिमते मुख्याधिकारिकृतश्र
वणस्यापि यज्ञाद्यपूर्वेणैव निर्वाह इति दृष्टान्ताभि
प्रायेणाह श्रवणादौ विध्यभावपक्षेऽपीति विवरण
पक्षेऽप्येवमेव निर्वाह इत्याह आचार्योक्तेति अयंभावः
प्रमाणासंभावनानिवृत्तिः श्रवणफलं प्रमेयासंभा
वनानिवृत्तिर्मननफलं विपरीतभावनानिवृत्तिर्नि
दिध्यासनफलं तथा च त्रिविधप्रतिबंधकनिवृत्ति
लक्षणफलपर्यन्तमावृत्तिविशिष्टानि श्रवणादी
नि यस्य मुख्याधिकारिणो निष्पन्नानि तस्य निय
मादृष्टमुत्पन्नमेव एवं संपन्नविद्यासाधनस्या
पि प्रतिबंधवशात् यदि विद्या न जाता तदा पुनर्ज
न्मलाभेन प्रतिबंधक्षये सति पुनर्विचारमनपेक्ष्यै
व विद्या जायते यथा वामदेवहिरण्यगर्भादेः यस्य
तु कृतप्रतिबंधनिवृत्तिपर्यन्तश्रवणाद्यावृत्तिर्न जा
तामध्ये मृतिश्च जाता तस्य मुख्याधिकारिणोऽपीति

यमादृष्टं न जायते सच पुनर्जन्मांतरे ऽकृतप्रतिबंध
निवृत्तिपर्यंतं श्रवणादिकमभ्यस्य श्रवणादिनिय
मादृष्टवशेन विघ्नप्रतिबंधककल्मषक्षये सति वि
द्यां लभते तदुक्तं भगवता श्रीकृष्णेन तत्र तं बुद्धिसं
योगं लभते पौर्वदेहिकं यतते च ततो भूयः संसि
द्धौ कुरुनंदन इति तत्र प्रागेव स्वायुजन्मनि पूर्वदे
हे भवमिदानीं संस्कारात्मनानुवर्तमानं बुद्धिसं
योगं श्रवणादिकर्तव्यताबुद्ध्या संबंधं लभते अस्मि
न्नपि जन्मनि प्रतिबंधनिवृत्तिद्वारा विद्योदयो यम
या श्रवणादिकमनुष्ठेयमिति बुद्ध्या युक्तो भवती
त्यर्थः ततः सर्वे जन्मोपपत्तीपेक्षया भूयः अधिकं
यतते संसिद्ध्यर्थमित्यर्थः तथा च यो यं फलपर्य
न्तावृत्तिगुणकश्रवणादिरहितो योगभ्रष्टः तस्यापि
यमादृष्टाभावाय तस्माददृष्टादेव निर्वाहः कृतेऽव्यर
ति प्रतिबंधनिवृत्तिरूपफलप्राप्तेः सर्वे नियमा
दृष्टानुत्पत्तेर्हेतुमाह तस्येति नियमादृष्टस्येत्य
र्थः नियमादृष्टं हि न श्रवणमात्रजन्यं किंतु श्रव
णनियमजन्यं तन्नियमश्च श्रवणादेरेव फलप
र्यंतमावृत्तौ संभावितिष्यते तथा च फलोत्पत्तेर
र्वाक् श्रवणादिनियमस्यैवाभावात् न नियमादृष्टो
त्पत्तिरित्यर्थः उक्तं प्रपंचयति तद्धीत्यादिना ॥

श्रवणानादिवदावृत्तिगुणकस्यैव श्रव

३
सि॰ले॰
टी॰
३५

35

णस्यफलसाधनत्वेनफलसाधनपदार्थ
निष्पत्तेः प्राक्तन्नियमानैर्वीतिवचनस्य
निरालंबनत्वात् श्रवणावघातानाम्पक्रम
मात्रेणानियमनिष्पत्तौतावतैवनियमशा
स्त्रानुष्ठानेसिद्धमितिनेदंनाहतावप्यवै
कल्पप्रसंगाच्चेत्याहुः केचित्तदृष्टार्थस्या
पिश्रवणस्यदिनेदिनेतुवेदांतश्रवणाद्भ
क्तिसंयुक्तात्गुरुशुश्रूषयालब्धात्कृच्छ्राशी
तिफललभेदित्यादिवचनप्रामाण्यात्त्व
तत्रादृष्टोत्पादकत्वमप्यस्ति यथाग्निसं
स्कारार्थस्याधानस्यपुरुषसंस्कारेष्वपरि
गतानदृष्टार्थत्वमपि एवंचवचनबलाद्
भयार्थत्वोपपत्तेः तथाचप्रतिदिनश्रव
णजनितादृष्टमहिम्नैवामुष्मिकविघो
पयोगितत्श्रवणमननादिसाधनानामि
त्याहुः एवंश्रवणमननादिसाधनानुष्ठा
नपूर्णाऽविद्यावाप्तिरित्यस्मिन्नर्थे स
र्वसंप्रतिपन्नेस्थितेभारतीतीर्थाः ध्या
नदीपेविद्यावाप्त्युपायान्तरमप्याहुः

श्रवणनियमः श्रवणस्योपक्रममात्रेण निर्वर्तितो
न भवतीत्यत्र हेतुमाह अवघातादिवदिति आहतीति
विशिष्टस्यैवावहननस्य तंडुलनिष्पत्तिलक्षणफल
साधनतायाः लोकसिद्धत्वादिति भावः आकृतदिति
फलपर्यंतं श्रवणस्यैवावृत्तौ सत्यां श्रवणस्याप्राप्तां
शपरिहरणलक्षणो नियमो निष्पन्नो भवति न ततः
प्रागित्यर्थः श्रवणस्यारंभमात्रेवाकृतिपयाहतिमा
त्रेवाजाते सति श्रवणनियमो निष्पन्न इति वचनं वि
षयाभावान्निरालंबनमित्यर्थः नद्दनाहृतावपीति
श्रवणवद्घातायनुष्ठानमुपक्रम्य श्रवणादिकं त्य
क्त्वा भाषाप्रबंधादिविचारेण च विदलनादौ च यत्कृता
वपि नियमविधिविरोधाभावप्रसंगादित्यर्थः सु
त्यापिकारिभिरन्वहं क्रियमाणस्य वेदांतश्रवणस्य
प्रतिबंधकनिवृत्तिरूपदृष्टफलोत्पादकत्ववदटृ
ष्टोत्पादकत्वमप्यस्ति तथा च तद्वलात् जन्मांतरेऽपि
षोपयोगित्वे विचारस्य घटत इति परिहारांतरमाह
केचिदिति फलमिति पुण्यरूपमित्यर्थः वचनेन
शास्त्रार्थे तथा च वेदांतश्रवणस्य देवतागुरुवेदां
तविषयभक्तिगुरुशुश्रूषाभ्यामुपात्ताभ्यामनुपाते
शमदमब्रह्मचर्याहिंसादिभिः समुच्चयार्थः तथा
ह इति भावः स्वतंत्रेति वेदांतश्रवणस्य स्वतंत्रतया
अदृष्टोत्पादकत्वमस्तीत्यर्थः स्वातंत्र्येणादृष्टजनने
श्रवणस्य विद्यायां विनियोगबोधकश्रवणविधि
नैरपेक्ष्यमिति बोध्यं एकस्योभयार्थत्वे दृष्टांतमाह

ई
सि॰ ले॰
टी
३८

36

यथाश्रुतीति श्रुतीनादधीतेतिवचनाद्यथानस्याद्दृवनी
पायग्निसंस्कारत्वोपगमादिति भावः पुरुषसंस्कारे स्थि
ति अध्यायेयमग्निहोत्रमित्यादिपुरुषसंस्कारसंग्रा
हकसूत्रेऽप्यध्यानस्यापि पावादित्यर्थः अदृष्टमहिम्ने
वेति वेदान्तश्रवणजनितादृष्टस्य योग्यतया विद्याया
मेव विनियोगस्य वक्तव्यतया तद्बलाज्जन्मान्तरीय
विद्योपयोगित्वमिति भावः एवं उत्तमसमध्यमाधिका
रिणां सांख्यमार्गं निरूप्य तदशक्तानां अत्यन्तमंदाधि
कारिणां योगमार्गं निरूपयितुमुपक्रमते एवमि
ति सर्वसंप्रतिपन्न इति सर्वश्रुतिस्मृतिषु सम्यक्प्र
तिपन्ने निश्चित इत्यर्थः आहुरिति सम्यक्निरूपि
तवंत इत्यर्थः ॥

तत्कारणं सांख्ययोगाभिपन्नं यत्सांख्यैः प्रा
प्यते स्थानं तद्योगैरपि गम्यते इति श्रुतिस्मृ
तिदर्शनाद्यथा सांख्येनाम वेदान्तविचारः
श्रवणशब्दितो मननादिसहकृतो विद्यावा
प्त्युपायः एवं योगशब्दितं निर्गुणब्रह्मोपा
सनमपि न च निर्गुणस्योपासनमेव नास्ती
ति वाच्यं प्रश्नोपनिषदि शैव्यप्रश्ने यः पुन
रेतं त्रिमात्रेणोंकारेण परमपुरुषमभिध्या
यीतेति निर्गुणस्यैवोपासनप्रतिपादनात्

तदनेनरंसपतस्माज्जीवच्चनात्परात्परंश्रु
तिष्ठायेपुरुषमीहतइत्युपासनाफलवा
देईहतिकर्मत्वेननिर्दिष्टयान्निर्गुणब्रह्म
नदेवोपासनावाक्येपिध्यायतिकर्मनान्य
तईहतिध्यानयोःकार्यकारणभूतयोरे
कविषयत्वानियमादिमस्यार्थस्येहतिक
र्मोपिकरणेभाष्यकारादिभिरंगीकृतत्वात्

ननुतन्नयाकल्पितत्वंनइतिभ्रमितव्यंतथापिश्रु
त्यादिसिद्धत्वात् तत्प्रकृतेकारणत्वोपलक्षितंब्रह्म
सांख्ययोगाभ्यांविद्याद्वाराभिमुख्येनप्रत्यक्षेनप्रा
प्तमितिश्रुत्यर्थः सांख्यैःश्रवणादिपरैःयोगैरुपासकैः
यत्स्थानंब्रह्मस्वरूपंविद्याद्वारागम्यतेप्राप्यतइत्यर्थः
योगैरपीत्यपिशब्दाद्योगमार्गस्यानुकल्पत्वंभातीति
बोध्यं अपीति विद्याप्राप्त्युपायइत्यनुषंगः निर्गुणब्र
ह्मोपासनेमानशून्यमित्याशंक्यपरिहरति नवेत्या
दिना नत्वियंशंकानयुक्तातत्कारणंयत्सांख्येति
श्रुतिस्मृत्योरादावेवतत्रप्रमाणत्वेनोदाहृतत्वात्
नचोदाहृतश्रुतिस्मृतिगतयोगपदस्यसगुणोपास
नपरत्वसंभवादाशंकायुक्तेतिवाच्यं भिन्नविषयो
रुपासनसाक्षात्कारयोःकार्यकारणभावासंभवेन
निर्गुणविद्याहेतुभूतस्ययोगस्यनिर्गुणोपासनरू
पत्वावश्यंभावात्तत्सांख्येतिवचनगतयोगप

दसोपास्तिपरत्वमेवास्मिन्हं तस्य गीताभाष्यकर्मयो
गपरत्वेन व्याख्यानत्वादिति वाच्यं यत्सांख्यैरितिव
चनस्य वस्तुतो निर्गुणोपास्तिपरस्यैव सतो भगव
ता श्रीकृष्णेन कर्मविषये उदाहृतत्वेन तदनुरोधेन
भाष्ये तथा व्याख्यानोपपत्तेः योगपदस्य ध्याने रूढ
त्वेन वस्तुतः कर्मपरत्वाभावात् न हि वचनमूलभूता
यां तत्कारणमिति श्रुतौ योगपदस्य ध्यानपरतया
शारीरकभाष्ये व्याख्यानत्वाच्च कर्मयोगस्य मुख्यया
गत्या ब्रह्मप्राप्तिसाधनत्वं न तस्मात्तादिति ज्ञाप
नायास्य वचनस्य कर्मविषयतया भगवतो दाह
रणासंभवाच्च तस्मात्प्रमाणाभावाच्छंकानुपपन्नेति चे
न्न उदाहृतश्रुतिस्मृतिव्यतिरेकेणान्यत्र क्वापि नि
र्गुणोपासनं न दृष्टमित्यभिप्रायेण शंकोपपत्तेः
अत एव सर्वास्वपि श्रुतिषु निर्गुणोपासनं दृष्टमिति
मंदाधिकारिणामासंख्यानायाह प्रश्नोपनिषदाद्या
दिना त्रिमात्रेणेति द्वितीयार्थे तृतीयेति सः अका
रोकारमकाराख्यमात्रात्रयस्योंकारस्य स त्रिमात्रः
ॐकारे निर्गुणमेव ब्रह्म तदभेदेन ध्येयमित्यत्र भा
ष्यादिसंमतिमाह तदनंतरमित्यर्थः जीवरूपः
परमात्मनो घनः जटाकाशवदुपाधिपरिच्छिन्नत्वे
नत्यात्मा जीवघनः तस्मात्परः शुद्धः निरुपाधिकः
परमात्मानं सः ध्यानात्पुरि हार्दाकाशो बुद्धिमात्रैव
न ध्यायं वर्तमानमीक्षते साक्षात्करोतीत्यर्थः उपा
सनावाक्ये परं पुरुषमभिध्यायीतेति वाक्य इत्यर्थः

कार्येति ईक्षणवाक्यस्य ध्यानफलभूतसाक्षात्कार
प्रतिपादकत्वेन ध्यानविधिवाक्यैकवाक्यत्वात् ध्यानेक्ष
णयोः कार्यकारणभावोवगम्यत इति भावः निय
मादिति अन्यध्यानादन्यसाक्षात्कारादननादिति भावः

अन्यत्रापि तापनीयकठवल्ल्यादिश्रुत्यंतरे
निर्गुणोपास्तेः प्रपंचितत्वादत्र कृताप्यु
पास्यगुणपरिच्छेदार्थमारभ्य गुणोपसं
हारपादे निर्गुणध्यानेंदादयः प्रधानस्ये
ति सूत्रेण भावरूपाणां ज्ञानानंदादिगुणा
नामक्षरधियांत्ववरोध इत्यादिसूत्रेणाभा
वरूपाणामस्थूलत्वादिगुणानां चोपसं
हारस्य दर्शितत्वाच्च ननु आनंदादिगुणोप
संहारे उपास्यनिर्गुणमेव न स्यादिति चेन्न
आनंदादिभिरस्थूलत्वादिभिश्चोपलक्षित
मखंडैकरसं ब्रह्मास्मीति निर्गुणत्वानुपम
दैनोपासनासंभवात् ननु तदेवब्रह्मत्वंवि
द्धिनेदंयदिदमुपासत इति श्रुतेनेपरब्र
ह्मोपास्यमिति चेन्न ॥

ननु कल्पनयैव ध्यातव्यस्य सूर्यांतस्थत्वे सतेजसित्व

३
सि॰ ले॰
टी॰
३५

38

र्थे संपन्न इति सूर्यसंपत्तिवचनानुसारेविशेषणंदत्ते
तथाचोंकारेध्यातव्यपुरुषस्यनिर्गुणब्रह्मरूपत्वंक
ल्पतरुकारैर्नांगीकृतमितिप्रतीयतइतिचेन्नसूर्य
संपत्तिवचनस्यार्चिरादिमार्गप्राप्तिपरतायाःचतुर्था
ध्यायेव्यवस्थापितत्वेनसूर्यंतदंतस्थेश्वरप्राप्तिपरत्वा
भावात् कल्पतरुकाराणामपितदीयवचनानर
पर्यालोचनयाक्षतेर्मार्गपरत्वयाचसूर्यांतस्थत्ववि
शेषणदानेतात्पर्याभावस्यपरिमलेप्रतिपादित
त्वाद्वेतिभावः देवाहवैप्रतिपत्तिमब्रुवन् अणोर
णीयांसमिममात्मानमोंकारेणोव्याचक्ष्वेत्याद्याताप
नीयश्रुतिः अणोःसूक्ष्मादपिसूक्ष्मंदुर्विज्ञेयमिमंप्रत्य
ग्रूपंपरमात्मानंओंकारगम्यमित्यर्थः एतद्ध्येवाक्षरं
ब्रह्मेत्याद्याकठवल्लीश्रुतिःओमित्येतदक्षरमिदंसर्व
मित्यादिमाण्डूक्यश्रुतिः ओमित्येवंध्यायथआत्मान
मितिमुंडकश्रुतिश्चादिपदार्थः निर्गुणस्योपास्य
त्वेस्वसंमतिमाह सूत्रकृतापीति सूत्रकृतानिर्गु
णेपिगुणानामुपसंहारस्यदर्शितत्वादितिसंबंधः
निर्गुणेगुणोपसंहारोनिर्गुणब्रह्मप्रमित्यर्थ एवन
निर्गुणब्रह्मोपास्त्यर्थ इतिशंकाव्यवच्छेदायपादंवि
शिनष्टिउपास्यगुणपरिच्छेदार्थमिति परिच्छेदोनि
र्णयःनिर्गुणेगुणोपसंहारनिरूपणस्यनिर्गुणोपा
स्तेरपिफलमितिवक्तव्यअन्यथातन्निरूपणस्यपा
दासंगतिप्रसंगादितिभावः आनंदादयःक्वचिच्छ्रुता
अन्यत्राप्युपसंहर्तव्याः प्रधानस्य[illegible]स्यब्रह्मणः

सर्ववेदांतेष्वभेदेन ब्रह्मविद्यायाएकत्वादिति सूत्रा
र्थः भावरूपाणामिति विशेषणमन्तरयियामित्यपि
करणस्यानंदाद्वय इत्यपिकरणेनपौनरुक्त्यपरिहा
रार्थमितिबोध्यं अन्तरे ब्रह्मणिधीयैरस्थूलादिशब्द
वाच्यार्थभूतैरभावैर्भवतितेन्तरयियः तेषामवरो
यउपसंहारः इतरेष्वपि वेदांतेषु कर्तव्यएवेतिसूत्रभा
गार्थः स्थौल्यादिनिषेधानांनिष्प्रपंचब्रह्मप्रमितिहे
तुत्वादितिभावः आवानंदशंकातेनत्विति आनंदादि
गुणानामनुपास्यकोटौ निवेशोनांगीक्रियतेयेनोपास्य
ब्रह्मसगुणं स्यात् किंतूपास्यनिर्गुणनिर्णयद्वाराणि
गुणोपास्त्या उपयोगमात्रं स्वीक्रियतइति समाधत्ते
नेति आनंदादिगुणानामस्थूलादिगुणानांचउपसं
हारोहितन्द्वावकपदानांसहोच्चारणरूपोविवक्षित
स्तथाच उपाधिविशिष्टचैतन्यवाचकैरानंदादिपदैः
स्थौल्याद्यभावविशिष्टचैतन्यवाचकैरस्थूलादिश
ब्दैश्च सर्वेष्ववाक्यार्थेष्वनुगतमखंडैकरसं यद्ब्रह्मल
क्षणया बोध्यं तेन तदहमस्मीत्युपासनं संभवादित्यर्थः
उक्तंच ध्यानदीपे आनंदादिभिरस्थूलादिभिश्चात्मात्र
लक्षितः योऽखंडैकरसः सोऽहमस्मीत्येवमुपासनं इति
श्रुतेतिवेदांतेष्वित्यर्थः एवं क्रमेण सूत्राभ्यां निर्गुणस्यो
पास्यत्वंनिरूप्य निर्गुणोपासनस्यश्रुत्यंतरविरोधमा
शंक्यपरिहरति ननु तदेवेत्यादिना तदेवेति तु ध्या
दिसाक्षिचैतन्यमेवेत्यर्थः ॥

३
सि. ले.
टी.
३३

७९

अन्यदेव तद्विदितादथो अविदितादिति श्रु
तेर्ब्रह्मस्य वेद्यत्वस्याप्रसिद्ध्यापातात् श्रुत्यन्त
रेषु ब्रह्मवेदनप्रसिद्धेर्वेद्यत्वश्रुतिर्ब्रह्मवा
वेद्यत्वपरा चेदाथर्वणीनां तदुपासनाप्रसिद्धे
र्ब्रह्मतदुपास्यत्वश्रुतिरपि वस्तुहतपरास्त
एवं च श्रवणायापि बहुभिर्यो न लभ्य इति
श्रवणात् येषां बुद्धिमान्द्यायच्छुत्पादन
कुशलविशिष्टगुर्वलाभाद्वा श्रवणादि न सं
भवति तेषामध्ययनगृहीतैर्वेदान्तैरपात
तोपि गमितब्रह्मात्मभावानां तद्विचारविते
वशिष्ठोपनिषदाद्युक्तमार्गेण ग्रन्थेषु ब्रह्मवासि
ष्ठादिकल्पेषु पंचीकरणादिषु चानेकप्रा
त्वाविप्रकीर्णं सर्वार्थोपसंहारेण कल्पसू
त्रेष्वग्निहोत्रादिवन्निर्धारितानुष्ठानप्रकार
निर्गुणोपासनं संप्रदायमात्रविज्ञो गुरुभ्यो
वधार्यतदनुष्ठानात्क्रमेणोपास्यभूतनि
र्गुणब्रह्मसाक्षात्कारः संपद्यते ॥

उपास्यस्य ब्रह्मत्वनिषेधवद्वेद्यस्यापि ब्रह्मत्वनिषेधा
त्परब्रह्मवेदनमपि न सिद्ध्येदित्याह अन्यदेवेति वे
दनविषयादन्यत् ब्रह्मेत्युक्तेरर्थाद्ब्रह्मवेद्यं न भव

तीति सिध्यतीत्यर्थः अस्तीति वेद्यत्वमुपास्यत्वं वास्तीति
परमार्थतो नास्तीति निषेधश्रुतीनां तात्पर्यमिति भावः
निर्गुणोपासनेऽधिकारिणं दर्शयति एवं चेति निर्गु
णोपासने प्रमाणसिद्धे सतीत्यर्थः केषांचित्तु मुमुक्षू
णां श्रवणसंभवे प्रमाणमाह श्रवणायापीति बहु
भिर्मुमुक्षुभिर्यः परमात्मा श्रोतुमपि न लभ्यते तस्याश्र
तस्यापि साक्षात्कारो दूरापास्त इत्यर्थः बहूनां श्रवणा
लाभे श्रुत्यभिमतं कारणं दर्शयति येषामिति बुद्धीति
उक्तं च ध्यानदीपे अत्यंतबुद्धिमांद्याद्वा सामग्र्या वाप्यसं
भवात् यो विचारं न लभते ब्रह्मोपासीत सोऽनिशमिति
तत्र सामग्र्यभावं विवृणोति न्यायेति येषामत्यंतबुद्धि
मांद्यात् श्रवणादिकं न संभवति येषां च कुशलमती
नामपि सामग्र्यभावात् श्रवणादिकं न संभवतीत्यर्थः
विशिष्टत्वं असंभिन्नार्यमर्यादत्वकारुणिकत्वादिल
क्षणं बोध्यं तेषां ब्रह्मजिज्ञासाहेतुमाह अध्ययनेति
अधिगामिनः अपवर्गामिनः ब्रह्मात्मभावो येषां ते तथोक्ताः
तेषामित्यर्थः तेषां न हि विचारं विनैव गुरुभ्यो वाक्यार्थं त
दनुष्ठानात् साक्षात्कारः संपद्यत इति संबंधः निर्गुण
ब्रह्मविचारं विनैव निर्गुणब्रह्मोपासनादित्यर्थः ननु
प्रश्नोपनिषदादावुपासनामात्रमुक्तं न तु तदनुष्ठान
प्रकारोऽपीत्याशंक्याह आर्षग्रंथेष्विति ननु पंचीकरणे
वेदांतलक्ष्यंस्मीखंडैकरसे प्रणवमात्रात्मकं कृत्वा प्रपं
चप्रविलापनोक्तिः एवंक्रमहं ब्रह्मास्मीत्यभेदेनावस्था
नं समाधिरित्युक्तायोऽखंडैकरसः सोऽहमस्मीत्येवमुपा

सि· ले·
टी·
५·

५०

सत इत्याद्युदाहृतत्वान्नदीपवचनाच्च प्रकृते निर्गुणो
पासनमहंग्रहग्रहरूपं विवक्षितं प्रश्नोपनिषदुक्तषो
डशप्रश्ने तु ओंकाररूपे प्रतीके निर्गुणब्रह्मदृष्टिर्विव
क्षिता तथा कठवल्ल्यामपि तथा च कथं प्रश्नादिवा
क्यं प्रकृतोपासने प्रमाणत्वेनोदाहृतमिति चेत् न
प्रकृतोपासने तापनीयमांडूक्यमुंडकश्रुतीनामेव
प्रमाणत्वेन विवक्षितत्वात् प्रश्नकठवल्लीश्रुत्युदाह
रणं तु निर्गुणस्याप्युपासनमन्यत्रापि दृष्टमित्येताव
न्मात्रेणेति न विरोध इति भावः पंचीकरणादिष्वपि
धीरितानुष्ठानप्रकारमिति संबंधः तत्र दृष्टांतमाह
अनेकशाखेति अनेकासु शाखासु विप्रकीर्णतया
विप्रकलिततया स्थितानां पदार्थानामुपसंहारे
ण यथा अग्निहोत्रादिकमनिर्धारितानुष्ठानप्रकार
भवति तद्वेत्यर्थः उपासनानुष्ठानप्रकारः संप्रदा
यः तस्मात् विज्ञोऽपि गुरुभ्यः सकाशात् निश्चित्य
त्यर्थः उक्तं च भगवता श्रीकृष्णेन निर्गुणप्रकरणे
श्रुत्वान्येभ्य उपासत इति क्रमेणेति उपासनापरिपा
कक्रमेणेत्यर्थः ॥

अविसंवादिविभ्रमन्यायेनोपास्तेरपि क्वचि
त्फलकाले प्रमापर्यवसानसंभवात् पाणौ
पंचवराटकाः पिधाय केनचित्करे कति व
राटका इति पृष्टे पंचवराटका इति तत्तर

वक्ष्वीकाप्रयोगमूलभूतसंख्याविशेष
ज्ञानस्य मूलप्रमाणशून्यस्याहार्यारोपस्या
पि यथार्थत्ववन्निर्गुणब्रह्मोपासनस्यार्थ
तथात्वं विवेचकनिर्विचिकित्समूलप्रमा
णनिरपेक्षस्य दहराद्युपासनावदुपासना
शास्त्रमात्रमवलम्ब्य क्रियमाणस्यापि वस्तु
तो यथार्थत्वेन दहराद्युपासनेनेव निर्गु
णोपासनेन जन्यस्य स्वविषयसाक्षात्कार
स्य श्रवणादिप्रमाणाजन्यसाक्षात्कारव
देव तत्त्वार्थविषयत्वावश्यंभावाच्च ॥

ननु निर्गुणोपासनस्य कथं प्रमालक्षणसाक्षात्का
रपर्यवसानमित्यत आह अविसंवादीति अयमर्थः
क्वचिद्गृहविशेषेऽवस्थितस्य श्रीकृष्णरूपबिम्बस्य प्रति
बिम्बं गृहाद्बहिः प्रपूपतोद्वारेऽवस्थितस्य पुरुषस्य प्रति
बिम्बे श्रीकृष्णोऽयमिति भ्रमो जायते तेन भ्रमेण प्रति
बिम्बाख्योपाधिसमीपगतस्य पुरुषस्य सत्यश्री
कृष्णगोचरप्रमा जायत इति लोकप्रसिद्धं तत्र प्रति
बिम्बे बिम्बभूतश्रीकृष्णभ्रमो विसंवादी भ्रमः विसं
वादः फलाभावः तद्रहितोऽविसंवादिभ्रमः फलव
द्भ्रम इति यावत् यथा तेन भ्रमेण प्रवृत्तस्य श्रीकृष्ण
प्राप्तिलक्षणफलकाले श्रीकृष्णप्रमा जायते तथा

निर्गुणोपासनेप्यहंतस्यापि ब्रह्मप्राप्तिलक्षणफल
कालेनिर्गुणप्रमाजायतइति ननु संवादिभ्रमदृष्टा
न्तेन निर्गुणोपास्तेः प्रमापर्यवसानमुक्तमनुपपन्नं
दृष्टांतवैषम्यात्तत्रहि समीपोपसर्पणेनेनरंसत्यश्री
कृष्णस्यवस्तुः सन्निकर्षे सति श्रीकृष्णप्रमाजायतेन
तु संवादिभ्रममात्रात् प्रकृते च निर्गुणोपासनस्य
प्रमाजननेसामर्थ्याभावात् सामग्र्यंतराभावाच्च क
थं प्रमापर्यवसानमित्याशंक्या निर्गुणोपासनस्ये
वस्वसमानविषयकप्रमाजननसामर्थ्यसंभावना
यतस्ययथार्थत्वसदृष्टांतमाह पाणाविति पिधाये
ति तदुत्तरवक्तुरविदितमितिशेषः तदुत्तरेति दैव
योगात् पंचेववराटकास्तवपाणौ संतीत्युत्तरवक्तु
रित्यर्थः निर्गुणोपासनस्यापि वस्तुतो यथार्थत्वेन
तिसंबंधः अद्वैतैकरसं ब्रह्माहमस्मीति प्रत्ययसंत
तिरूपोपास्तेः विषयबाधाभावाद्यथार्थत्वमितिभावः
ननु प्रकृतोपासनस्य निर्विकित्सनत्वज्ञानपूर्वकत्वा
देवश्रवणमननोत्तरकालीननिदिध्यासनस्येवय
थार्थत्वसंभवात् किमिति दैवयोगाद्यथार्थत्वं सम
र्थ्यते तत्राह अर्थेतथात्वेति अर्थस्यब्रह्मणः तथात्वे
प्रत्यग्रूपत्वनिष्प्रपंचत्वादिनस्य विवेचकं निर्णाय
कंयन्निर्विचिकित्समन्यपरत्वाशंकाशून्यं मूलप्र
माणं श्रुतिरूपं तन्निरपेक्षस्येत्यर्थः निदिध्यासनस्ये
वप्रकृतनिर्गुणोपासनस्यविचारपूर्वकत्वाभावात्
ननिर्विचिकित्सनत्वनिर्णायपूर्वकत्वप्रयुक्तं यथा

ध्येयत्वमिति भावः ननु विचारपूर्वकं प्रत्यगभिन्नब्रह्म
निर्णयाभावे कथमहं ब्रह्मास्मीति प्रत्ययसंततिरू
पोपास्तिरनुष्ठीयते तत्राह दहरादीति यथा सगुणो
पास्य विचारपूर्वकं जीवाभिन्नत्वानिर्णयाभावेपि
स्वस्य सगुणोपास्याभेदचिंतनं कर्तव्यमित्येवं रूपं सगु
णोपासनाविधिशास्त्रमवलंब्य सगुणोपासनं क्रि
यते तथा निर्गुणोपासनं कर्तव्यमित्येवमात्मकं शा
स्त्रमात्रमवलंब्य निर्गुणोपास्तिरनुष्ठीयते इत्यर्थः
निर्गुणोपासनस्य साक्षात्कारहेतुत्वे दृष्टांतमाह दह
राद्युपासनेनेवेति प्रपञ्चभावादिति समानविषयक
ध्यानस्य मध्ये हि विषयाबाधाच्चेत्यर्थः ॥

इयांस्तु विशेषः प्रतिबंधरहितस्य पुंसः श्रव
णादिप्रणाड्या ब्रह्मसाक्षात्कारो झटिति सिध्य
तीति सांख्यमार्गो मुख्यः कल्पः उपास्त्या तु विलं
बेनेति योगमार्गोनुकल्प इति नन्वस्मिन्पक्ष
द्वयेपि ब्रह्मसाक्षात्कारे किंकरणं केचिदाहुः
प्रत्ययाभ्यासरूपं प्रसंख्यानमेव योगमार्गे
श्रादिनश्चारभ्योपासनारूपस्य सांख्यमार्गे म
ननानंतरनिदिध्यासनरूपस्य च तस्य सत्त्वा
त् न च तस्य ब्रह्मसाक्षात्कारकारणत्वे मानाभा
वः ततस्तु तं पश्यति निष्कलं ध्यायमान इति

अ सि. ले टी. ५२

42

श्रवणात् कामान्तरश्रवहितकामिनीसाक्षा
त्कारे प्रसंख्यानस्य कारणत्वक्लृप्तमेव श्रावणाप
णान्त्वापि हि दृष्टमित्यधिकरणे विकल्पो वि
शिष्टफलत्वादित्यधिकरणे च दहराद्यहेय
ह्योपासकानां प्रसंख्यानादुपास्यसगुणब्रह्म
साक्षात्कारांगीकाराच्च ननु च प्रसंख्यानस्य
प्रमाकरणेष्वपरिगणनान्नतज्जन्यो ब्रह्मसा
क्षात्कारः प्रमा न स्यात् न च काकतालीय
संवादिवराटकसंख्याविशेषाबाह्यार्थज्ञानव
दर्थाबाधेन प्रमाणत्वोपपत्तिः प्रमाणमू
लकस्य प्रमात्वायोगात् बाह्यार्थे हन्तेश्चोपा
सनाहतिवत्तज्ज्ञानभिन्नयानसक्रियारूप
नयाइच्छादिवदबाधितार्थविषयत्वेपि प्र
मात्वानभ्युपगमात् ॥

सांख्ययोगमार्गयोस्तुल्यकल्पत्वभ्रममपनयति
द्वयोस्त्विति बुद्धिमांद्यादिप्रतिबंधरहितस्य विशिष्ट
गुर्वादिलाभे सति सांख्यमार्ग एवानुष्ठेयः तस्य त्वर
यासिद्धिहेतुत्वात् सांख्यालाभे तु योगोनुष्ठेय इत्यनु
कल्पः स इत्यर्थः नन्वस्मिन्निति सांख्ययोगमार्गद्वये
पीत्यर्थः ननु योगमार्गे निर्गुणोपासनस्य सगुणोपा

सनदृष्टान्तोदाहरणेनसाक्षात्कारकारणत्वस्यानुप
दर्शकत्वात् पद्मद्वयस्याप्यारोपे नप्रश्नानुपपत्तिरि
तिचेन्नैषदोषःउपासनस्यसाक्षात्कारकारणत्वेप्र
माणाभिप्रायेणप्रश्नोपपत्तेरनपवनत्रप्रमाणंव
क्ष्यतिनचेत्यादिना ग्रन्थवापूर्वत्रसगुणोपासनदृष्टां
तेननिर्गुणोपासनस्यहेतुत्वमात्रमुक्तंनतुकरण
त्वंतथाचयोगमार्गेपिकिमुपासनमेवकरणंकिं
वाश्रवणादितिप्रश्नाभिप्रायःसंगच्छतइतिभावः मा
र्गद्वयेपिसाक्षात्कारोदयकालेप्रसंख्यानस्यानुवृ
त्तिमाह योगमार्गइत्यादिना निष्कलंनिर्विशेषंप
रमात्मानंध्यायमानःततोध्यानात्तंपश्यतीत्यर्थः
कामात्वरेति कामात्वरस्यासंनिकृष्टकामिनीसाक्षा
त्कारइत्यर्थः तत्रसन्निकर्षीभावेनचक्षुषःकरणत्वा
संभवात्मनसोवहिरस्वातंत्र्याच्चकामिनीगोचरप्र
संख्यानमेवकारणमितिभावः सगुणोपासनेप्राय
णपर्यंतमावर्तनीयंकुतःतत्रापिमरणकालेपियो
गिनोब्रह्मचिंतनस्यश्रुतिस्मृतिसिद्धत्वात् सदाप्र
त्यभ्यासंविनामरणकालेतदसंभवादितिसूत्रार्थः
अहंग्रहोपासनानांविकल्पः उपास्यदेवतासाक्षात्का
रलक्षणस्यफलस्याविशिष्टत्वादेकार्थानांविक
ल्पस्यप्रसिद्धत्वादितिसूत्रार्थःब्रह्मसाक्षात्कारस्यप्र
माकरणजन्यत्वाभावेपिविषयाबाधात् प्रमात्व
माशंक्यनिषेधयति नचकाकतालीयेति यादृच्छि
केत्यर्थः क्लृप्तचानकरणाजन्यस्यज्ञानत्वमेवना

स्तिप्रमात्वं त्वन्नहरतापास्तमित्यभिप्रायेणाह प्रमाणमू
लकस्येति अविसंवादिवराटकसंख्याविशेषगोचरा
हार्यहतेरपिज्ञानत्वमसिद्धमित्याह आहार्यहतेश्चेति
अबाधितार्थज्ञानत्वं हि प्रमात्वं न त्वबाधितार्थकत्व
मात्रमतिप्रसंगादितिमत्वाह इच्छादिवदिति ॥

मेवं कृमप्रमाकरणमूलकत्वेपीश्वर
मायाहृतिवत्प्रमात्वोपपत्तेः विषयाबाध
तौल्यान्मार्गेहत्येपिप्रसंख्यानस्यविचारेति
दृढविचारितार्हावेदांतार्थस्वात्मैक्यावगम
मूलकतयाप्रसंख्यानजन्यस्यापिब्रह्मसा
क्षात्कारस्यप्रमाणमूलकत्वाच्च उक्तं हि क
ल्पतरुकारैः वेदांतवाक्यजज्ञानभावना
जापरोक्षधीः मूलप्रमाणदार्ढ्येन न भ्रमत्वं
प्रपद्यते नच प्रमाणापरतन्त्रत्वापत्तिस्तत्प्र
सज्यते अपवादनिरासाय मूलशुद्ध्यनुरो
धनादिति अन्येतु परोक्षरूपात्मा चेतसा वे
दितव्यः इत्यपि शब्दाद्युक्तात्वादिश्रुतेर्मन
एव ब्रह्मसाक्षात्कारे करणं न तस्योपाधि
कात्मन्यहेतुहेत्वपि प्रमाकरणत्वं क्रमेः स्व
प्रप्रपंचविपरीतप्रमात्वादिज्ञानमायन

स्यांतःकरणस्येत्यादि पंचपादिकाविवरण
ग्रंथेनापि न तथाप्रतिपादनात् ॥

ननु च प्रसंख्यानस्येत्यादिना प्रासंगिकं चोद्यं परिहरति
मैवमिति मायाहृतिवदिति न च मायाहृतेरपि माज्ञ
ज्ञानत्वमिति वाच्यं तथा सतीश्वरीयमायाहृतेर्यः सर्व
ज्ञः सर्वविदित्यादिश्रुतिप्रज्ञातार्थत्वाभावप्रसंगा
दिति भावः तौल्यादिति न चैकदावतिप्रसंग इति वा
च्यं नष्टिन्नत्वेन विशेषणोपपत्तेरिति भावः प्रसंख्या
नजन्यसाक्षात्कारस्य प्रमाणमूलकत्वात् प्रमाणत्व
मिति समाधानांतरमाह मार्गीह्यपीति अविचारि
तादिति योगमार्गाभिप्रायं वेदांतार्थावगतिः
तन्मूलकत्वेऽत्यर्थः न च विचारितादायदब्रह्मावग
तिर्जातानहिं किमर्थं प्रसंख्यानमिति वाच्यं प्रसंख्या
नात्सर्वमविद्यानिवर्तकाप्रतिबंधब्रह्मावगतेरला
भात्तदर्थत्वेन तदावश्यपकत्वमिति भावः प्रमाणाजन्यस्या
पि प्रमाणप्रयोज्यत्वमात्रेण प्रमात्वं संमतमित्याह उ
क्तेहीति ज्ञानभावनातात्ताभ्यासरूपप्रसंख्यानेनज
न्यमपरोक्षज्ञानमित्यर्थः मूलप्रमाणं वेदांतवाक्यं त
जन्यप्रमातस्यदार्ढ्यं नामाविप्रतिपन्नप्रामाण्यकत्व
मिति चोद्यं प्रसंख्यानजन्यसाक्षात्कारनिष्ठप्रामाण्य
नस्मैमूलप्रमाणतत्त्वापेक्षायामप्रसिद्धांतापात इति
शंकते न चेति प्रसंख्यानजसाक्षात्कारनिष्ठमपि प्रा
माण्यं नियमेन स्वाश्रयग्राहकसाक्षिभास्यमेवेति न

तस्मामाणपज्ञस्यार्थे मूलप्रमाणानुसरणं किंत्वप्रसंख्या
नजन्यव्यवहितकामिनीसाक्षात्कारस्याप्रमात्वादर्श
नात् प्रसंख्यानजन्यब्रह्मसाक्षात्कारेऽपि कदाचिदप्रामा
ण्यशंकासंभाव्यते तत्तन्निरासाय मूलप्रमाणानुस
रणमिति नापसिद्धान्त इति भावः अपवादेति अप्रामाण्य
शंकापवादः प्रसंख्यानमात्रेण साक्षात्कारे करणं
किंतु तत्सहकृतं मननसंज्ञकं करणमिति मतं दर्शयति अ
न्येत्विति अणुः दुर्विज्ञेयः अग्रत्वप्रसंख्यानसंस्कृतत्वे
मनसैवानुद्रष्टव्यमित्यादिश्रुतिरादिपदार्थः जीवसा
क्षात्कारे मनसः करणत्वे संमतिमाह स्वप्नेति प्रातिभा
सिकस्वप्नप्रपंचापेक्षया विपरीतो व्यावहारिकः प्रमा
त्रादिः तद्वानसाधनस्येत्यर्थः आदिपदं प्रमेयादिसंग्र
हार्थं तथेति प्रमातृप्राप्तिर्हि न सोपाधिकात्मसाक्षात्कारे
मनसः करणतयेति तथाशाहार्थः ॥

अहमेवेदं सर्वं सर्वोऽस्मीति मन्यते सोऽस्य परमो
लोक इति श्रुतेः स्वात्मब्रह्मसाक्षात्कारे एव
मनसः करणत्वसंप्रतिपत्तेश्चान्यदाकरणा
न्तराभावात् प्रसंख्यानं तु मनःसहकारिभा
वेनोपयुज्यते वाक्यार्थभावनापरिपाकसहि
तेन मनःकरणेन त्वंपदार्थस्यापरोक्षस्य तत् उ
पाध्याकारनिषेधेन तत्पदार्थतामाविर्भाव

यतीतिभामतीवचनात् ज्ञानप्रसादेन वि
शुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमान
इति श्रुतावपि ज्ञानप्रसादशब्देन चित्तैकाग्र
ह्यैतस्यैव व्याख्यानोपादानात् ननु प्रसंख्यानेस्व
रूपकरणेन कस्यचिदपि ज्ञानकरणत्वाभावेः
कामातुरकामिनीसाक्षात्कारादावपि प्रसं
ख्यानस्य हेतुत्वस्य मनस एव करणत्वोपप
त्त्याऽब्रह्मज्ञानकरणान्तरकल्पनायोगादि
त्याहुः अपरे तु तद्वाक्यविजिज्ञासेन मनसः पार
दर्शयति आचार्यवान् पुरुषो वेद तस्य ताव
देव चिरमित्यादिश्रुतिषु आचार्योपदेशान
न्तरमेव ब्रह्मसाक्षात्कारोदये जीवन्मुक्तिश्र
वणाद्धेतोर्न विज्ञानस्य निषिद्धतार्थाः इतिश्रा
नेनान्तरेणैतत्कांस्य श्रवणान्तेनौपनिषदं पुरु
षमिति ब्रह्मण उपनिषदेकगम्यत्व श्रवणा
च्चौपनिषदं महावाक्यमेव ब्रह्मसाक्षात्कारे
करणं न मनः यन्मनसा न मनुत इति तस्य
ब्रह्मज्ञानकरणत्वनिषेधात् ॥

निरुपाधिकात्मसाक्षात्कारेऽपि मनसः करणत्वेऽनुभ

श्री
सि॰ ले॰
टी॰
४५

मित्याह ब्रह्मैवेति इदं सद्रूपेण सर्वं वस्तु निश्चित्य भूयमानं
सर्वात्मकं ब्रह्मैवाहमस्मि ततः सर्वोस्मीति स्वमेव ब्रह्मविन्म
न्यत इत्यर्थः ननु स्वमेव ब्रह्मविदो महावाक्यानुसंधानसं
भवाद्वाक्यमेव करणं किं न स्यादित्यत आह तदेति स्वमे
महावाक्यानुसंधानस्यानियतत्वाद्वाक्यस्यापरोक्षधीहे
तुत्वानुपगमाच्चेति भावः संमतिमाह वाक्यार्थेति महा
वाक्यार्थेत्यर्थः स्थूलसूक्ष्मकारणोपाधीनां नेति नेतीत्यादि
वाक्यैर्निषेधद्वारा शोधितो यः त्वंपदार्थः स्वप्रकाशचैतन्या
त्मकः तस्य पूर्णतामाविर्भावयतीति साक्षात्कार इत्यर्थः
यत्तु निष्कलं ध्यायमानस्ततो ध्यानात्तं पश्यतीति योजना
मभिप्रेत्य ध्यानस्य साक्षात्कारकरणत्वं श्रुतिसिद्धमित्युक्तं
तद्दूषयति ज्ञानप्रसादेनेति करणश्रुत्यस्थज्ञानपदं चि
त्तपरं ज्ञानस्य प्रसादः ऐकाग्र्यं तथा च ध्यायमानो ध्याना
ख्येन ज्ञानप्रसादेन पश्यत इति योजना विवक्षितेति
भावः एवं योजनायां विनिगमकं पूर्वोदाहृतानि म
नसः करणत्वबोधकवचनान्येवेत्यभिप्रेत्य प्रसंख्यान
मात्रस्य करणत्वं दूषयति नत्विति महावाक्यमेव त
त्र करणमिति मतमाह अपरे त्विति अस्यापि तद्गुरूपदे
शात्तद्ब्रह्म विजज्ञौ साक्षात्कृतवान् ह किलेत्यर्थः पा
रमधिष्ठानमभूतं ब्रह्म तस्य विदुषस्तावानेव विलंबो वि
देहकैवल्यप्रति यावत्प्रारब्धान्न विमोक्ष्यत इत्यर्थः वे
दान्तेति अत्र वेदान्तजन्यज्ञानादेव ब्रह्मात्मैक्यलक्षण
स्यार्थस्य सन्निश्चितत्वोक्त्या वाक्यार्थावगत्यनन्तरं प्रसं
ख्यानानुष्ठानं नापेक्षितमिति प्रतीयत इदं च तन्निर
पेक्ष्यवाक्यादेवापरोक्षज्ञानोत्पत्तिपक्षे संगच्छते अन्य

ध्यात्मपरोक्षज्ञानाय तस्यापेक्षितत्वात्तन्नैरपेक्ष्यं न संग-
च्छते अतो वेदांतविज्ञानश्रुत्या वाक्यमेवापरोक्षज्ञाने
करणमिति निश्चीयत इति भावः महावाक्यमेवेति सांख्य-
मार्गानुष्ठानेन योगमार्गानुष्ठानेन वा दृष्टलक्षणास-
कलप्रतिबंधक्षये सति बंधरहितं महावाक्यमेव साक्षात्का-
रं जनयतीति वाक्यस्य करणत्वपक्षे न सांख्ययोगमार्ग-
योर्वैयर्थ्यशंकेति मंतव्यं लोको मनसा यच्चैतन्यं न म-
नुते न देवत्वं ब्रह्म विद्धीति योजना ॥

न चापक्वमनोविषयमिदं येनाहुर्मनो मत-
मिति वाक्यशेषे मनोमात्रग्रहणात् नन्वेवं
यद्वाचानभ्युदितमिति शब्दस्यापि न करण-
त्वमिति सिध्यत इति शंक्यं मनःकरणत्ववादि-
नापि शब्दस्य निर्विशेषपरोक्षज्ञानकरणत्व-
स्याभ्युपगतत्वेन तस्य यतो वाचो निवर्तन्त इ-
त्यप्राप्य मनसा सहेति श्रुत्यनुरोधेन शब्दार्थ
धाभिरूपशक्तिमुखेन शब्दस्य न करणत्व-
निषेधेनात्पर्यस्य वक्तव्यतया शक्यसंबंधरू-
पलक्षणामुखेन तस्य न करणत्वाविरोधात्
न च मनसैवानुद्रष्टव्यमिति श्रुतिसिद्धमन-
सोपि न त्वकरणत्वं न पराकर्तुं शक्यमिति
वाच्यं शब्दस्य साक्षात्कारजननेपि नदैकाग्र

सिं·ले
टी·
५८

46

स्यापेक्षितत्वेन हेतुत्वमात्रेणान्यतीयोपपत्तेः
मनसा ह्येवापश्यति मनसा शृणोतीत्यादौ न
ष्यादर्शनात् गीताविवरणे भाष्यकारीयमनः
करणत्ववचनस्य मतान्तराभिप्रायेण प्रवृत्ते
रित्याहुः ॥

न मनुत इति वाक्यं श्रुतस्य मनस एव ब्रह्मज्ञानकरणत्वं
निषेधतीति न चेत्यत्र हेतुमाह येनाहुरिति येन चैतन्ये
न मतं प्रकाशितं मन इति वाक्यशेषे अपक्रमन एवचै
तन्यभास्यमिति वक्तुमशक्यतया तत्र मनोमात्रग्रहण
मावश्यकं न तदेकत्वपूर्णाय न मनुत इति एवं वाक्येपि मनो
मात्रे ग्राह्यमित्यर्थः न चैवमिति मनोमात्रस्य ब्रह्मज्ञान
करणत्वनिषेधोपगमे इत्यर्थः अनभ्युदितमिति अप्रका
शितमित्यर्थः न च वाऽन्यस्य वेदान्तातिरिक्तग्राह्यपरत्वं स्वी
क्रियत इति वाच्य अत्रापि येन वागभ्युद्यत इति वाक्यशेषे
ग्राह्यमात्रस्य चैतन्यप्रकाश्यत्वप्रतिपादनेन न तदेकत्वपूर्णा
य एवं वाक्येपि वा चेत्यस्य ग्राह्यमात्रपरत्वादित्याशयेनाप्या
ह ग्राह्यस्यापीति मनोमात्रस्येव ग्राह्यमात्रस्यापीत्यर्थः स
र्वग्राह्यमात्रस्य ब्रह्मज्ञानकरणत्वं निषेधयतीति तथापि श
ब्दस्य शक्त्या ब्रह्मज्ञानकरणत्वनिषेधपरत्वे ह वचनं न त
ल्लक्षणयापि तत्करणत्वनिषेधपरं श्रोपनिषदत्वश्रुते
निरालंबनत्वप्रसंगादिति समाधानमभिप्रेत्याविपक्षे
परेषामपि वाधकं सूचयति मनःकरणत्ववादिनापी
ति वेदान्तानां लक्षणयापि ब्रह्मबोधकत्वानभ्युपगमे ब्र
ह्मणः प्रवाणिष्यापत्या मनःकरणत्ववादिभिरपि तेषां

ब्रह्मज्ञानकरणत्वस्याभ्युपगन्तव्यत्वादित्यर्थः परंतु वा
क्यजन्यं ब्रह्मज्ञानं परोक्षं भवतां मते अस्माकं मते तु तद
परोक्षमिति विशेषः इत्यभिप्रायेणाह परोक्षेति वेदान्तानां
शक्त्या ब्रह्मबोधकत्वनिषेधपरं यद्वाचानभ्युदितमि
ति वचनमिति व्यवस्थायां श्रुत्यन्तरमनुकूलयति नस्ये
ति यद्वाचानभ्युदितमिति निषेधवचनस्येत्यर्थः अशा
ब्येति शक्त्या ब्रह्मणो विषयशाब्दानां प्राप्तिर्निषिध्यते
सा च प्राप्तिः शक्तिरेव तस्याः शब्दानामौत्सर्गिकत्वादिति
भावः वक्ष्यमाणयेति मनःकरणत्ववादिभिरपीति शेषः
नस्येति शब्दस्येत्यर्थः नदिति ब्रह्मसाक्षात्कारेत्यर्थः ब
ह्मगोचरवृत्तिं प्रतिकरणत्वं न तत्तीयाश्रुत्यर्थः पूर्वोदा
हृतश्रुतिविरोधात् किंत्वेकाग्रस्य मनसः तां प्रत्युपा
दानतया हेतुत्वमात्रेण तदर्थं इत्याह शब्दसाक्षात्कारज
ननेपीति तच्चेति वाक्यजन्यज्ञानादौ मनसः करणत्वाभा
वेन हेतुत्वमात्रेणापि स्वीयादर्शनादिति भावः श
मदमादिसंस्कृतेन मनसैवात्मदर्शने करणमिति गीता
भाष्यवचनविरोधं परिहरति गीतेति मतान्तरेति वृ
त्तिकारमतेनेत्यर्थः न तु स्वमताभिप्रायेणोक्तप्रमाणवि
रोधादिति भावः ॥

ननु तथापि शब्दस्य परोक्षज्ञानजनकत्वस्व
भावस्यापरोक्षज्ञानजनकत्वं न संगच्छते इति
चेत् अत्र केचित् स्वतोऽसमर्थोपि शब्दः शास्त्री
यश्रवणमननपूर्वकध्यानाभ्यासजनितसं

अ
सिं॰ले
टी
५७

47

स्कारप्रचयफलभूतैकाग्रचित्तदर्पणानु
गृहीतोऽपरोक्षज्ञानमुत्पादयतीति शास्त्रीयसं
स्कृताऽधिकरणइवहोमोऽपूर्वमितिकल्प्य
ते तरति शोकमात्मविदिति शास्त्रप्रामाण्या
त् अपरोक्षस्य कर्तृत्वाद्यध्यासस्यापरोक्षाधि
ष्ठानज्ञानं विना निवृत्त्ययोगात् औपनिषदे
वलक्षणमानान्तरागृहीतेः शाब्दादप्यपरोक्ष
ज्ञानानुपपत्तेश्च निर्मलत्वप्रमेयादित्याहुः
अन्येतुभावनाप्रचयसाहित्येमतिबहिरस
मर्थस्यापिमनसोनस्ववनितासाक्षात्कार
जनकत्वदर्शनान्निदिध्यासनसाहित्येनशा
ब्दस्याप्यपरोक्षज्ञानजनकत्वंयुक्तमितिदृ
ष्टानानुरोधेनसमर्थयन्ते ॥

ननुतथापीति शाब्दस्यब्रह्मसाक्षात्कारकरणत्वपक्षेश्रु
तिभाष्यविरोधाभावेपिशाब्दप्रमाणस्वभावविरोधान्न
महावाक्यंब्रह्मसाक्षात्कारेकरणमित्यर्थः शाब्दस्वभा
वमनुरुध्यैवतस्यापरोक्षज्ञानकरणत्वंसाधयति अ
न्येकेचिदिति प्रचयःसमूहःप्रचयफलभूतयद्ब्रह्मलक्षणैका
ग्र्यंतद्वासितमेवदर्पणंतदनुगृहीतइत्यर्थः यथाच
क्षुःस्वतःप्रतिबिंबानुभवजननासमर्थमपिदर्पणा

तु गृहीतं सत्तत्तदनुभवं जनयतीति तद्वदिति सूचयति
चितदर्पणोतिशास्त्रीयेति यथाश्राधानादिजनितसं
स्काररहिताग्न्याधिकरणको होमस्तावदपूर्वं न जनय
ति अग्न्याधिकरणकहोममात्रस्यापूर्वजननस्वभावा
भावात् शास्त्रीयसंस्कारविशिष्टाग्न्याधिकरणकहोम
स्यापूर्वजनयितृत्वद्वदित्यर्थः ननु दृष्टान्ते शास्त्रबला
त्तथास्वीक्रियते प्रकृते तु तथा शास्त्रं नोपलभ्यत इत्य
त आह तरतीति न त्वनयाश्रुत्याविदात्मन्यपि सत्यस्य
शोकोपलक्षितकर्तृत्वाद्यध्यासस्यात्मवेदनान्निवृत्ति
रुच्यते न तु शास्त्रस्यापरोक्षज्ञानकरणत्वमित्यत आह
अपरोक्षस्येति यथा दृष्टान्ते होमाधिकरणस्याग्नेः तथा
नादिसंस्कृतत्वस्य श्रवणस्यान्यथानुपपत्त्या शास्त्रीयसंस्का
रसहकृतत्वमग्न्याधिकरणको होमोऽपूर्वं जनयतीति कल्प
ते तथात्मज्ञानस्यापरोक्षाध्यासनिवर्तकत्वं श्रवण
स्यान्यथानुपपत्त्या आत्मज्ञानजनकवेदान्तानामेवापरो
क्षज्ञानकरणत्वं कल्प्यत इत्यर्थः अयोगादिति सत्यपि
श्रवणजनितपरोक्षज्ञाने कर्तृत्वाद्यध्यासनिवृत्त्यद
र्शनात् परोक्षज्ञानमात्रेणाध्यासनिवृत्तौ मननादिवि
धिवैयर्थ्यप्रसंगाच्च अपरोक्षाध्यासरूपदिग्भ्रमादिरूपा
थ्यात्म्यादिसाक्षात्कारं विना निवृत्त्यदर्शनाच्चेति भावः
ननु कर्तृत्वाद्यध्यासनिवर्तकमधिष्ठानात्मतत्त्वसाक्षा
त्काररूपं ज्ञानं मननस्यैव संभवति किं शाब्दस्य तत्करण
त्वकल्पनयेति तत्राह औपनिषद इति अन्तरिन्द्रियस्य
मनसः अप्रत्यक्षप्रमाणत्वेन ब्रह्मणालक्ष्मत्वे उपनिष

देकगम्यत्वप्रतिपादकश्रुतिबाधप्रसंगादिति भावः न
न्वौपनिषदत्वश्रुतिविरोधेन ब्रह्मणि मानांतराप्रवृ
त्तौ शब्दस्वभावविरोधेन शब्दस्यापि ब्रह्मसाक्षात्कारजन
नेप्रवृत्तिर्न संभवति तथा च ब्रह्मसाक्षात्कारकरणस्यै
वालाभात् मास्तु तत्साक्षात्कार इत्यत आह शब्दादपी
ति तथा च मोक्षशास्त्रप्रामाण्याय शब्दस्यैव साक्षात्का
रकरणत्वं कल्पनीयमिति भावः शास्त्रप्रामाण्यमनु
पजीव्यापि शब्दस्यापरोक्षज्ञानकरणत्वं साधयति अ
न्येत्विति ॥

अपरे त्वपरोक्षार्थविषयत्वं ज्ञानस्यापरोक्षत्वं
नामाऽन्याऽनिरुक्तेः अर्थापरोक्षत्वं च नापरो
क्षज्ञानविषयत्वं येनान्योन्याश्रयो भवेत् किं
तु तत्तत्पुरुषचैतन्याभेदः अन्तःकरणतद्धर्मा
णां साक्षिणि कल्पिततया तदभेदसत्त्वात्
बाह्यचैतन्ये कल्पितानां घटादीनां बाह्यचैत
न्ये वृत्तिकृततत्तत्पुरुषीयचैतन्याभेदाभिव्य
क्त्या तदभेदसत्त्वाच्च नक्वाप्यव्याप्तिः ॥

इदानीं शब्दस्यापरोक्षज्ञानजनकस्वाभाव्यमेवासिद्धम
तो नित्यापरोक्षे ब्रह्मणि वेदांतानां साक्षात्कारकरण
त्वेति रप्यवादमिति मतांतरमाह अपरे त्विति नन्विंद्रि
यजन्यज्ञानत्वादिकमेव ज्ञानस्यापरोक्षत्वे लक्षणमेव

रशाब्दज्ञानस्य तदभावान्नापरोक्षमित्यत आह अन्या
निष्ठत्वेऽपीति इंद्रियजन्यज्ञानत्वादेरप्रथमपरिच्छेदाव
सानेनिरस्तत्वादिति भावः नन्वर्थस्यापरोक्षत्वमपरो
क्षज्ञानविषयत्वमन्यस्यानिर्वचनात् तथा चान्योन्याश्रयः
अर्थस्यापरोक्षत्वज्ञप्तौ ज्ञानस्यापरोक्षत्वज्ञप्तिः ज्ञान
स्यापरोक्षत्वज्ञप्तौ च अर्थस्यापरोक्षत्वज्ञप्तिरित्याशंक्या
निर्वचनमसिद्धमित्यभिप्रेत्याह अर्थापरोक्षत्वेऽपीति
तत्तदिति तत्तत्प्रमातृचैतन्याभिन्नत्वं तस्य तस्य विष
यस्य तं तं प्रमातारं प्रमातारं प्रत्यपरोक्षत्वं तत्तत्प्रमातृ
चैतन्याभिन्नार्थविषयकं ज्ञानं तत्तत्प्रमातुः तत्तत्प्र
मातृचैतन्याभिन्ने विषये अपरोक्षज्ञानमित्यर्थः न चा
र्थापरोक्षत्वादावननुगम इति वाच्यं ज्ञानगतस्यानुगता
परोक्षत्वस्य जातिरूपस्य उपाधिरूपस्य वाङ्गी॰ निरस्त
त्वेन तद्भावार्थापरोक्षस्याप्यनुगतस्यासंभवेन तस्या
दोषत्वादिति भावः ननु प्रमातृचैतन्याभिन्नत्वरूपस्या
र्थापरोक्षस्य जडरूपापरोक्षार्थाव्याप्तिः चैतन्यजडयो
रैक्यस्यापि नत्वादित्यत आह अन्तःकरणेति तदभेद
सत्त्वादिति साक्षिग्राह्ये प्रमातृचैतन्याभेदसत्त्वादित्य
र्थः तथा चार्थापरोक्षस्य निर्वचने कल्पिताकल्पितसाधा
रणाभेदस्य विवक्षितत्वेन प्रमातृचैतन्यब्रह्मचैतन्य
योरिव प्रमातृचैतन्यजडयोरकल्पिताभेदाभावेऽपि ज
डे सदिति सामान्याधिकरण्यानुभवसिद्धकल्पिताभेद
सत्त्वान्नाव्याप्तिरिति भावः आन्तरजडपदार्थेषु प्रमातृ
चैतन्याभिन्नत्वमुपपाद्य बाह्यापरोक्षार्थेषु तदुपपाद

उ
सि॰ ले॰
टी॰
४९

49

यदि वाह्येति अंतःकरणतद्धर्माणां तदभेदसत्वात्
घटादीनां तदभेदसत्वाच्च न कार्थांतरार्थे वाऽव्याप्तिरि
ति संबंधः घटादीनां ततस्वरूपीयचैतन्याभेदसत्वे हेतु
माह वाह्यचैतन्येततस्वरूपीयचैतन्याभेदाभिव्यक्तेरिति
ननु वाह्यचैतन्यस्य ततस्वरूपीयचैतन्यस्य च वस्तुतः
सदाऽभेदसत्वेपि तदभिव्यक्तिः कुतस्त्य तत्राह इति
कृतेति वाह्यविषयावच्छिन्नचैतन्ये चक्षुरादिद्वाराति
गताया अहंतेः संसर्गे सति इदंजितं इति मतोरभेदाहंतिम
देन्तःकरणस्यापि तत्र संसर्गो लभ्यते तथा च इति सं
स्पृष्टवाह्यचैतन्यमेवांतःकरणसंबंधात् ततस्वरूपीय
चैतन्यं भवतीत्यनेन प्रकारेण वाह्यचैतन्ये इतिकृता
तस्वरूपीयचैतन्याभेदाभिव्यक्तिर्भवतीत्यर्थः ननूक्त
प्रकारेण वाह्यचैतन्यस्य प्रमातृचैतन्याभिन्नत्वसिद्धा
वपि घटादीनां प्रमातृचैतन्याभिन्नत्वमसिद्धमेवेत्या
शंक्याह वाह्यचैतन्ये कल्पितानामिति वाह्यचैतन्येना
वत् घटादीनामभेदः प्रागेव सिद्धः तत्र तेषां कल्पित
त्वात् तथा च वाह्यचैतन्यस्य इतिकृतततस्वरूपीयचैत
न्याभेदाभिव्यक्तिदशायां घटादीनामपि ततस्वरूपीय
चैतन्याभिन्नत्वं सिध्यतीति भावः ॥

न चांतःकरणधर्माणां ज्ञानादीनामिव धर्मा
धर्मसंस्काराणामपि साक्षिणि कल्पितत्वावि
शेषादपरोक्षतापत्तिः तेषामनुद्भूतत्वात् ३

द्भूतस्यैवजडस्यचैतन्याभेदः आपरोक्ष्यमि
त्यभ्युपगमात् एवंचसर्वप्रत्यक्षचैतन्याभि
न्नत्वापत्त्यानुमानादपरोक्षत्वप्रसक्तिशुक्त्यासत
एवापरोक्षत्वप्रसक्त्यपरोक्षार्थविषयत्वाच्छा
ब्दस्यापिप्रत्यक्षज्ञानस्यापरोक्षत्ववाचोयुक्ति
युक्तापदेत्याहुः अद्वैतविद्याचार्यास्तन्नाप
रोक्षार्थविषयत्वंज्ञानस्यापरोक्षस्वरूपम
त्वापरोक्षरूपज्ञानाव्यापनात् स्वविषयक
त्वलक्षणस्वप्रकाशत्वनिषेधात् किंत्वय
थानन्तर्यस्यस्वव्यवहारानुकूलचैतन्या
भेदोर्थापरोक्ष्यं एवंनतद्व्यवहारानुकूल
चैतन्यस्यनतदर्थाभेदोज्ञानापरोक्ष्यं न
थाचचैतन्यधर्मएवेदमापरोक्ष्यंनत्वनु
मितित्वेच्छात्वादिवदन्तःकरणधर्मः

अर्थापरोक्ष्यलक्षणस्यातिव्याप्तिमाशङ्क्यनिराकरोति
नचेत्यादिना धर्मेतिधर्मादीनामध्यस्तानभूतप्रमा
तृचैतन्येसहाभिन्नसत्ताकत्वरूपाभेदसत्वादितिभा
वः उद्भूतत्वेसतिप्रमातृचैतन्याभिन्नत्वमर्थापरोक्ष्यं
उद्भूतत्वंचफलबलकल्प्यस्वभावविशेषः सचधर्मा
देर्नास्तीतिपरिहारार्थः एवंशाब्दस्यप्रत्यक्षसाक्षात्कारे

करणत्वसिद्ध्यर्थमुपोद्घातं कृत्वा प्रकृतं दर्शयति ए-
वं चेति ज्ञानापरोक्ष्यप्रयुक्तत्वे सतीत्यर्थः अभिन्नत्वादि-
ति जीवरूपप्रमातुः ब्रह्माभेदस्य श्रुतिसिद्धत्वादिति
भावः इदं च ब्रह्मणो जीवाभिन्नत्वं जडस्य प्रमातृचैत-
न्याभिन्नत्ववत् काल्पनिकं न भवति किं तु वास्तवैकरू-
पमित्याशयेनाह स्वत एवेति ब्रह्मणो नित्यापरो-
क्षप्रमातृचैतन्याभेदश्रुतिमाह यत्साक्षादिति ब्र-
ह्म जडवत् स्वव्यतिरिक्तप्रमातृचैतन्यमपेक्ष्यापरो-
क्षं न भवति किं तु साक्षात्प्रमातृचैतन्यस्वरूपत्वादे-
वापरोक्षमित्यर्थः ज्ञानापरोक्ष्यमर्थापरोक्ष्यं च प्रका-
रान्तरेण निरूपयति अद्वैतविद्याचार्यैस्त्विति पूर्वोक्तं
ज्ञानापरोक्ष्यलक्षणमव्याप्त्या दूषयति नापरोक्षेति
स्वरूपस्य स्वस्यापरोक्ष्यरूपे स्वरूपज्ञानेऽव्यापनादि-
त्यर्थः नन्वात्मस्वरूपस्वात्मानुभवस्य साक्षिचैतन्यरू-
पस्य स्वप्रकाशत्वाभ्युपगमात् स्वप्रकाशत्वस्य च
स्वविषयकत्वरूपत्वात् स्वरूपस्य स्वविषयकत्व-
न्तदपरोक्षरूपे स्वरूपज्ञाने निरपवादमित्यत आह
स्वविषयकत्वलक्षणेति एकस्मिन् चैतन्ये विषय-
विषयिभावलक्षणसंबन्धो न भवति संबन्धस्य द्वि-
निष्ठत्वात् स्वविषयत्वं विनापि स्वसत्ताप्रयुक्तसंश-
याद्यगोचरत्वादिलक्षणस्य स्वप्रकाशत्वस्याकरेषु
निरूपितत्वादिति भावः किं तर्हि ज्ञानापरोक्ष्यमिति
पृच्छति किं त्विति ज्ञानापरोक्ष्यनिर्वचने प्रतिष्ठात-
व्याजेन प्रथममर्थापरोक्ष्यं निर्वक्ति यद्वेति अर्थस्य

स्वव्यवहारानुकूलं चैतन्याभिन्नत्वमपरोक्षत्वं
प्रतिवान्तःकरणतद्धर्मीणां स्वव्यवहारानुकूलेन
साक्षिचैतन्येनाभिन्नत्वं तत्र तेषामप्यस्तित्वात् तथा
घटादीनामपि स्वव्यवहारानुकूलेन घटादिगोचर
वृत्त्युपहितेन घटाद्यधिष्ठानचैतन्येनाभिन्नत्वम
स्ति तथा च ब्रह्मणोऽपि स्वव्यवहारानुकूलेन स्वगोच
रवृत्त्युपहितेन साक्षिचैतन्येनाभिन्नत्वमस्तीति न
क्वाप्यव्याप्ति घटाद्यर्थस्य चैतन्ये कल्पितस्य चैतन्या
भिन्नत्वं सद्भावेनेऽपरोक्षत्वं तु सदा नास्तीति व्यव
हारानुकूलेत्युक्तं घटादिगोचरवृत्तिदशायामेव घ
टाद्यधिष्ठानचैतन्यं घटादिव्यवहारानुकूलं भवति
न सर्वदेति नातिप्रसंगः ननु तत्तद्व्यवहारानुकूलचै
तन्यस्य तत्तदर्थाभिन्नत्वमपरोक्षत्वमस्तु नाम तथा
पि ज्ञानापरोक्ष्यं नोक्तमेव वृत्तिरूपज्ञानस्य चैतन्या
पेक्षाभिन्नत्वादित्यत आह तथा चेति चैतन्यस्येव त
तदर्थव्यवहारानुकूलत्वे विवक्षिते सतीत्यर्थः न
था च ज्ञानापरोक्ष्यमित्यत्र ज्ञानपदं चैतन्यपरमेव
न वृत्तिज्ञानपरमिति नानुक्तिदोष इति भावः ॥

अत एव सुखादिप्रकाशरूपे साक्षिणि सुख
रूपसुखप्रकाशरूपे चैतन्ये वापरोक्ष्ये न
च घटाद्यैन्द्रियकवृत्तौ तदनुभवाविरोधः
अनुभवस्य वृत्त्यवच्छिन्नचैतन्यगतापरोक्ष

विषयत्वोपपत्तेः ननूक्तज्ञानार्थयोरपरो
क्षत्वं सुखादिगोचरप्रत्यक्षवृत्तितद्विषयोर
तिप्रसक्तेः न चैकदेवात् कदाचिद्वृत्तिविषय
संसर्गे सति वृत्त्यवच्छिन्नचैतन्यस्य विषया
वच्छिन्नचैतन्यस्य चाभेदाभिव्यक्तेरवर्जनी
यत्वादिति चेन्न परोक्षवृत्ते विषयावच्छि
न्नचैतन्यगताज्ञाननिवर्तनाक्षमतया
तत्राज्ञानेनावृतस्य विषयचैतन्यस्याना
वृतेन वृत्त्यवच्छिन्नसाक्षिचैतन्येनाभेदा
भिव्यक्तेरभावादपरोक्षत्वाप्रसक्तेः ॥

तत्तदर्थव्यवहारानुकूलत्वे सति तत्तदर्थाभिन्नत्व
रूपं ज्ञानापरोक्षत्वं चैतन्यधर्मएवेत्यत्र युक्तिमाह
धर्मएवेति चैतन्यधर्मत्वाभ्युपगमादेवेत्यर्थः न
तु वृत्तिधर्मत्वेन सुखदुःखादिगोचरापरोक्षवृत्त्य
नंगीकारात् सुखदुःखादिभासकसाक्षिचैतन्ये वृ
त्तिधर्मस्यापरोक्षस्यासंभवाच्च सुखदुःखादेरपरो
क्षत्वानुभवविरोधः स्यादिति भावः लक्षणे सत्यंतं
वह्निगोचरानुमितिवृत्त्युपहिते जीवचैतन्ये व्यव
हारानुकूले गतमिति तत्रातिव्याप्तिवारणाय वि
शेष्यं अनुमितिवृत्तेः विषयदेशे गमनाभावेन तद्वृ
त्त्यवच्छिन्नचैतन्यस्य न वह्न्यभिन्नत्वमिति नातिव्याप्तिः

घटादिगोचरवृत्त्यभावदशायां घटाद्यवच्छिन्नचैत
न्ये घटाद्यपरोक्षत्वविरहिते घटाद्यर्थाभिन्नत्वमस्ती
ति तद्वारणाय सत्यंतं तदा तस्य चैतन्यस्यावृत्तत्वेन घ
टादिव्यवहारानुकूलत्वाभावात् नातिव्याप्तिरिति मे
तव्यं नचेति ज्ञानापरोक्ष्यस्य चैतन्यधर्मत्वे घटादिगोच
रवृत्तेर्घटसाक्षात्करोमीत्यादिप्रकारेणापरोक्षत्वानु
भवविरोध इत्यर्थः इति चैतन्ययोस्तादात्म्येन वृत्ति
साक्षात्कारत्वानुभवस्य चैतन्यगतापरोक्षविषयक
त्वोपपत्तेरित्यर्थः ननु हृदयनाडीधर्मादिगोचरज्ञा
नवृत्तिरंतःशरीरव्यापिनी जायमाना दैवयोगात् हृ
दयनाड्याद्यवच्छिन्नांतःकरणप्रदेशो यदि जायेत तत्
दा हृदयादिरूपविषयावच्छिन्नचैतन्यस्य हृदयादि
गोचरज्ञानवृत्त्यवच्छिन्नस्य चाभेदाभिव्यक्तिरपरिहा
र्या घटादिस्थले वृत्तेः विषयसंसर्गे सति वृत्तिविषया
वच्छिन्नचैतन्ययोरभेदाभिव्यक्तिस्वीकारात् तथा च हृद
यादिगोचरज्ञानानुमित्यादिवृत्त्यवच्छिन्नचैतन्यरूपे
परोक्षज्ञाने हृदयाद्यर्थाभिन्ने हृदयादिव्यवहारानु
कूले ज्ञानापरोक्ष्यलक्षणमतिव्याप्तं तथा हृदया
दिरूपे परोक्षार्थे स्वव्यवहारानुकूलज्ञानादिवृत्त्यव
च्छिन्नचैतन्याभिन्ने प्रर्थापरोक्ष्यलक्षणमतिव्याप्तमि
ति शंकते ननूक्तमिति ययोश्चैतन्ययोरभेदाभिव्य
क्तिरिष्यते तयोरुभयोरप्यनावृतत्वमपेक्षितमन्य
तरचैतन्यस्यावरणदशायां तयोरभेदस्य प्रत्यक्षत्व
लक्षणाभिव्यक्त्ययोगात् तथा च हृदयादिगोचरज्ञानाद्

३
सि॰ले
टी॰
पर

हृतिष्यलेनातिव्याभिः तत्रविषयचैतन्यस्याहृतत्वा
दितिपरिहरति नपरोक्षत्वेतिरिति श्रापरोक्ष्यप्रमके
रिति परोक्षत्वसुखदयादिविषयस्यसुखदयादिगोचरवृत्ति
हृहत्त्यवछिन्नचैतन्यरूपपरोक्षज्ञानस्यचेतिप्रोषः
तथाचसुखदयादिगोचरवृत्तिहृहत्त्यवछिन्नचैतन्यरू
पपरोक्षज्ञानस्यसुखदयादिव्यवहारात् ॥

कुलज्ञानत्वेसत्यपिसुखदयादिविषयेणस
हाभिव्यक्त्याभेदाभावादभिव्यक्ततदर्था
भिन्नत्वेसतितदर्थव्यवहारात्कुलज्ञान
त्वलक्षणंतानापरोक्षत्वंनास्ति तथासुखदया
द्यर्थस्यापिस्वव्यवहारात्कुलवृत्तिहृहत्त्यव
छिन्नसाक्षिचैतन्याभेदसत्वेपितदभेदाभि
व्यक्त्यभावेनस्वव्यवहारात्कुलचैतन्याभे
दाभिव्यक्तिवृत्तिलित्वरूपमर्थापरोक्षत्वंनास्ती
त्यर्थः नचाहंसुखीदुःखीत्याकारकेसुखा
दिसाक्षिणिसुखदुःखादिरूपविषयाभे
दोविषयाभेदोविद्यमानोपिनाभिव्यज्यते
सुखादिसाक्षिणोजीवस्यसुखादेश्चाधारा
धेयभावप्रतीतेः तथाचसुखदुःखादिवि
ष्यहेत्वभिव्यक्तविषयाभेदाभावादव्याप्तिरि

तिवाच्यं घटादिप्रत्यक्षरूपे घटादिस्फुरणे
घटस्फुरति पटस्फुरतीत्याकारानुभवमा
दाय घटाद्यर्थाभेदाभिव्यक्तिमत्वस्यव सुखं
स्फुरति दुःखं स्फुरतीत्याकारानुभवमादा
यैव सुखदुःखादिप्रत्यक्षे सुखाद्यर्थाभेदा
भिव्यक्तिमत्वसत्वात् न च घटस्फुरतीत्य
नुभवे घटस्य स्फुरणाश्रयत्वमेव भाति
न तु स्फुरणाभेद इति वाच्यं घटस्फुरतीति
प्रयोगे देवदत्तो गच्छतीत्यत्र गमनकर्तृ
भिन्नो देवदत्त इति वाक्यार्थवत्स्फुरणा
श्रयाभिन्नो घट इति वाक्यार्थस्य वक्तव्यत
या घटः स्फुरतीति प्रयोगमूलभूते घटः स्फु
रतीत्यनुभवेऽपि स्फुरणाश्रयभूतविदात्मा
भिन्नतया घटस्य भानावश्यंभावात् न च घ
टस्य स्फुरणाश्रयाभेदाभिव्यक्तावपि स्फुर
णाभेदाभिव्यक्तिर्व्यापिनोपपादितैवेति
वाच्यं घटस्य स्वरूपामिति प्रत्यक्षं हि घटमे
व घटस्य स्वरूपतया यथाविषयीकरोति
न तथा घटस्फुरतीति प्रत्यक्षमपि घटादिह
तिदृष्ट्यायां घटाद्यपि ज्ञानभूतमनाहतवि

६
सि॰ले॰
टी॰
५३

43

दात्मानमेव स्वप्रकाशचिदात्मा श्रितस्फुर
णरूपेण विषयीकरोतीत्यभ्युपगमेन च घ
टस्फुरणाश्रयाभेदभानस्यैव स्फुरणाभेद
भानरूपत्वात् एतदुक्तं भवति घटस्य स्व
रूपमिति शाब्दप्रयोगएव च घटतत्स्वरूपयो
र्भेदो भासते न तत्त्वमूलभूते च घटस्य स्वरूप
मिति प्रत्यक्षे प्रत्यभिज्ञाने तत्प्रत्यक्षस्य भ्रमत्वप्र
संगात् घटतत्स्वरूपयोर्भेदाभावात् न च
तस्य भ्रमत्वमभ्युपगन्तुं शक्यते बाधकाभा
वात् एवं स्फुरतीति शब्दप्रयोगे एव स्वप्र
काशात्मनः स्फुरणतदाश्रयत्वाभावेन भेदभा
नेन तत्स्फुरतीति प्रत्यक्षेण तत्स्फुरणाहित्वा
नुपलंभादिति न च वल्लगोचरशाब्दवृत्तेर्वि
षयसंस्पर्शाया विषयगताज्ञाननिवर्तन
क्षमत्वदर्शनेन स्वद्यादिगोचरशाब्दवृत्ते
रपि विषयसंसर्गाविशेषकथनस्यास्वस्वि
षयचैतन्यगताज्ञाननिवर्तनक्षमत्वेनेति
वाच्यं स्वद्यादिगोचरशाब्दवृत्तेः सत्यापि
विषयसंसर्गेन स्पाहतो स्वज्ञाननिवर्तक
त्वप्रजकाभावेनाज्ञाननिवर्तकत्वस्य प्रय

मपरिच्छेदावसाने दर्शितत्वादिति भावः
अत एव जीवस्य संसारदशायां वस्तुतः स
त्यपि ब्रह्माभेदे न तदापरोक्ष्यं अज्ञानाव
णाकृतभेदसत्त्वात् न चैवं ब्रह्मणोऽपि जी
वापरोक्ष्यासंभवादसर्वज्ञत्वापत्तिः अज्ञा
नस्येश्वरप्रत्यनावारकतया तं प्रति जीवभे
दानापादनात् यदज्ञानं यं प्रत्यावारकं तस्य
तं प्रत्येव स्वाश्रयभेदापादकत्वात् अत ए
व चैत्रज्ञानेन तस्य घटाज्ञाने निवृत्तेऽनिवृ
त्तमैत्राज्ञानं मैत्रं प्रत्येव विषयचैतन्यस्य
भेदापादकमिति न चैत्रस्य घटापरोक्ष्यानुप
पत्तिरपि ॥

अर्थस्य स्वव्यवहारानुकूलचैतन्याभेदाभिव्यक्तिमत्त्वमे
वापरोक्ष्यं न तु तादृशाभेदवत्त्वमात्रमित्यत्र लिंगमा
ह अत एवेति अभेदाभिव्यक्तेरेवापरोक्षत्वप्रयोज
कत्वस्वीकारादेवेत्यर्थः संसारेति तत्त्वसाक्षात्कारात्
पूर्वकालइत्यर्थः जीवस्य ब्रह्माभेदे सत्यपीत्यनेन ब्र
ह्मणः स्वव्यवहारानुकूलजीवचैतन्याभिन्नत्वे सत्य
पीत्यपीत्यर्थो विवक्षितः तथा च संसारदशायां स्वव्य
वहारानुकूलजीवचैतन्याभिन्नस्यापि ब्रह्मणो जीवं
प्रत्यपरोक्षत्वाभावस्तयोरभेदाभिव्यक्त्यभावादेवेति

द्व
सि. ले.
टी.
५४

वक्तव्यतयाऽभेदाभिव्यक्तेरपरोक्षप्रयोजकत्वमुक्त
मितिभावः नचैवमिति अज्ञानकृतभेदस्याभेदाभि
व्यक्तिप्रतिबंधकत्वमित्यर्थः असंभवादिति जीवं सा
क्षात्करोमि जीवो मम परोक्ष इति जीवगोचरव्यवहारा
नुकूलं ज्ञानं ब्रह्मणो मायाहृतस्यपरिहितं ब्रह्मचैतन्यमेव
तथा च ब्रह्मकर्तृकव्यवहारविषयस्य जीवस्य ब्रह्मक
र्तृकव्यवहारानुकूलतादृशब्रह्मचैतन्याभिन्नत्वे स
त्येवाभिव्यक्ताभेदशालित्वाभावात् जीवस्य ब्रह्मप्रत्य
परोक्षत्वं न संभवति नच ब्रह्मणो जीवगोचरापरोक्षज्ञा
नासंभवेऽपि न सर्वज्ञत्वभंगः जीवगोचरपरोक्षज्ञान
मात्रेणापि तत्संभवादिति वाच्यं ईश्वरस्य परोक्षज्ञाना
नंगीकारादिति भावः अज्ञाने हि जीवधर्मिकब्रह्मप्र
तियोगिकभेदप्रयोजकं जीवस्य नाहं ब्रह्मेति ब्रह्मभेदा
नुभवसत्वात् नतु ब्रह्मधर्मिकजीवप्रतियोगिकभेदप्र
योजकं ब्रह्मणो नाहं जीव इत्यनुभवे मानाभावात् तथा
च ब्रह्मप्रतिजीवस्य ब्रह्माभेदाभिव्यक्तिप्रतिबंधकस्या
ज्ञानकृतभेदस्याभावात् नोक्तदोष इति परिहरति
अज्ञानस्येति अनावरकतयेति ईश्वरस्याहमज्ञ इत्यनु
भवे मानाभावादज्ञानमीश्वरं प्रति जीवावरकं न भव
ति नचेश्वरस्यापि लीलाविग्रहपूर्वकव्यवहारकाले
तदीयेनैव वचनेन तस्याज्ञत्वानुभवोऽस्तीति गम्यत इ
ति वाच्यं तदीयस्य तदीयाज्ञत्वगमकवचनस्यान्यथा
सिद्धेश्चानर्थपरिच्छेदे वक्ष्यमाणत्वादिति भावः नमि
ति ईश्वरं प्रति जीवप्रतियोगिकभेदाप्रयोजकत्वादि

त्यर्थः तंप्रतिजीवावरकस्यापिजीवभेदापादकं किंन
स्यादित्यत आह यंप्रतीति यंजीवंप्रतियदज्ञानंविष
यचैतन्यावरकं तंप्रत्येवतस्याज्ञानस्यस्वाश्रयभूत
विषयचैतन्यप्रतियोगिकभेदापादकत्वाभ्युपगमा
दित्यर्थः उक्तव्यवस्थायांनियामकमाह अतएवेति
यंप्रतियदज्ञानमित्यादिव्यवस्थाभ्युपगमादेवचैत्र
स्यघटापरोक्षत्वानुभवानुपपत्तिरपिनेति संबंधः
घटावच्छिन्नचैतन्येचैत्रंप्रतिघटचैतन्यावरकमज्ञाने
यथावर्ततेतथामैत्रंप्रत्यपिघटचैतन्यावरकमज्ञा
नंतत्रास्ति तथाचचैत्रीयघटज्ञानेनचैत्रस्यघटाज्ञा
नेचैत्रंप्रतिस्वाश्रयभूतविषयचैतन्यप्रतियोगिक
भेदापादकेनिहतेसतिचैत्रीयघटज्ञानेनानिहतंघ
टचैतन्यगतंमैत्रंप्रतिघटावरकाज्ञानंमैत्रंप्रत्येवस्वा
श्रयभूतघटचैतन्यप्रतियोगिकभेदापादकं नतु
मैत्राज्ञानंचैत्रंप्रतिघटचैतन्यानावरकमपि चैत्रंप्र
तिस्वाश्रयीभूतघटचैतन्यप्रतियोगिकभेदापाद
कं तथासतिचैत्रीयघटज्ञानेनचैत्रीयाज्ञानेनिहते
सतितत्कृतभेदनिवृत्तावपिचैत्रस्यघटचैतन्यस्यच
मैत्राज्ञानकृतभेदसत्वेनाभेदाभिव्यक्त्यभावान्चैत्र
स्यघटापरोक्षत्वानुभवानुपपत्तिरेवस्यादतोमैत्राज्ञा
नंमैत्रंप्रतीवचैत्रंप्रतिस्वाश्रयभेदापादकंनभव
तिचैत्रंप्रतिस्वाश्रयचैतन्यानावरकत्वादितिवक्तव्य
तथाचोक्तव्यवस्थासिद्धेरित्यर्थः ॥

इ
सि॰ ले
टी॰
५५

55

नन्वेवं वृत्तिविषयचैतन्याभेदाभिव्यक्तिल
क्षणस्यापरोक्ष्यस्य विषयचैतन्यगताज्ञान
निवृत्तिप्रयोजकत्वे तस्याज्ञाननिवृत्तिप्रयो
जकत्वायोगात् ज्ञानमात्रमज्ञाननिवर्त
कं भवेदिति चेत् न यत् ज्ञानमुत्पद्यमानं
स्वकारणमहिम्ना विषयसंसृष्टमेवोत्प
द्यते तदेवाज्ञाननिवर्तकमिति विशेषणा
त् ऐन्द्रियकज्ञानानां तथात्वात् एवं च श
ब्दादुत्पद्यमानमपि ब्रह्मज्ञानं सर्वोपाद
ानभूतस्य विषयब्रह्मचैतन्यसंसृष्टमेवो
त्पद्यत इति तस्याज्ञाननिवर्तकत्वमज्ञान
निवृत्तौ तन्मूलकभेदप्रविलयादपरोक्ष
चैतन्यमुपपद्यतेतरां नन्वेवमध्ययनगृही
तवेदान्तजन्येनापि तत् ज्ञानेन मूलाज्ञा
ननिवृत्त्यापरोक्ष्यं किं न स्यात् ॥

ननु परोक्षज्ञानमज्ञाननिवर्तकमिति रीत्या ज्ञानस्य
अज्ञाननिवर्तकत्वे अपरोक्षत्वं प्रयोजकमिति वक्तुं
न शक्यते ज्ञानगतापरोक्षत्वस्यैवाज्ञाननिवृत्त्यधीन
त्वात् न च मानसज्ञानापरोक्ष्यस्याज्ञाननिवृत्तिप्रयोज
कत्वमिति वाच्यं तथा सति ज्ञानमात्रस्याज्ञाननिवर्त

कत्वापरोक्षज्ञानस्यापि अज्ञाननिवर्तकत्वप्रसंगादि
त्याशयेन शंकते नन्वेवमिति एवं शङ्कार्थमवाह ह
तीतिवृत्त्यवच्छिन्नचैतन्यरूपे ज्ञाने घटादिरूपविषये
चवृत्त्यवच्छिन्नचैतन्यविषयावच्छिन्नचैतन्ययोरभेदा
भिव्यक्तिघटितस्येत्यर्थः अज्ञाननिवृत्तिप्रयोज्यत्व
इति प्रमातारं प्रति विषयचैतन्यावरणद्वारा विषयचै
तन्यप्रतियोगिकभेदापादकस्याज्ञानस्य निवृत्तिं वि
नाप्यर्थस्य ज्ञानस्य वाप्यपरोक्षत्वासंभवस्योक्तत्वादप
रोक्षस्याज्ञाननिवृत्तिप्रयोज्यत्वमित्यर्थः ज्ञानस्याज्ञा
ननिवर्तकतायामपरोक्षस्य प्रयोजकत्वाभावेपि
नहानिः प्रयोजकान्तरस्य प्रथमपरिच्छेदे दर्शि
तत्वादित्याशयेन परिहरति नेति तथात्वादिति सं
निकर्षरूपं कारणमहिम्ना विषयसंस्पृष्टतयैव उत्प
द्यमानत्वादित्यर्थः अनुमित्यादिवृत्तीनामतथात्वे
नातिप्रसंगाभावाच्चेत्यपि द्रष्टव्यं नन्वनुमेयवृत्त्यादि
गोचरानुमितिवृत्तेरिव ब्रह्मगोचरशाब्दवृत्तेरपि
स्वविषयभूतेन ब्रह्मचैतन्येन संसर्गाभावात्मूलाज्ञा
ननिवर्तकत्वं न स्यात् तथा च तत्त्वज्ञानानंतरमपि ब्र
ह्मापरोक्षं न स्यादित्यत आह एवं चेति एवमेवेत्यर्थः
ऐंद्रियकवृत्तिवदेवेति यावत् ब्रह्मगोचरवृत्तेः स्ववि
षयसंसर्गनियमे कारणमाह सर्वोपादानभूतेति
जायमानस्य सर्वस्य ब्रह्मसंसर्गनियमे सति ब्रह्मगो
चरवृत्तेः स्वविषयसंसर्गनियमे किं वक्तव्यमित्याशा
येन सर्वोपादानेत्युक्तं कार्यस्योपादानसंसर्गनिय

३
सि· ले
टी·
५८

56

मानत्वाच्च ब्रह्मगोचरवृत्तेर्नानुमेयवह्न्यादिगोचरा
नुमितिवृत्तितुल्यतेति भावः । अपरोक्षं चेति । ननु ज्ञाना
परोक्षस्याज्ञाननिवृत्तावप्रयोजकत्वमतेवेष्टं तज्जन्य
ज्ञानस्यापरोक्षत्वप्रसाधनमस्मिन्प्रशाद्वापरोक्षत्वा
देव्यर्थमिति चेन्न अज्ञाननिवर्तकज्ञानमपरोक्षरूपमि
ति नियमस्य चक्षुरादिजन्यज्ञाने सुदृष्टस्य ब्रह्माज्ञान
निवर्तके ब्रह्मगोचरशाब्दज्ञाने व्यभिचारवारणार्थं त
त्प्रसाधनस्यार्थवत्त्वोपपत्तेः मूलाज्ञाननिवर्तके
ब्रह्मगोचरशाब्दज्ञानेऽपरोक्षस्य तद्वैतन्यथ्यपन्वि
त्यादिक्रमाद्ब्रह्मसाक्षात्करोमीति विद्वदनुभवेन च सि
द्धस्य तत्र तत्प्रसाधनं विनानुपपत्तेश्चेति भावः । च
रादौ चरादिगोचरवृत्तिकालएवापरोक्षं न हि तु पर
मेतत्पुनरज्ञानान्तरकृतभेदप्राप्त्या सव्यवहारात्तु कु
लेचैतन्याभेदाभिव्यक्त्यभावान्नापरोक्षं ब्रह्मणि तन्मू
लाज्ञाननिवृत्तौ पुनरावरणकृतभेदाप्रसक्त्या ब्रह्म
ज्ञानानन्तरं सदैवापरोक्ष्यमिति विशेषं सूचयति तदा
मिति नन्वेवमप्यपनरहीनेति नियमेन यज्ज्ञाने वि
षयसंसृष्टतयोदेति तज्ज्ञानमज्ञानं निवर्तयत्येवेति
नियमोपगमे सतीत्येवं पाठार्थः । आपातज्ञानस्यापि
स्वविषयब्रह्मसंसर्गिन्येवउत्पन्नत्वादिति भावः ॥

न च तत्प्रमाणनिश्चयरूपत्वाभावान्नाज्ञान
निवर्तकमिति वाच्यं तथापि कृतश्रवण

स्य निर्विचिकित्सशाब्दज्ञानेन तन्निवृत्त्या
मननादिवैयर्थ्यापत्तिरिति चेन्न सत्यपि श्र
वणान्निर्विचिकित्सज्ञाने चित्तविक्षेपदोषे
णप्रतिबंधात् अज्ञानानिवृत्त्या तन्निराकरे
मनननिदिध्यासननियमविध्यर्थोनुष्ठान
स्यार्थवत्वात् अवांतरीयमननाद्यनुष्ठान
निरस्तचित्तविक्षेपस्योपदेशमात्रात्तब्रह्मा
परोक्षस्येष्यमाणत्वाच्चेत्याहुः अथैवमपि कृ
तनिदिध्यासनस्य वेदांतजन्यब्रह्मब्रह्माने
नेव घटादिज्ञानेनापि ब्रह्माज्ञाननिवृत्तिः
किं न स्यात् न च तस्य ब्रह्माविषयत्वान्न तो
ब्रह्माज्ञाननिवृत्तिरिति वाच्यं घटः सन्नित्या
दिवृत्तिवृत्तेः सद्रूपब्रह्मविषयत्वोपगमा
त् न च तत्र घटाद्याकारवृत्त्यात्तदज्ञाननि
वृत्तेः स्वतःस्फुरणादेव तदवच्छिन्नचैतन्य
सादिति प्रकाशनेन तस्य घटाद्याकारवृत्ति
विषयत्वमिति वाच्यं तदभावे घटविषयं
ज्ञानेन तदवच्छिन्नचैतन्याविषयमज्ञानमि
ति भिन्नविषयेणज्ञानेन तन्निवृत्तेरयोगा
त् जडेस्यावरणकृत्याभावेन घटस्याज्ञाना

३
सि॰ले॰
टी॰
५७

57

विषयत्वात् नच घटादिहतेस्तदवच्छिन्नचै
तन्यविषयत्वमखंडानंदाकारत्वाभावान्न
ततो मूलाज्ञाननिहृतिरिति वाच्यं ॥

सत्तानिश्चयरूपत्वमपि निवर्तकज्ञानविशेषणमतो
नोक्तातिप्रसंग इति शंकते नचतदिति विचारप्रागेवेन
मध्ययनगृहीतवेदांतजन्यज्ञानेनतद्धूहार्थः विशेष
णमभ्युपगम्याप्यतिप्रसंगमाह तथापीति अप्रतिब
द्धत्वमपि निवर्तकज्ञानविशेषणमतो नोक्तातिप्रसं
गोपीति समाधत्ते नसत्यपीति ननु मननादेर्विक्षेप
शांकितासंभावनाविपरीतभावनानिहृत्यर्थत्वेयस्य
विद्याधिकारिणोजन्मांतरीयमननादिसहितश्रवणा
नुष्ठानेन समस्तो विक्षेपदोषो निरस्तः तस्योपदेशमा
त्रेणापि सत्तानिश्चयरूपमप्रतिबद्धंच ब्रह्मज्ञानं जाय
ते तथाच तस्येह जन्मनि श्रवणमननाद्यनुष्ठानं वि
नापि मूलाज्ञाननिहृतिः ब्रह्मापरोक्ष्यं च स्यादित्यत
आह भवांतरीयेति तथाचेष्टापत्तिरिति भावः अन्येव
मपीति विक्षेपदोषनिहृत्यर्थे मननाद्यपेक्षायामपीत्य
र्थः कृतनिदिध्यासनस्याधिकारिणो घटादिध्यासनस्या
धिकारिणो घटादिज्ञानेनापि मूलाज्ञाननिहृतिः किंन
स्याद्घटादिहतेरपि मूलाज्ञानविषयचैतन्यविषयक
त्वाविशेषादित्याक्षेपाभिप्रायः मूलाज्ञानघटज्ञान
योः समानविषयत्वमसिद्धमिति सिद्धांतितः शंकाम
नूद्य निराकरोति नचतस्येति घटादिज्ञानस्येत्यर्थः त

नइतिघटादिज्ञानादित्यर्थः घटःसन्नित्याद्याकारया
वृत्तेः ब्रह्मचैतन्यविषयकत्वाभ्युपगमोऽप्यसिद्धइतिसि
द्धांतीशंकते नचतत्रेति तत्रेत्यादितच्छब्दद्वयेघटादिप
दंतस्येति ब्रह्मणइत्यर्थः घटाद्यवच्छिन्नचैतन्यस्यघटा
दिहानिविषयत्वंपूर्ववादीसाधयति तदभावइत्यादिना
चैतन्यस्यघटादिहानिविषयत्वाभावेसतीत्यर्थः ननु
यदिघटमात्रविषयकज्ञानेनघटावच्छिन्नचैतन्यवि
षयकाज्ञाननिवृत्तिर्नसंभवतितयोःसमानविषय
कत्वाभावात् तर्हिघटज्ञानेनसहाज्ञानस्यसमानविष
यकत्वसंपत्तयेऽज्ञानमपिघटादिजडमात्रविषयमे
वास्त्वित्याहपूर्ववादी जडइति जडस्यजडत्वादेवप्रमा
णानवतारदशायामप्रकाशोपपत्त्याजडस्याप्रका
शार्थीमावरणाकल्पनायोगादित्यर्थः कृत्यफलेनथा
चवेदांतजन्यज्ञानवत् घटादिज्ञानस्यापिब्रह्मचैतन्य
विषयकत्वावश्यंभावेनमूलाज्ञानसमानविषयक
त्वात्तेनापितन्निवृत्तिप्रसंगइतिस्थिते तत्रसिद्धांती
शंकतेनचेति ॥

वेदांतजन्यसाक्षात्कारेपितदभावात् नहि
तत्राखंडत्वमानंदत्वंवाकश्चिदपिप्रकारः
वेदांतानांसंसर्गागोचरप्रमाजनकत्वलक्ष
णाखंडार्थत्वहानापत्तेः नचवेदांतजन्यज्ञा
नादेवतन्निवृत्तिनियमइतिवाच्यं कृत्स्ना

ज्ञाननिवर्त्तकत्वप्रयोजकरूपस्याज्ञानांतरे
ऽपिसद्भावेन तथात्वानियतत्वमशक्यत्वात् नचघ
टाद्याकारहत्तिविषयस्यावच्छिन्नचैतन्यस्य
कल्पितत्वेन यन्मूलाज्ञानादिविषयभूतस्य
मनवच्छिन्नचैतन्यं तद्धि विषयत्वाभावादुदा
दिहत्तीनां निवर्त्यत्वाभिमताज्ञानसमानवि
षयत्वलक्षणांऽऽक्रमप्रयोजकमेवनास्तीति
वाच्यं तत्रावच्छेदकांशस्यकल्पितत्वेप्यव
च्छेद्यांशस्याकल्पितमूलाज्ञानविषयचैत
न्यरूपत्वात् तस्यकल्पितत्वे घटवज्जडत॰
याऽवस्थाज्ञानेप्रत्यपि विषयत्वायोगेनाव
स्थाज्ञानविषयाकल्पितचैतन्यविषयत्व
स्यवक्तव्यतया तन्निवर्त्तकघटादिज्ञानस्या
पि तद्विषयत्वावश्यंभावेननस्याहेतितनो
मूलाज्ञाननिहत्तिप्रसंगस्यापरिहारात् ॥

नर्हि वेदांतजन्यज्ञानमपि ब्रह्माज्ञाननिवर्त्तकं नस्यादिति
पूर्ववादी दूषयति वेदांतजन्येति अखंडत्वमनवच्छिन्न
त्ववेदांतजन्यज्ञानस्याखंडत्वादिधर्मवैशिष्ट्यावगाहि
त्वोपगमेवाधकमाह वेदांतानामिति मूलाज्ञाननिवर्त्त
कत्वात्तस्य वेदांतजन्यत्वमपि विशेषणं विवक्षितमतो

घटादिज्ञानेनातिप्रसंगइत्याशयवतीमाशंकामनूद्य
दूषयति पूर्ववादी नचवेदांतेत्यादिना वेदांतजन्यज्ञा
नत्वेनतस्यमूलाज्ञाननिवर्तकत्वप्रयोजकरूपस्यमूला
ज्ञानसमानविषयकत्वसत्तानिश्चयरूपत्वाप्रतिबद्ध
त्वलक्षणस्यनिदिध्यासनपरिपाककालेघटादिज
न्यघटादिज्ञानेपिसत्त्वेसतिवेदांतजन्यज्ञानादेवमूला
ज्ञाननिवृत्तिः नतुघटादिज्ञानादितिनियंतुमशक्यत्वा
त् वेदांतजन्यत्वस्यापिसत्तानिश्चयरूपत्वादेरिवप्र
योजकविशेषणत्वेगौरवान्मानाभावाच्चेतिभावः न
हिवेदांतजन्यज्ञानेत्वेनंयत्प्रयोजकंतदेवघटादिज्ञा
नेनास्तीत्याशंकते नचघटाद्याकारेति अवच्छिन्नत्वंकल्पि
तत्वेहेतुः अनवच्छिन्नत्वंसत्यत्वेहेतुः घटादिवृत्तीनां
कल्पितचैतन्यविषयकत्वेनसत्यब्रह्मविषयकत्वाभा
वादित्यर्थः घटाद्यवच्छिन्नचैतन्यंकल्पितमित्यत्रचै
तन्यांशस्याकल्पितत्वंकल्पितत्वंवाविवक्षितंनाद्यइ
त्याह नचेति अवच्छिन्नचैतन्यइत्यर्थः अवच्छेद्यचैत
न्यांशस्यघटादिवृत्तिविषयस्याकल्पितत्वेनमूलाज्ञान
विषयब्रह्मचैतन्यतद्रूपत्वादित्यर्थः तथाचघटाद्यव
च्छिन्नचैतन्यगोचरवृत्तेरपिनिवर्त्यत्वाभिमतमूलाज्ञा
नसमानविषयकत्वरूपंवेदांतजन्यज्ञानेत्वेनंप्रयो
जकमस्तीतिभावः द्वितीयकल्पेपिघटादिवृत्तौत्वेम
प्रयोजकमस्तीतिदर्शयन् तंकल्पंदूषयति तस्यक
ल्पितत्वइति अवच्छेद्यचैतन्यांशस्येत्यर्थः वक्तव्यतये
तिअवच्छेद्यचैतन्यांशस्यकल्पितत्वपक्षेतस्यजडत्वाप

३
सि॰ ले॰
टी॰
५५

59

त्याज्जडस्य तस्याज्ञानविषयत्वासंभवादवस्थाज्ञानेप्रति
मूलाज्ञानविषयब्रह्मचैतन्यमेव विषय इति वक्तव्यं
निर्विषयाज्ञानासंभवात् तथा च ब्रह्मचैतन्यविषयका
वस्थाज्ञाननिवर्तकत्वाय घटादिवृत्तीनामपि मूलाज्ञा
नविषयब्रह्मचैतन्यविषयकत्वमपरिहार्यं घटादिवृ
त्तीनां सत्यब्रह्मविषयकत्वाभावे अवस्थाज्ञानेन सहस
मानविषयकत्वाभावात्तासामवस्थाज्ञाननिवर्तकत्वं न
स्यादित्यर्थः तन्निवर्तकेति अवस्थाज्ञानेन तच्छब्दार्थः तद्वि
षयत्वेति मूलाज्ञानविषयब्रह्मचैतन्यं तच्छब्दार्थः तत्प
क्षेऽपीति अवच्छेदांशस्य कल्पितत्वमिति द्वितीयकल्पेऽपी
त्यर्थः तत इति घटादिज्ञानादित्यर्थः अपरिहार्यादिति
घटादिज्ञानस्यापि वेदान्तजन्यज्ञानस्येव मूलाज्ञानसमा
नविषयकत्वादिति भावः ॥

अत्राहुराचार्याः न चैतन्यं च वृत्त्यादिजन्यवृ
त्तिविषयः न संदृशे तिष्ठति रूपमस्य न च
क्षुषा पश्यति कश्चिदेनं पराञ्चि खानि व्यतृ
णत् स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्म
न्नित्यादिश्रुत्या तस्य परमाण्वादिवद्वृत्त्य
विषयत्वोपदेशादौपनिषदमिति विशेष
णाच्च न चमैवं प्रत्ययवेद्यत्वाद्ब्रह्मरूपेणाव
स्थितत्वादित्यादिवार्तिकविरोधः तस्य घटाद्या
कारवृत्त्युदये तस्यावरणाभिभवात् स्वप्रभे

सद्रूपं ब्रह्म घटः सन्निति च घटवत्स्वव्यवहार्यं
भवतीत्यौपचारिकघटादिवृत्तिवेद्यत्वपर
त्वात् आवरणाभिभावकत्वं च घटादिज्ञान
स्य घटादिविषयत्वादेवोपपन्नं घटादेरप्य
ज्ञानविषयत्वात् घटं न जानामीति घटज्ञानेन
घटाज्ञानेन ह्यभिभवस्याज्ञानांशे घटादिवि
षयत्वानुभवात् न च तत्रावरणकृत्याभावा
दज्ञानांगीकारेण प्रयुक्तः न ह्यावरकस्य तदव
च्छिन्नचैतन्यस्यावरणादेव तदप्रकाशोप
पत्तेरिति वाच्यं ॥

अत्राहुरिति घटादिज्ञानमपि मूलाज्ञाननिवर्तकं स्या
च्चैतन्यविषयकत्वाद्वेदांतजन्यज्ञानवदिति चोद्ये हेत्व
सिद्धिमाहुरित्यर्थः अस्यात्मनो रूपं संदृशे संदृशश्च
क्षुषो योग्यत्वेन न तिष्ठति रूपादिहीनत्वात् अतो न क
श्चिदेनमात्मानं चक्षुषा पश्यति पराञ्चि पराग्विषयाणि
खानीन्द्रियाणि व्यतृणत् हिंसितवान् ईश्वरः जडार्थ
विषयत्वेनैव करणानि सृष्टवानिति यावत् तस्मात्
तथासृष्टत्वात् पराङ् पराञ्चं सर्वलोक इन्द्रियैरुपलभते
नत्वन्तरात्मानं चैतन्यस्वभावमित्यर्थः न चक्षुषा दृश्य
त इत्यादिश्रुतिरादिपदार्थः न ह्येति चैतन्यस्येत्यर्थः न
तुपदीन्द्रियायोग्यत्वोपदेशाद्रूपनिषेधकगम्यत्वश्रव

३
सि· ले·
टी·
८·
60

णत्तु चैतन्यं घटादिवृत्तिविषयो न भवतीत्युपेयमेतर्हि
वार्तिकविरोध इति शङ्कते न च सर्वेति यद्यद्वस्तु प्रतीय
ते तत्सर्वं सदित्येव प्रतीयते तथा चानुभवबलात्स्वरू
पं ब्रह्म सर्वप्रत्ययवेद्यं तथा च व्यवस्थितमित्यर्थः चैतन्य
स्य सर्वप्रत्ययवेद्यत्वं मोऽन्यमेव वार्तिककाराणामभिम
तेन तु घटादिवस्तुखण्डदाद्यत्तवृत्तिविरोधात् तथा च न
वार्तिकविरोध इति समाधत्ते तस्येति वार्तिकवचनस्ये
त्यर्थः यथा घटस्य घटगोचरवृत्त्यधीनव्यवहारविषय
त्वं तथा घटाद्यधिष्ठानसद्रूपब्रह्मणोऽपि घटादिवृत्त्यधी
नव्यवहारविषयत्वमस्तीत्यनेन रूपेण सद्रूपं ब्रह्म घटा
दिप्रत्ययवेद्यमिति वार्तिककारैरुच्यत इत्यर्थः न चैवं
परोक्षवृत्तिविषयेष्वावरणानभिभवाङ्करातिस्त्वन
संभवतीति वाच्यं वार्तिके प्रत्ययपदस्यावरणाभिभाव
कवृत्तिपरत्वोपपत्तेरिति भावः ननु घटादिवृत्तेर्घटा
द्यवच्छिन्नचैतन्यविषयकत्वाभावे चैतन्यावरकाज्ञा
नाभिभावकत्वं न संभवति ज्ञानाज्ञानयोः समानवि
षयकत्वाभावादित्यत आह आवरणाभिभावकत्वं चेति
जडस्याप्यज्ञानविषयत्वमनुभवबलात्स्वीकार्यमित्याह
घटादेरपीति अवस्थापदं मूलाज्ञानव्यवच्छेदाय तस्य
ब्रह्म न जानामीति ब्रह्ममात्रविषयकत्वानुभवात् न
जडविषयत्वमिति भावः न च तत्रेति जडवस्तुनीत्यर्थः
न प्रकाशत इति ज्ञानाश्रयत्वे जडे न युक्तं तदावरणाभावा
त् तदभावस्य फलाभावादित्यर्थः घटं न जानामीत्यनु
भवस्तु घटतदधिष्ठानचैतन्ययोस्तादात्म्याच्चैतन्यवि

विषयकत्वेनाप्युपपद्यत इति भावः ननु जडस्यावरणा
भावे कथं तदप्रकाशः संभवति न च तत्प्रकाशकचै
तन्यसंसर्गाभावादेवाप्रकाशो न त्वावरणबलादिति
वाच्यं जडस्य स्वप्रकाशचैतन्येऽध्यस्ततया तस्य सदा
वभासकचैतन्यसंसर्गसत्वादतो जडस्याप्रकाश एव
जडावरणफलमित्यत आह तज्ज्ञापकस्येति अत्र तच्छ
ब्दत्रयं जडपरं ॥

उक्तभंग्या जडस्य साक्षादज्ञानविषयत्वा
निर्देशेऽपि जडावच्छिन्नचैतन्यप्रकाशस्याज्ञा
नेनावरणं ततो नित्यचैतन्यप्रकाशसंसर्गे
ऽपि जडस्य नास्ति न प्रकाशत इत्यादिव्यवहा
रयोरुपपत्तिरिति परंपरयाऽज्ञानविषयत्वा
भ्युपगमात् साक्षात्परंपरया वा यदज्ञाना
वरणीयं तद्धि विषयस्यैवाज्ञानस्य तदज्ञानाति
वर्तकत्वप्रयोजकशरीरे निवेशात् नचै
वं घटादीनामुक्तरीत्या मूलाज्ञानविषय
त्वमपि स्यादिति घटादिसाक्षात्कारादेव मू
लाज्ञाननिवृत्त्यापातः फलबलात् तदज्ञान
कार्यातिरिक्ततद्विषयविषयकत्वस्यैव त
न्निवर्तकत्वेनैवत्वात् ॥

उक्तभंग्येति तत्रावरणकृत्याभावादज्ञानांगीकारेण

३
सि॰ ले॰
टी॰
८१

61

पुक्त इति वाक्येन जडे साक्षाज्ज्ञानाश्रयत्वस्य साक्षादज्ञा
नविषयत्वस्य च प्रतिषेधेपीत्यर्थः ननु तद्वाक्यस्य ज
डे साक्षादज्ञानविषयत्वप्रतिषेधपरत्वं किमिति कल्प
ते साक्षात्पदं परम्परयाज्ञानविषयत्वमात्रप्रतिषे
धपरत्वसंभवादित्याशंक्य तथा सति तद्भासकस्य त
दवच्छिन्नचैतन्यस्यावरणादेव तदप्रकाशोपपत्तेरि
त्युक्तस्य वाक्येन जडेपि परंपरयाज्ञानविषयत्वाभ्युपग
मविरोधप्रसंगादित्याशयेनाह जडावच्छिन्नेत्यादिना
शंकाग्रन्थे तदप्रकाशोपपत्तेरित्यनेनांशेन जडेऽस्फुरि
प्रकाशनेपि यं चेत्येवमात्मकव्यवहारायोग्यत्वलक्ष
णमावरणमभ्युपगतं चैतन्यस्यावरणादेवेत्यनेनांशे
न जडावरणस्य कारणत्वेन चैतन्यावरणमभ्युपगत
मिति प्रतिपादयति प्रज्ञानेनेति तन्न इति चैतन्याव र
णादित्यर्थः चैतन्यस्य स्वप्रकाशतया तस्य यथा सदा
प्रसक्तप्रकाशत्वमावरणकल्पकमस्ति तथा जडस्या
पि सदा चैतन्यप्रकाशसंसृष्टतया सदा प्रसक्तप्रका
शत्वमावरणकल्पकं तत्स्यामिति सूचयति नित्यचै
तन्यप्रकाशसंसर्गेपीति इति शब्दः प्रकारवचनः न
नूक्तरीत्यावच्छिन्नचैतन्यनिष्ठमवस्थाज्ञानं जडतद
वच्छिन्नचैतन्ययोरुभयोरप्यावारकमिति लभ्यते त
थाच घटादिज्ञानस्य जडमात्रविषयकत्वस्वीकारेण
तस्याज्ञानेन सह सर्वांशे समानविषयकत्वाभावाद
ज्ञाननिवर्तकत्वं न स्यादित्यत आह साक्षादिति ज्ञान
स्याज्ञानसमानविषयकत्वमात्रं विरोधप्रयोजकमा

रीरे प्रविष्टं तत्र सर्वांशेपि समानविषयकत्वं गौरवादि
तिभावः नचैवमिति ज्ञानाज्ञानयोः सर्वांशे समानवि
षयकत्वानादर इत्यर्थः उक्तरीत्येति अवच्छिन्नचैतन्यस्य स्व
रूपेण सत्यतया ब्रह्मस्वरूपस्यावस्थाज्ञानविषयत्वव
न्मूलाज्ञानविषयत्वमप्यस्ति तथा चावस्थाज्ञानकृ
तचैतन्यावरणबलाज्जडस्यापि परंपरयावस्थाज्ञानवि
षयत्वमित्युक्तरीत्या मूलाज्ञानकृतचैतन्यावरणबला
त् मूलाज्ञानविषयत्वमपि जडस्य घटादेरपरिहार्यं
स्यादित्यर्थः ननः किं तत्राह घटादीति यथावस्थाप
रं ज्ञानं प्रतिपरया विषयभूतजडसाक्षात्कारादेवावच्छि
न्नचैतन्यनिष्ठावस्थाज्ञानस्य निवृत्तिस्तथा मूलाज्ञान
प्रत्यपि परंपरया विषयभूतजडसाक्षात्कारादेव मूला
ज्ञानस्यापि निवृत्त्यापात इत्यर्थः मूलाज्ञाननिवृत्त्यापा
तो न चेत्यत्र हेतुमाह फलबलादित्यादिना घटादिसाक्षा
त्कारे सत्यपि मूलाज्ञानानुवृत्तिरूपफलबलादित्यर्थः
मूलाज्ञानतत्कार्यातिरिक्तो यो मूलाज्ञानविषयश्चिन्मा
त्रं तद्विषयकत्वस्यैव ज्ञाने मूलाज्ञाननिवर्तकत्वेन त
त्वकल्पनात् घटादिसाक्षात्कारे च तदभावान्न मूला
ज्ञाननिवर्तकत्वापात इत्यर्थः ॥

अथवा मूलाज्ञानस्यैव जडं न विषयः अवस्था
ज्ञानानामवच्छिन्नचैतन्याश्रितानां तत्तज्जड
मेवविषयः अन्यथा बाह्यप्रवृत्त्या चेदन्तस्वे
डे चैतन्याभिव्यक्तौ तत्संसर्गिणो घटस्यापरो

स्यापत्तेः न च नभिव्यक्तौ चैतन्ये तद्रूपयोरप्यप्र
काशापत्तेः न च वाच्यं बहुत्वाच्चैतन्ये तद्रूपाव
च्छिन्नचैतन्ययोरभिव्यक्त्यानयोः प्रकाशः गंधा
कारत्वस्य भावेन गंधावच्छिन्नचैतन्यस्यानभि
व्यक्त्या तस्यानभिव्यक्त्या तस्याप्रकाशश्चेति
वाच्यं चैतन्यस्याद्विगुणीकृतत्वस्वभावेनैक
द्रव्यगुणानां स्वाश्रये सर्वत्र व्याप्यवृत्तिमाना
नोऽप्यस्य कस्य कुगगनावच्छेदकत्वस्यैव चैत
न्यावच्छेदकत्वस्याप्यसंभवात्तेषां स्वाश्रयद्र
व्यावच्छिन्नचैतन्यमेनैव श्रक्रीदंशणावच्छिन्न
चैतन्येन शुक्तिरजतवत्प्रकाशपत्या तस्या
भिव्यक्तौ गंधस्यापि प्रकाशस्यानभिव्यक्तौ
तद्रूपादेरप्यप्रकाशस्याचापत्तेः न च गंधाका
रत्वस्य परकूपवच्चैतन्ये पंथः प्रकाशनरति
नियमः ॥

जडमात्रगोचरत्वस्य कथमवच्छिन्नचैतन्यावरकाज्ञान
निवृत्तिर्भिन्नविषयत्वादिति शंकायामवस्याज्ञानमव
च्छिन्नचैतन्यावरणद्वारा जडमप्यावृणोति अतो जडमात्र
गोचरस्यापि वृत्त्याऽवस्याज्ञाननिवृत्तिः संभवतीति प्र
तिपादितमिदानीं तस्यामेव शंकायां प्रकारांतरेण स
माधानं दर्शयति अथवेति अथवाऽवस्याज्ञानानां
तज्जडमेव विषय इति संबंधः चरमज्ञानानामीत्यादि सर्वो

स्वानुभवादेवेतिभावः तर्ह्यवस्थाज्ञानानामाश्रयोपि
ततज्जडमेवस्यात्तथाचापसिद्धान्त इत्यत आह अवच्छि
न्नचैतन्याश्रितानामिति ननुजडस्याज्ञानविषयत्वोप
गमेजडमज्ञानस्यविषयोनभवतीतिसिद्धान्तस्यकाग
तिरित्यतआह मूलाज्ञानस्यैवेति जडस्याज्ञानाविषय
त्वसिद्धान्तोमूलाज्ञानमात्रविषयइतिभावः अन्यथे
ति जडस्यानावृतत्वेइत्यर्थः चंदनखंडगोचरचाक्षुष
वृत्त्यातदवच्छिन्नचैतन्यमभिव्यज्यतेनवा आद्येदोषमा
ह तत्संसर्गिणइति चंदननिष्ठगंधस्यापिचंदनस्येवा
परोक्षत्वापत्तिरभिव्यक्तचैतन्यसंसर्गित्वस्योभयत्राविशे
षात् जडस्यावृतत्वपक्षेतुनायंदोषः चाक्षुषवृत्त्यागंधा
वरणानिवृत्तेरित्यर्थः द्वितीयेदोषमाह तदनभिव्यक्ता
इति अप्रकाशापत्तेरिति चंदनगोचरचाक्षुषवृत्तिकाले
चंदनतद्रूपप्रकाशाभावोनिष्ट इतिभावः चंदनखंडन
घटपटादिद्रव्याणामिवैकद्रव्यवृत्तिगुणानामपिचैत
न्यावच्छेदकत्वमस्तीत्यभिप्रायाशंकते नचेति एकत्र
द्रव्येरूपरसगंधादिभेदेनचैतन्यभेदोनास्तिमानाभावा
दित्याह चैतन्यस्येति चैतन्यस्यनिरवयवतयाद्रव्येद्र
व्यावच्छेदेनैकागुणावच्छेदेनापरावृत्तिर्नसंभवतीत्य
र्थः यद्येकद्रव्येप्रदेशभेदेनगंधादयःस्युःतदातत्रद्रव्ये
गंधादिभेदेनचैतन्यभेदशंकापिस्यात् नत्वेतदस्तिगं
धादीनांव्याप्यवृत्तित्वानुभवादित्याशयेनाह व्याप्येति
यथाघटादिद्रव्याणांगगनभेदकत्वमस्तितथागंधादी
नांगगनभेदकत्वंनास्तिगंधादिभेदेनगगनभेदानव

१
सि·ले·
टी·
८४

64

भवादितिभावः गंधादिभेदेन चैतन्यभेदाभावे सिद्धे चं
दनचैतन्याभिव्यक्त्यनभिव्यक्तिकृतो पूर्वोक्तदोषो दुष्प
रिहरावित्याह तेषामिति शुक्तीति यथा शुक्तीदमंशा
वच्छिन्नचैतन्ये रजतस्याध्यासात् रजतं शुक्तीदमंशचै
तन्ये एवावभासयन् तदिदमंशावच्छिन्नचैतन्यापेक्षयाऽ
प्यगम्भूतेन तस्यावच्छिन्नचैतन्येनावभास्यं तथा द्रव्याव
च्छिन्नचैतन्ये कल्पितान् रूपादयोपि द्रव्यावच्छिन्नचैतन्ये
नैव प्रकाश्या इत्यर्थः ननु चंदनगंधस्याभिव्यक्तचैत
न्यप्रकाशसंसृष्टस्यापि गंधगोचरवृत्त्यभावादेवाप
रोक्ष्याभाव इति शंकामनूद्य निराकरोति नचगंधाकारे
ति ॥

प्रकाशसंसर्गस्यैव प्रकाशमानशब्दार्थ
त्वेनास्मत्यामपि तदाकारवृत्त्यावनाहूनप्र
काशसंसर्गैः प्रकाशमानत्वकल्पनस्यावि
रुद्धत्वात् अभिव्यक्तस्य चंदनगंधोपादानचैत
न्यस्य गंधासंसर्गेऽपि संभवात् तस्माद्यथा
चैत्रस्य घटवर्त्तिनं प्रत्यावरकस्यैवाज्ञान
स्य निवृत्तिरिति तस्यैव विषयप्रकाशो ना
न्यस्य तथाननहि विषयाकारवृत्त्याननतदवर
काज्ञानस्यैव निवृत्तेन विषयांतरस्यापरो
क्षमनाहतार्थस्यैव संविदभेदापरोक्षमि
त्यपगमादिति प्रमातृभेदेनैव विषयभे

देनाप्येकत्रचैतन्यैवस्याज्ञानभेदस्यवक्त
व्यतयावस्याज्ञानानांतनजडविषयकत्व
मितिचरादिहनीनांनावस्याज्ञाननिवर्त
कत्वेकाविद्वत्पपत्तिर्वामूलाज्ञानानि
वर्तकत्वापत्तिः ॥
नियमोनचेत्यत्रहेतुमाह प्रकाशसंसर्गस्यैवेति ननु
हस्तुपहितानाहतप्रकाशसंसर्गस्यप्रकाशमानघटा
र्थत्वेसत्वादिगोचरहत्यनुयद्गिनसादिप्रकाशसंयस
र्गिणिसत्वादौप्रकाशमानघटाद्यर्थत्वाभावप्रसंगादि
त्यर्थः गंधस्याभिव्यक्तचैतन्यसंसर्गएवनास्तीत्याशंक्या
ह अभिव्यक्तस्यचेतिचकारस्यासंभवादित्यनेनसंबंधः
उपादानपदमपिष्टानपरं असंभवादिति तथाचजड
स्यानावृतत्वपक्षेचैवेदनचैतन्याभिव्यक्तिदशायांगंध
स्याप्यपरोक्षापत्तिरपरिहार्येतिभावः जडस्यावृतत्व
पक्षेतुनोक्तदोषप्रसक्तिरित्याह तस्मादिति जडेआ
वरणस्यसिद्धत्वादित्यर्थः ननुजडस्यावृतत्वपक्षेपि
वेदनगोचरत्वादृघटस्यैवगंधावरणस्यापिनिवृत्तिः
स्यात् गुणगुणिनोस्तादात्म्यात् तथाचवेदनापरोक्ष
दशायांतद्गंधापरोक्षदोषोऽआपितत्स्यइतिशंकांदृष्टा
न्तेनपरिहरति यथेति नान्यप्रत्यावरकाज्ञानस्यापिनि
वृत्तिरित्येवकारार्थः तस्यैवेति चैत्रस्यैवघटप्रकाशो
नान्यस्यमैत्रादेरित्यर्थः तथेति गुणगुणिनोस्तादात्म्ये
पिभेदस्यापिसत्वात् नवेदनगोचरत्वस्यगंधादेरपरो

इ
सि॰ ले॰
टी॰
८५

65

स्यप्रसक्तिरित्यर्थः ननु वेदनसंविदभिन्नस्य गंयस्याह
तस्यापि कथं नापरोक्ष्यमित्याशंक्यानाह तत्स्वभावादावेव
संविदभेदस्यापरोक्ष्यप्रयोजकत्वदर्शनान्नैवमित्याह
अनाहतार्थस्यैवेति नन्वेकत्र वेदनावच्छिन्नचैतन्ये अव
स्थाज्ञानस्य चैत्रं प्रति वेदनावरकस्यैकत्वात्तस्य च वेदन
गोचरत्वान्निहतत्वाद्वेदनवृत्तिकाले गंयस्यावरण
मयुक्तमित्याशंकां निराकरोति इति प्रमातृभेदेनेवे
ति यथा प्रमातृविषये चैत्रमैत्रादिभेदेनाज्ञानमनेक
मस्ति तथा एकत्रापि वेदनावच्छिन्नचैतन्ये गंयादिवि
षयभेदेनाप्यज्ञानमनेकमस्तीति वक्तव्यं वेदनापरो
क्षदशायां गंयापरोक्षादर्शनादेवेत्ययं हेतुः प्रकृत
परामर्शिनेति पदेन समर्थ्यते तथा च वेदनापरोक्ष
काले गंयादेरावरणसंभवान्नोक्तदोष इति भावः ज
डविषयकत्वमितीति जडविषयकत्वादित्यर्थः नका
चिदनुपपत्तिरिति घटादिवृत्तीनां चैतन्याविषयकत्वा
भावेऽज्ञानाज्ञानयोः समानविषयकत्वरूपं विरोधप्रयो
जकं न भवति नासौ जडमात्रगोचरत्वादज्ञानस्य चैत
न्यमात्रविषयकत्वादिति पूर्वोक्तानुपपत्तिर्नास्ति अव
स्थाज्ञानस्यापि जडमात्रविषयकत्वाभ्युपगमात् तथा
जडस्यावरणाभ्युपगमेऽपि सिद्धान्तापत्तिरूपानुपपत्तिर
पि नास्ति जडावरणानभ्युपगमस्य मूलाज्ञानविषय
त्वात् तथा च न तज्जडावरकाज्ञाननानात्वाभ्युपगमेन त
देकत्वसिद्धान्तविरोधरूपानुपपत्तिरपि नास्ति तदेकत्वा
भ्युपगमस्यापि मूलाज्ञानविषयत्वात् जडावरकाज्ञाना

नां बाधस्यानुपपत्त्यादित्यादिकमभिप्रेत्य न काविदनुप
पत्तिरित्युक्तं परमप्रकृतमाह न चेति घटादिवृत्तीना
मपि मूलाज्ञाननिवर्तकत्वापत्तिरिति यत्सर्ववादिन
श्चोद्यमादौ प्रकृतं तत्त्वात्स्येव घटादिवृत्तीनां मूलाज्ञान
विषयचैतन्यविषयकत्वानभ्युपगमादित्यर्थः ॥

न चैवमपि जीवविषयायामहमाकारवृत्ते
र्मूलाज्ञाननिवर्तकत्वापत्तिः तस्याः स्वयं
प्रकाशमानचित्संवलिताऽचिदंशमात्रवि
षयत्वात् सोऽहमिति प्रत्यभिज्ञायामपि स्व
यंप्रकाशचैतन्येऽन्तःकरणवैशिष्ट्येन सह पू
र्वापरकालवैशिष्ट्यमात्रविषयत्वेन चैतन्य
विषयत्वाभावादिति केचित्तु घटादिवृत्तीनां
तत्तदवच्छिन्नचैतन्यविषयत्वमभ्युपगम्यस
र्वमानप्रसक्तौ च सर्वमानफलाश्रयात् श्रो
तव्य इति वचः प्राह वेदान्तावकृतस्येति वा
र्त्तिकोक्तेः श्रोतव्यवाक्यार्थवेदान्तनियमवि
ध्यनुसारेण वेदान्तजन्यमेव नियमादृष्टस
हितं ब्रह्मज्ञानमप्रतिबद्धं ब्रह्मज्ञाननिवर्त
कमिति न घटादिज्ञानानां तन्निवृत्तिप्रसंग इत्या
हुः सत्येवं तत्त्वमस्यादिवाक्यजन्यजीवब्र

३
शि॰ स्ते॰
टी॰
६६

66

स्वाभेदगोचरमेवज्ञानमस्वाज्ञाननिवर्तकं
मस्वाज्ञानस्यतदभेदगोचरत्वादिति नचैतस्य
स्वरूपमात्रगोचराहरादिज्ञानान्निवृत्तिप्रसं
गः ॥

नचैवमपीति घटादिहंतीनांचैतन्यविषयकत्वाभावेप्यह
मर्थरूपजीवस्यविदचित्संवलितरूपतयाप्यहंहंतेःचैत
न्यविषयकत्वावश्यंभावादित्यर्थः नस्याइति स्वप्रकाश
तयास्वयमेवप्रकाशमानायांचितिसंवलितः चितादा
त्म्येनाध्यस्तोयोयमचिदंशः तस्मात्रविषयकत्वादहमा
कारहंतेनैचैतन्यविषयकत्वमौपनिषदत्वश्रुतिविरो
धादेवेत्यर्थः ननुयोहंस्वमेद्राक्षमस्मनुभूवं सोहंजा
गरेनेस्मरामीत्यादिप्रत्यभिज्ञायाश्चैतन्यविषयकत्वमा
वश्यकमन्यथातयाचिदात्मनःस्थायित्वसंधानव्याति
रिक्तत्वंच नसिध्येदित्यतआह सोहमिति प्रत्यभिज्ञापि
स्वयमेवप्रकाशमानेचैतन्येअहमित्यंतःकरणतादा
त्म्यमिवततादिवैशिष्ट्यमपिविषयीकरोति नतुस्वप्र
काशंचैतन्य मस्मिन्मतेचिदात्मनःस्थायित्वादेःश्रुतिब
लादेवसिद्धेःनप्रत्यभिज्ञायाइतिबोध्यं घटादिहंतीनाम
पिचैतन्यविषयकत्वाविशेषाद्वेदांतजन्यज्ञानवत्स्वा
ज्ञाननिवर्तकत्वापत्तिरिति चोद्येहंतोरेवासत्वान्नतोक्ता
तिप्रसंगइति समाधानमुक्तमिदानींतासांचैतन्यविष
यकत्वाभ्युपगमेपिनोक्तातिप्रसंगइत्याह केचिदिति
अभ्युपगम्येति नचैवमभ्युपगमेचैतन्यस्यचघटादिविष
यत्वनिषेधश्रुतीनांबाधःस्यादितिवाच्यं तासामनिरूपाधिक

चैतन्यविषयत्वाभ्युपगमेनावच्छिन्नचैतन्यस्य वस्तुतोदि
ह्यतिविषयत्वेन हि दोषाभावादिति भावः अत एव ब्रह्म
चैतन्यस्य सर्वप्रत्ययवेद्यत्वप्रतिपादकं पूर्वोदाहृतवार्ति
कवचनमपि संगच्छते अज्ञातज्ञापकत्वं हि शास्त्राणां अ
ज्ञातं च वस्तु चैतन्यमेव तस्यैव स्वप्रकाशतया सदा प्रसक्त
प्रकाशस्याज्ञानविषयत्वकल्पनौचित्यात् अवभासक
चैतन्यस्यावरणे सति जडानवभाससंभवेन तस्य पृथगा
वरणकल्पनायोगाद् ज्ञानस्य चैतन्याश्रितत्वनियमेन
तस्य तमस्स्वस्याश्रयादन्यत्रावरणहेतुत्वानुपपत्तेश्च
तथा च प्रत्यक्षादीनामपि शास्त्राणां सिद्धये घटाद्यवच्छिन्न
चैतन्यविषयकत्वमेव स्वीकर्तव्यं न तु जडमात्रविषयक
त्वमेवं सर्वेषामेव मानानां फलशाली चैतन्यविषयक
त्वात् अतस्तत्त्वसाधने ब्रह्मदर्शने सर्वेषां मानानां कारणत्व
प्रसक्तौ वेदान्तानामेवावसेयेत्येवं यानियमेनेत्थं याश्रोतव्ये
ति वचः वेदान्तानामेव विचारः कर्तव्य इत्यर्थमर्थं प्राह इति वा
र्त्तिकार्थः घटादिवृत्तीनां चैतन्यविषयकत्वेपि वेदान्तज
न्यत्वाभावेन श्रोतव्यादिविधिसिद्धनियमादृष्टसाहित्याभावा
न्न मूलाज्ञाननिवर्तकत्वप्रसंग इति भावः अतएव द्रष्टव्यमिति
नियमादृष्टेन प्रतिबंधकदुरितस्य क्षीणत्वादिति भावः
तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनमिति नारदव
चनदर्शनात् तत्त्वमस्यादिवाक्योत्थयजीवपरमात्मनोः
तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनमिति भगवत्पा
दीयवचनदर्शनाच्च मूलाज्ञानस्य जीवब्रह्माभेदावरक
त्वाच्च जीवब्रह्मणोरैक्यलक्षणतादात्म्यविषयकं यहान

३
सि· ले·
टी·
९७

67

सिद्धमेवमुक्तिसाधनमबोधेनोक्तातिप्रसंगइतिसमाधानां
तरंदर्शयति अन्येत्विति शुक्तीतिवाक्यजन्याभेदज्ञानमेवा
ज्ञाननिवर्तकमितिस्थितेनतदभेदागोचरात्तद्घटादिज्ञाना
न्मूलाज्ञाननिवृत्तिप्रसंगइत्यर्थः ॥

नचाभेदस्यतत्त्वावेदकप्रमाणाबोध्यस्य चैत
न्यातिरेकेद्वैतापत्तेश्चैतन्यमात्रमभेद इति
तद्गोचरघटादिज्ञानमप्यभेदगोचरमिति
वाच्यं नह्यभेदज्ञानमितिविषयतो विशेषं
ब्रूमः किंतु ॥

नचेतिजीवब्रह्माभेदःचैतन्यायेत्तयातिरिक्तइतिवक्तुंन
शक्यतेतथासतिवेदांततात्पर्यगोचरस्याभेदस्यसत्य
त्वावश्यंभावेनचैतन्यस्याद्वितीयत्वहानापत्तेर्वेदांत
तात्पर्यविषयस्याभेदस्यासत्यत्वेवेदांतानांतत्त्वावेद
कत्वलक्षणस्यप्रामाण्यस्यसिद्धांतसंमतस्यभंगाप
त्तेरित्यर्थः अत्रतन्मतेपरमार्थवस्तुपरं नहीति घटा
दिज्ञानेचैतन्यविषयकेपिजीवब्रह्माभेदोनविषयः
महावाक्यार्थज्ञानेतत्तयोरभेदोविषयइत्येवंघटादि
ज्ञानायेत्तयामहावाक्यजन्यज्ञानस्यविषयतोविशे
षंब्रूमः येनोक्तदोषतादवस्थ्यंस्यादित्यर्थः नचेदं
रजतमितिभ्रमेयावानधिष्ठानांशोभासतेतावदपे
क्षयाअधिकशुक्तित्वादिविशेषविषयकस्यशुक्त्यादि
ज्ञानस्यरजतादिभ्रमविरोधित्वंदृष्टंतथाचसन्दृष्टः

स्फुरति चट इत्यादिभ्रमेषु यावदधिष्ठानभूतं चैतन्यं विष
यः तावदपेक्षया ग्रथिकाभेदाविषयकत्वस्य वाक्यजन्य
ज्ञानेऽनभ्युपगमे वाक्योत्थज्ञानस्य भ्रमनिवर्तकत्वमेव न
स्याद्ततो विषयत्वो विशेषोऽभ्युपगंतव्य इति शंकते किंवि
ति भ्रमाधिकविषयाणामेव ज्ञानानां भ्रमनिवर्तकत्वमि
ति नियमो नास्ति भ्रमानधिकविषयाणामपि भ्रमनिवर्त
कत्वदर्शनेन व्यभिचारात् तथा हि वस्तुतो बोधाधारभू
ते गंगातीरे यस्य तटाकतीरत्वभ्रमेण तटाकतीरे बोधः इ
ति भ्रमोऽस्ति तं प्रति गंगायां घोषः इति वाक्यप्रयोगे सति
तस्माद्वाक्यात्तस्य पूरुषस्य गंगातीरे बोधः इति बोधो जाय
ते तेन च बोधेन तस्य गंगातीरे तटाकतीरत्वभ्रमो निवर्त
ते न च तत्र भ्रमविषयगंगातीरांशे भ्रमापेक्षया वाक्यज
न्यबोधे कश्चिद्विशेषविषयोऽदृष्टः न च तत्र वाक्यजन्यज्ञा
नेन तटाकतीरव्यावर्तकस्य गंगातीरत्वरूपविशेषस्य वि
षयत्वदर्शनाद्विशेषविषयकत्वमस्तीति वाच्यं
यत्र तीरत्वमात्रप्रकारकतात्पर्येण गंगायां घोष इति प्र
योगः तथैव तस्य श्रोतुस्तात्पर्यग्रहस्तत्र गंगातीरत्व
प्रकारकबोधाभावेऽपि भ्रमनिवृत्तिदर्शनेन व्यभिचार
योव्यात् तथा येन केनचित्कपालेन तुषोपवापः कर्त
व्य इति भ्रमवंतं पुरुषं प्रति कपालत्वमात्रप्रकारकता
त्पर्येण प्रयुक्तात्तन्मात्रतात्पर्यवतया गृहीतात्पुरोडा
शकपालेन तुषानुपवपतीति वाक्यात्कपालेन तुषो
पवापः कर्तव्य इत्येव तस्य बोधो जायते तेन तत्र कपालांशे
कपालांतरव्यावर्तकविशेषाग्रहणेऽपि पुरोडाशक

३
सि॰ले॰
टी॰
९८

68

पालातिरिक्तकपालेषु तद्धोपधायसाधनत्वभ्रमनिवृत्तिदर्शी
नेतनत्रापिव्यभिचारात् तस्मात्तीरेघोषइतिशाब्दबोधस्य गंगा
तीरत्वरूपविशेषविषयकत्वाभावेपि तद्धेतुपदार्थोपस्थिति
कालेतीरस्यगंगासंबंधित्वेनउपस्थितिमत्वात्तदुपस्थितिम
हिम्नावस्तुतस्त्वगंगातीरविषयकस्यभ्रमानात्मकविषयस्या
पितस्यभ्रमनिवर्तकत्वमितिवक्तव्यं तथाकपालेनतद्धो
पधायःकर्तव्य इतिशाब्दबोधस्यस्वयंकपालान्तरव्यावर्तक
विशेषविषयत्वाभावेपितादृशशाब्दबोधहेतुपदार्थोप
स्थितिकालेकपालस्यपुरोडाशसंबंधित्वेनउपस्थितिमत्वा
तदुपस्थितिमहिम्नातस्यभ्रमानात्मिकविषयस्यापिभ्रम
निवर्तकत्वमितिवक्तव्यं तथाचज्ञानस्यभ्रमविरोधित्वे
सामग्रीविशेषप्रयोज्यत्वप्रयोजकंनतुभ्रमात्मिकवि
षयत्वंव्यभिचारात् ॥

नत्वेपरवाच्यार्थेधर्मिद्वयपरामर्शादिरूपका
रणविशेषाधीनेनस्वरूपसंबंधविशेषेण
चैतन्यविषयत्वमेवतद्भेदज्ञानत्वं यथा
हिविशेषणविशेष्यतत्संबंधगोचरत्वाविशि
ष्येपिविशेषेपिविशिष्टज्ञानस्यविशेषणज्ञा
नादिकारणविशेषाधीनस्वरूपसंबंधवि
शेषेणतद्भिन्नयगोचरत्वमेवमस्मद्गालव
नव्याहतंविशिष्टज्ञानत्वंयथावाख्यातव
विरुद्धप्रकारकत्वानितासार्थव्याहतेनसंश

यत्वं विषयत्वं विषयतो विशेषानिरूपणा
त् तथा घटादावपि सोयं घट इत्यादिज्ञान
स्य स्वरूपमेवं धविशेषेण घटादिविषयत्व
मेव लब्धं घटशब्दादिजन्यज्ञानव्यावृत्तं तद
भेदज्ञानत्वमतिरिक्ताभेदानिरूपणात् ॥

किंच महावाक्यजन्यज्ञानस्य संसारमूलभ्रमविरोधि
त्वं श्रुतिस्मृतिविद्वदनुभवैः सिद्धं महावाक्यानां चचैत
न्यस्वरूपमात्रबोधकत्वं द्वितीयपरिच्छेदे युक्तिसाध
नं महावाक्यजन्यज्ञानं प्रति चैतन्यमात्ररूपविषय
तियामकत्वमुदाहरणेनास्माभिः साधितं प्रपंचितं
च निबंधनेषु तन्न तथा च शुक्तिरजतादिस्थले भ्रमा
धिकविषयकशुक्तिज्ञानादौ भ्रमविरोधिनि भ्रमाधि
कविषयत्वस्येव दोषाभावादिघटितसामग्रीविशे
षाधीनत्वस्यापि दृष्टत्वेनाखंडार्थकवेदांतानुसारे
ण पूर्वोदाहृतव्यभिचारस्यानुरोधेन च ज्ञानस्य भ्र
मविरोधित्वे सामग्रीविशेषाधीनत्वमेवानुगतं प्र
योजकं कल्पयितुं युक्तं न तु भ्रमाधिकविषयत्वमित्य
भिप्रेत्य महावाक्यार्थज्ञानस्य भ्रमानधिकविषयस्या
पि भ्रमनिवर्तकत्वं संभवतीति समाधत्ते तत्वमिति
तत्त्वंपदयोर्वाच्यार्थभूतौ जीवेश्वरावेव धर्मिद्वयेन
स्य तत्त्वंपदाभ्यां प्रथममेव शाब्दस्मृतिरूपः परामर्शो
त्तदनंतरं तत्त्वंपदसमानाधिकरण्यबलात् जीव

१
सि· ले·
टी·
८५

69

र्थस्याभिन्नत्वे इति तयोर्विशेषणविशेष्यभावेनावगतिः त
दनंतरं च विशिष्टयोरैक्यं न संभवतीति विरोधप्रतीतिः
तदनंतरं च तत्त्वंपदाभ्यां वाच्यार्थैकरूपविशिष्टान्तर्गतयोर्वि
शेष्ययोरेव तत्पदार्थयोरभेदयोग्ययोर्लक्षणया प्रतीतिस्तत
श्च विशेष्यद्वयाभेदगोचरशाब्दबोध इति क्रममभिप्रेत्य
आदिपदं वाक्यजन्यज्ञानस्य स्वविषयचैतन्येन सह यः
स्वरूपसंबंधविशेषः सामग्रीविशेषाधीनत्वप्रयुक्तस्ते
न संबंधेन चैतन्यगोचरत्वं घटज्ञानादिव्यावृत्तं तदेव त
स्याभेदज्ञानत्वं न फलादेव तस्य मूलाज्ञानमिथ्याज्ञाना
दिविरोधित्वमित्यर्थः महावाक्यजन्यज्ञानस्य घटादिज्ञा
नापेक्षया चैतन्यांशे विषयतो विशेषाभावेऽपि सामग्री
विशेषादेव घटादिज्ञानापेक्षया अभेदज्ञानत्वरूपवैल
क्षण्यं दृष्टान्तमाह यथा हीति विशिष्टज्ञानस्येति दंडी
पुरुष इति ज्ञानस्येत्यर्थः विशेषणविशेषणविशेष्ययो
रसंसर्गाग्रहरूपादिपदार्थः समूहालंबनेति दंडपुरुष
संयोग इति ज्ञाने इत्यर्थः तदुक्तं चिन्तामणिकृता का
रणकृत इति विशिष्टज्ञानस्य समूहालंबनापेक्षया
विशेषणज्ञानादिरूपकारणकृतो विशेष इति तद
र्थः स्थाणुर्वेति स्थाणुत्वविरुद्धपुरुषत्ववानिति नि
श्चयः संशयसमानविषयकोऽयमाहार्य इति रूपः त
च्चाहृतमित्यर्थः विशेषदर्शनदशायामनाहार्यनि
श्चयासंभवादाहार्यत्वमुक्तं विषयतत्त्व इति विशिष्टज्ञाने
स्थाणुः पुरुषो वेति संशये चेति शेषः न केवलं तत्त्व
मसिवाक्यजन्यज्ञानस्याभेदज्ञानत्वे इयं रीतिः सोऽयं

बरः सोयंदेवदत्त इत्यादिवाक्यजन्यज्ञानस्यापि केव
लघटग्राह्यदेवदत्तग्राह्यादिजन्यज्ञानस्याहृताभेदज्ञा
नत्वेपीयंपीतिरस्तु सर्वत्रेत्याह तथा घटादावपीति
प्रतिरिक्तेति केवलघटग्राह्यदेवदत्तग्राह्यादिजन्यज्ञा
नविषयघटस्वरूपापेक्षया सोयमित्यादिवाक्यजा
न्याभेदस्यातिरिक्तत्वमानाभावात्तथा च विषयतो
विशेषाभावात् सोयं घट इत्यादावपि तत्त्वमसीत्यत्रे
व सोयमिति पदद्वयवाच्यार्थरूपधर्मिद्वयपरामर्शी
दिरूपकारणविशेषाधीनस्वरूपसंबंधविशेषेणाव
टादिस्वरूपविषयकत्वमेव घटाद्यभेदज्ञानत्वेनान्य
द्विनिवक्तव्यमिति भावः ॥

प्रभावस्याहृपादीनामपिकरणप्रतियोग्या
दिभिः स्वरूपसंबंधयुक्तानामपिकरणेना
धाराधेयभावरूपस्वरूपसंबंधविशेषः प्र
तियोगिताप्रतियोग्यनुयोगिभावरूप इत्या
दिप्रकारेण स्वरूपसंबंधेऽवांतरविशेषक
ल्पनवत्तद्वतीनां विषयेपि संयोगतादात्म्य
योरतिप्रसक्त्या विषये विषयविषयिभावरू
पस्वरूपसंबंधवतीनां विषयविशेषनिरू
पणासंभवे स्क्ष्मपस्वरूपसंबंधस्यावांत
रविशेषकल्पनेनाभेदज्ञानत्वादिपरस्परवै

३
सि·ले·
टी·
७·

70

लक्षणनिर्वाहाच्च एवं केवलज्ञानस्याभेदा
त्किंचित्सर्वगोचरत्वानभ्युपगमात्त्वे
दान्तिनामखण्डार्थत्वहानिरपीत्याहुः ॥

ननु केवलचक्षुर्घ्राणादिजन्यज्ञानस्यापि विषयेण स्व
रूपसंबंध एव न तथा च कथं स्वरूपसंबंधकृताभेद
ज्ञानत्वादिव्यवस्था न च हानिज्ञानानां विषयैः सह वि
षयविषयीभावप्रयोजकस्वरूपसंबंधानामविशे
षेपि तेषु च विषयतज्ज्ञानस्वरूपात्मकसंबंधेषु साम
ग्रीविशेषाधीनत्वप्रयुक्तं परस्य वैलक्षण्यकल्पनया
व्यवस्थोपपादने कर्तुं शक्यत इति वाच्यं स्वरूपसंबं
धेषु वैलक्षण्यस्य क्वाप्यदृष्टत्वेन न तथा कल्पनानुप
पत्तेरित्यत आह अभावसादृश्यादीनामिति ननु ज्ञाना
नां विषयैः सह विषयविषयीभावः स्वरूपसंबंधकृत
एव न भवति किंतु संयोगादिकृतः तथा च ज्ञानानां तैः स
ह स्वरूपसंबंधानामेवासिद्धत्वात् तेषु वैलक्षण्यात्म
कविशेषकल्पना दूरापास्तेत्यत आह संयोगेति इति
संयोगस्य इति विषयत्वप्रयोजकत्वे चक्षुर्गोलकादे
रपि घटादि इति संयोगित्वेन तद्विषयत्वप्रसंगात् इति
तादात्म्यस्य इति विषयत्वप्रयोजकत्वे इत्यपि ज्ञा
नतयो इति तादात्म्यापन्नस्य घटाद्यवच्छिन्नचैतन्य
स्य घटादि इति विषयत्वसंभवेपि घटादेः इति तादा
त्म्यरहितस्य तदविषयत्वप्रसंगात् इति परिणामस्य
तः करणस्य घटादि इति विषयत्वप्रसंगाच्च परिणा

मपरिणामिनोस्तादात्म्यादित्यर्थः ननु तत्वमस्यादिवा
क्यजन्यज्ञानस्य विषयेण सह यः स्वरूपसंबंधस्तेन न्यून
ज्ञोचरज्ञानोभयस्वरूपात्मकः तत्र सामग्रीविशेषबलाद
पि विषयस्वरूपात्मके संबंधे विशेषानिरूपणे तं न शा
क्यत इत्यत आह विषयविशेषनिरूपणासंभवे इति
विषये निर्विशेषचैतन्यात्मके विशेषाधानासंभवेपि स्व
रूपसंबंधान्तर्गतेन तयाक्रमपवज्ञानस्वरूपात्मके सं
बंधे सामग्रीविशेषबलाद्विशेषाधानसंभवान्नोक्त
दोष इति भावः यद्वा वृत्तीनां विषयेपि संयोगतादात्म्य
योरतिप्रसक्त्या विषयविशेषनिरूपणासंभवे विषयै
र्विषयविषयीभावरूपस्वरूपसंबंधवृत्तीनामिति सं
बंधः अभावसादृश्यादीनामधिकरणादाविव वृत्तीना
मपि विषये संयोगतादात्म्ययोरतिप्रसक्तत्वेन ताभ्यां
वृत्तिप्रति विषयविशेषनियमनासंभवेसति परिशे
षाद्विषयविषयीभावप्रयोजकस्वरूपसंबंधवृत्तीना
मित्यर्थः रूपपदं नियामकपरं विषयविषयिभावस्य
स्वरूपसंबंधनियम्यत्वेन तयोरभेदस्य रूपशब्दार्थस्या
योगात् ननु संयोगतादात्म्ययोर्विषयविशेषनियाम
कत्वाभावेपि वृत्तीनां विषये स्वरूपसंबंधत्वपरिशेषान्न
सिध्यति स्वरूपसंबंधातिरिक्तस्य संबंधान्तरस्य कल्प
नोपपत्तेरित्यत आह क्रमपवेति स्वरूपसंबंधस्य वृत्त्या
दिस्वरूपतयातस्य क्रमसत्वात् क्रमपवस्वरूपसंबंधे वि
शेषकल्पनायोलाघवं संबंधान्तरकल्पनीयत्वात्तस्मिन्
संबंधान्तरे अभेदज्ञानत्वादिनिर्वाहकविशेषकल्पना

पांगौरवंशतोवृत्तीनांविषयैःसहस्वरूपसंबंधत्वमेवेति
भावः ननुतत्त्वमसिवाक्यात्जीवस्यब्रह्माभेदज्ञानो
पगमेतदभेदस्यैवसंसर्गविधयाभानाद्वेदांतानांसंस
र्गागोचरप्रमितिजनकत्वरूपाखंडार्थत्वाभ्युपगमहा
निरित्येतद्दोषंनिरवकाशयितुमाह एवंचेति महावा
क्याजन्यज्ञानगताभेदज्ञानत्वस्यान्यथोपपादितत्वेना
भेनाभेदसंसर्गभानानपेक्षायांसत्यामित्यर्थः हानिर
पीति घटादिवृत्तीनांमूलाज्ञाननिवर्त्तकत्वापत्तिर्ना
स्तिअखंडार्थत्वहानिश्चनास्तीत्यपिशब्दार्थः ॥

ननुघटादिज्ञानवद्ब्रह्मज्ञानस्यापिनमूलाज्ञा
ननिवर्त्तकत्वंयुक्तं निवर्त्तकत्वेनदृष्टस्यानाम
हिम्नत्वरूपस्यविरोधस्यतंत्रत्वात्कार्यस्यचोपा
दानेनसहवृत्तौदृष्टाविरोधाभावादितिचेत्नका
र्यकारणयोरन्यत्रनाशदृष्टाविरोधादर्शनेप्येक
विषयज्ञानाज्ञानप्रयुक्तस्यनाशविरोधस्या
त्रमत्वात्कार्यकारणयोरप्यग्निसंयोगपटयो
र्नाशदृष्टाविरोधदृष्टेस्तत्राग्निसंयोगेऽस्त्य
वयवविभागप्रक्रिययाऽसमवायिकारण
संयोगनाशाद्ध्वपटनाशोनाग्निसंयोगादि
तिवाच्य दग्धपटेपिपूर्वसंस्थानानुवृत्तिद
र्शनेनमुद्गरहतीकृतघटवदवयवविभा

गादर्शनात् तद्वावयवविभागादिकल्पना
याअप्रामाणिकत्वात् नापितच्चैतन्ये नाम
पिदाहेन समवायिकारणनाशात्पटनाश
इति युक्तं सुसुप्तत्वादिभिः सहयुगपदेव प
दस्यदाहदर्शनेन क्रमकल्पनायोगात् य
तोनायत्वादवयवनाशस्तत्रावयवेऽग्निसं
योगादेवनाशस्यवाच्यत्वात् नन्वस्त्वेतदे
वं तथापि सविलासाज्ञाननाशकमिदं ब्र
ह्मज्ञानं कथं नश्येत्तन्नाशकान्तराभावादिति
चेत् ॥

वेदांतजन्यज्ञानस्यापि मूलाज्ञाननिवर्तकत्वमाशि
पति नत्विति नादृश्योति कार्यस्य लोकेऽउपादानस्थिति
विरोधित्वादर्शनादित्यर्थः ब्रह्मगोचरवृत्तिप्रत्यंतःकर
णस्येव उपादानत्वेन तां प्रत्यज्ञानस्यानुपादानत्वात्
तन्निवर्तकत्वं संभवतीति मत्वाह नेति उपादानत्वमु
पेत्याप्याह कार्येति उपादानोपादेययोर्निवर्त्यनिव
र्तकभावप्रयोजकविरोधो नास्तीत्युत्सर्गः सर्वत्रा
ज्ञानत्वउपादानस्थले प्रयोगतेनिवर्तकभावप्रयो
जकतया लोके क्रमसमानविषयज्ञानाज्ञानभाव
स्य विशेषरूपतया तेन सामान्यरूपस्य उपादानोपा
देयभावप्रयुक्ताविरोधस्य बाधोपपत्तेरित्यर्थः लो
के उपादानोपादेययोर्निवर्त्यनिवर्तकभावप्रयोज

कविरोधाद्दर्शनमसिद्धं चेत्याह कार्यकारणयोरपी
ति अग्निसंयोगजन्यकार्यस्य स्वोपादानपटनाशकत्व
दर्शनादित्यर्थः ननु तत्राग्निसंयोगस्य नाशकत्वदर्श
नं भ्रांतिरिति मत्वा शंकते नचाग्नीति प्रक्रियेति अ
ग्निसंयोगानंतरं तंतुक्रियानंतरं तंतूनां विभागस्ततस्तंतूनां प
टासमवायिकारणसंयोगनाशः ततः पटनाशः इति
वैशेषिकप्रक्रियानंतरं तंतुविभागप्रक्रियैव भ्रांतिमू
लेत्याह तथापटेपीति एवं संस्थानसंयुक्तावस्थाव्य
तिरेकदृष्टांतमाह मुद्गरेति यथा मुद्गरहतिकृत
स्य घटस्यावयवेषु विभागो दृश्यते तथा पटदाहा
नंतरं दृश्यतंतुविभागादर्शनेनेत्यर्थः नत्रेति तंत
स्थित्यर्थः वैशेषिकप्रक्रियांतरमपि भ्रांतिमूलमेवे
त्याह नापीत्यादिना नत्रेति पटदाहस्थलइत्यर्थः अग्नि
संयोगस्य क्वचिदुपादानद्रव्यनाशकतायाश्चावश्य
कत्वात् पटनाशकत्वमपि तस्यैवेत्याह यत इति यतो
द्व्यणुकादयस्तावद्व्यणुकावयवस्य परमाणोर्न नाशः
तत्र द्व्यणुके विद्यमानादग्निसंयोगादेव तदुपादानभू
तद्व्यणुकनाशस्य वाच्यत्वान्न च तत्रावयवविभाग
प्रक्रियया परमाणुद्वयसंयोगनाशादेव द्व्यणुकना
श इति वाच्यं स्वावयवावयविविभागप्रक्रियाया निर
स्तत्वात् तथा चाग्निसंयोगस्य स्वोपादानपटनाशक
त्वदर्शनेन न भ्रांतिरिति भावः नन्वस्त्वेतदेवमिति य
त ब्रह्मज्ञानमेव मतः करणद्वारा स्वोपादानाज्ञानना
शकमस्त्वित्यर्थः तथापीति ब्रह्मज्ञानस्य सविलासा

ज्ञाननाशकत्वेपीत्यर्थः स्वकार्यज्ञाननाशकस्याज्ञा
ननाशकालेऽवशिष्यमाणस्य ब्रह्मज्ञानस्य नाशो
नास्तित्येन स्वस्य स्वनाशकत्वायोगात् नाशकान्तरा
नवेक्षणाच्चेत्यर्थः ॥

यथा कतकरजः सलिलेन संयुज्य पूर्वसंयु
क्तरजोन्तरविश्लेषं जनयत्स्वविश्लेषमपि
जनयति यथा वा भुज्यमानं ब्रह्मज्ञानं
सर्वाध्यस्तसर्वप्रपंचं निवर्तयत्स्वात्मानम
पि निवर्तयतीति केचित् अन्ये त्वन्यन्निवर्त्य
स्वयमपि निहन्ती दग्धलोहपीताम्बुन्याय
मुदाहरन्ति अपरे त्विदं दग्धतृणकूटदहनो
दाहरणमाहुः नचध्वंसस्य प्रतियोग्यतिरि
क्तजन्यत्वनियमः अप्रयोजकत्वात् निरिन्ध
नदहनादिध्वंसे व्यभिचाराच्च नचध्वंसस्य प्र
तियोगिमात्रजन्यत्वेऽतिप्रसंगात् कारणा
न्तरावश्यंभावाच्च निरिंधनदहनादिध्वंसेपि
कालादृष्टेश्वरेच्छादिकारणान्तरमस्तीति वा
च्यं अतिप्रसंगापरिज्ञानात् नच घटादिध्वं
सस्यापिकारणान्तरनिरपेक्षत्वं स्यादित्यतिप्र
संगः ध्वंसमात्रे कारणान्तरैरपेक्षाऽनभि

३
शि॰ले॰
टी॰
७३

पानात् न च घटध्वंसदृष्टान्तेन ब्रह्मज्ञानध्वं
सस्य कारणान्तरापेक्षासाधनेन दृष्टान्तेन
मुद्गरपतनापेक्षायामपि साधनापत्तेः ॥

अथ मंदब्रह्मज्ञानव्यतिरिक्तस्य सकलस्य ब्रह्मज्ञानेन
नाशः पश्चादवशिष्टस्य ब्रह्मज्ञानस्य नाशः इति क्र
मो नोपपद्यते किं तु ब्रह्मज्ञानेन सविलासाज्ञाननाश
काले सविलासाज्ञानेन सहैव ब्रह्मज्ञानस्यापि ना
शः स्यादुपपद्यते ब्रह्मज्ञानस्यैव स्वनाशं प्रत्यपि हेतु
त्वाभ्युपगमात् न चैकस्यैव स्वपरविलापकत्वं न दृ
ष्टमिति वाच्यं कतकरजसि दृष्टत्वादिति परिहरति
यथेति पूर्वेति कतकरजः संयोगात्पूर्वं जलेन संयु
क्तरजोन्तरैर्जलस्याविशेषमित्यर्थः पूर्वोप्यस्तेति व
लितानाप्यामासात्पूर्वेत्यर्थः अन्येतिति यथा वह्नितप्त
लोहपिंडे प्रदीप्तमंबु लोहगतमग्निं नाशयदात्मा
नमपि नाशयति तथा ब्रह्मज्ञानमपीत्यर्थः ब्रह्म
ज्ञानस्यात्मातिरिक्तं सर्वं निवर्तयतः तदैव स्वस्या
पि निवर्तने दाप्यलोहेन पीताम्बुरूपं दृष्टान्तमुदा
हरंतीत्यन्तरार्थः अपरेतिति यथा शुष्कतृणस
मूहे प्रदीप्तो दहनस्तृणकूटं नाशयन्नात्मानम
पि नाशयति तथा ब्रह्मज्ञानं नकार्यसमुदाये समु
त्पन्नो ब्रह्मप्रत्ययः तन्नाशयन् आत्मानमपि ना
शयतीत्यर्थः ननु दग्धदाह्यदहनादिन्यायेन ब्र
ह्मज्ञाननाशः इत्युपपादनमयुक्तं घटादिनाशे ब्र

तियोगिघटाद्यतिरिक्तस्तु ज्वरपानादिकारणं नरद
र्शनेन ध्वंसस्य प्रतियोग्यतिरिक्तकारणाजन्यत्वनि
यमादिति शंकते न च ध्वंसस्येति निरिंधनेति इंधना
नानि:शेषत्वंनाशानंतरं दहनस्य स्वनाशवनाशादर्शने
नानिरिंधनदहनध्वंसे स्वापायवहितपूर्वकाली
नज्ञानादिध्वंसे च प्रतियोगिमात्रजन्ये व्यभिचाराद्वेत्य
र्थः उक्तव्यभिचारे सर्वविवादीपरिहरति निरिंधनेति
प्रतिप्रसंगस्येवासिध्या ध्वंसे प्रतियोग्यतिरिक्तकार
णाजन्यत्वनियमस्याप्रयोजकत्वमित्याशयेन हेतुप्र
यतिसिद्धांती प्रतिप्रसंगापरिज्ञानादिति न तु कुतो
परिज्ञानमिति चेन्न वक्तव्य घटज्ञानध्वंसस्य प्रति
योग्यतिरिक्तजन्यत्वे घटादिध्वंसोपि प्रतियोग्यति
रिक्तकारणानपेक्षः स्यादित्यतिप्रसंगो वा घटादिध्वं
सवत् घटज्ञानध्वंसोपि प्रतियोग्यतिरिक्तकारणापे
क्षः स्यादित्यतिप्रसंगो वा घटज्ञानध्वंसवत् घटज्ञाना
दिध्वंसोपि कारणांतरानपेक्षः स्यादित्यतिप्रसंगो वा घ
टज्ञानस्य स्वोत्पत्तिद्वितीयक्षणएव नाशः स्यादित्य
तिप्रसंगो वा विवक्षितः इति तत्राद्यमनूद्य दूषयति न
चेति ध्वंसमात्रवृत्तिध्वंसत्वावच्छिन्नस्यार्थः अनभिधा
नादिति न च सिद्धांतिना तथानभिधानेपि ध्वंसत्ववि
शेषान तत्तदापाद्यत इति वाच्यं अप्रयोजकत्वादिति
भावः द्वितीयमतिप्रसंगेन दूषयति न च घटध्वंसद
र्शनेनेति ध्वंसत्वहेतुनेतिशेषः ॥

२
सि॰ले
ही॰
७४

74

नापिज्ञानत्वेसत्वसमास्याहृष्टज्ञानादित्वेसत्या
पिकारणांतरनैरपेक्ष्यंस्यादित्यतिप्रसंगः
मैथुनानलत्वेसत्यजलसेकादिदृष्टकारणा
पेक्षत्वेपिनिरिंधनानलत्वेसत्यनदनपेक्षत्व
वजायतज्ञानत्वेसत्यविशेषगुणांतरापेक्ष
त्वेपिस्वभूमिसर्वज्ञानत्वेसत्यतदनपेक्षत्व
वन्द्वमूलाज्ञाननिवर्तकज्ञानत्वेसत्यतदन
पेक्षत्वोपपत्तेःनापिकारणांतरनैरपेक्ष्ये
सत्यनंतरक्षणप्रध्वंसःस्यादित्यतिप्रसंगः
इष्टापत्तेःतदुत्पन्नान्तरक्षणप्रध्वस्तायस्त
निखिलप्रपंचदाहेननदंतरोत्पत्तत्स्यापि
तदैवदाहाभ्युपगमात् निरिंधनदहनत्वेस
मायेनबलज्ञानत्वेसत्यापिकालादृष्टेश्वरे
च्छादिकारणांतरजन्यत्वेपविरोधाच्च सर्वप्र
पंचनिहंतुरनंतरमेकक्षणाघस्थ्यबलज्ञानस्यानि
हतिरित्यनभ्युपगमेनयुगपत्सर्वदाहेसर्व
त्वोविरविरोधःसंवंधपरूपस्पर्श्वांतरस्वरूपस
वाकालस्पेश्वरप्रसारस्वरूपस्यानःकरणगुण
विशेषस्वरूपस्यवाहष्टस्यात्येषांचसत्वात् न
चनत्रज्ञानातिरिक्तकारणापेक्षणेबलज्ञा

नस्यामिथ्यात्वप्रसंगः ज्ञानैकनिवर्त्यत्वं मिथ्या
त्वमित्यभ्युपगमादिति वाच्यं ज्ञानाघटितस्य
मस्य निवर्त्यत्वे सति ज्ञाननिवर्त्यत्वस्य तदर्थ
त्वात् ॥
तृतीयमनूद्या.... जकत्वेन दूषयति नापि ज्ञान
ध्वंसत्वसाम्यादिति ब्रह्मज्ञानध्वंसघटध्वंसयोरिति शे
षः सुषुप्तीति सुषुप्तिपूर्वज्ञानादिगुणस्य नाशक
गुणान्तरानापत्त्यायां तस्यापि नाशकान्यगुणान्तरक
स्यानापत्त्या सुषुप्त्युच्छेदप्रसंगः स्यान्न तत्परिहारा
य सुषुप्तिपूर्वज्ञानादिगुणस्य नाशकान्तरानपेक्ष
त्वं वक्तव्यमिति भावः मूलाज्ञाननिवर्तक इति ब्रह्म
ज्ञान इत्यर्थः चतुर्थमतिप्रसंगमनूद्य तस्येष्टत्व
माह नापि कारणान्तरनैरपेक्ष्यमिति ब्रह्मज्ञानध्वं
सस्येति शेषः ननु दाहनिरिंधनदहनध्वंसादौ
जलसेकादिविशेषकारणानां व्यभिचारदर्शनेपि
साधारणकारणानां व्यभिचारादर्शनेन ब्रह्मज्ञानध्वंस
स्यापि साधारणकारणापेक्षा दुर्वारेत्यत आह निरिं
धनदहनध्वंसन्यायेनेति ननु प्रथमक्षणे ब्रह्मज्ञा
नस्य जन्म द्वितीयक्षणे सविलासाज्ञाननिवृत्तिः तृ
तीयक्षणे ब्रह्मज्ञानस्य निवृत्तिरिति क्रमे सति ब्रह्मज्ञा
ननाशात् पूर्वक्षणे कालादृष्टादीनामसत्त्वात्कथं ते
षां ब्रह्मज्ञाननाशहेतुत्वाभ्युपगमे विरोधाभावइ
त्यत आह सर्वप्रपंचेति क्षणमनेनाह विदवियति प
रमनेनाह द्वयान्तरेति यद्वा क्षणमनेनापीश्वरस्यकालत्व

३
सि·ले·
टी·
७५

75

मभिप्रेत्याह इत्थंतनेति स्वमतेनैवादृष्टस्य द्विप्रकारत्वमा
ह ईश्वरेति प्रसादश्च हरणमुपलक्षणं पुण्यं ईश्वरप्रसा
दरूपं पापं ईश्वरक्रोधरूपमिति दृष्टं त्वंतःकरणेति आ
त्मनः स्वमते निर्गुणत्वादिति भावः अन्ये यां चेति ईश्वर
दिगादीनामपीत्यर्थः नचतत्रेति ब्रह्मज्ञानत्वे सत्य
र्थः ज्ञानैकनिवर्त्यत्वं हि ज्ञानातिरिक्तानिवर्त्यत्वे सति
ज्ञाननिवर्त्यत्वरूपं यच्चाज्ञानेन भवति ज्ञानसाध्याया
मज्ञाननिवृत्तौ ज्ञानातिरिक्तस्य प्रतियोगिनोपि हेतु
त्वात् किंत्वन्यदेवतदित्याह ज्ञानाघटितेति ज्ञानाघ
टिता या सामग्री तदनिवर्त्यत्वे सतीत्यर्थः प्रपंचस्य
त्वमतेपि घटादेर्ज्ञाननिवर्त्यत्वमस्ति घटं नाशयामी
त्यादिज्ञानपूर्वकं मुद्गरपातनादिना तन्नाशदर्शना
दिति तद्वारणाय संघटितं घटादिनाशस्य ज्ञानपूर्वक
त्वनियमाभावेन ज्ञानाघटितसामग्रीनिवर्त्यजाती
ये घटादौ तदघटितसामान्यनिवर्त्यत्वस्याभावात्
न च परमते नाशमात्रे सेश्वरज्ञानघटितसामग्रीसा
ध्यत्वा नदीयज्ञा ॥

नान्यः पंथा इति श्रुतिरपि तत्रैव तात्पर्यात्
प्रतो शुक्तिरूपवदग्यदाह्यदहनादिन्यायः केचि
न्वहति रूपं ब्रह्मज्ञानेनाज्ञानतन्मूलप्रपंच
निवर्तके यज्ञानस्य प्रकाशानिवर्त्यत्वनिय
मेन जडरूपहानिनिवर्त्यत्वायोगात् किंतत

दारूढचैतन्यप्रकाशस्तन्निवर्तकः स्वरूपेण
तस्याज्ञानादिसाहित्येन यातदनिवर्तकत्वेपि
प्रखण्डाकारवृत्त्युपारूढस्य तन्निवर्तकत्वोप
पत्तेः न्तृणादेर्भासिकाप्येषा सूर्यदीप्तिरूपेण
देहेन सूर्यकान्तमुपारुह्य तन्यायेन तत्र योज
येदित्यभिप्रेत्योक्तेः एवं च यथाग्निर्विकाष्ठ
मुपारुह्य ग्राममनगरादिकं दहन्नवह्निर्दह
त्येवं तद्दीपिकाष्ठं तथा चरमवृत्तिमुपारुह्य
निखिलप्रपंचमुन्मूलयन्नखण्डचैतन्यप्र
काशस्तन्निवर्तनेपि प्रगल्भत इति तत्तन्त्रा
शकाविदनुपपत्तिरित्याहुः ॥

नमादायकार्यमात्रे ज्ञानाघटितसामग्र्यानिवर्त्यत्वेम
ज्ञानानिवर्त्यत्वमस्तीति तेनतन्मिथ्यात्वनिर्वचनमि
तिवाच्यं लक्षणेज्ञानपदस्य जैवज्ञानपरत्वात् आत्म
न्यतिव्याप्तिवारणाय विशेष्यमिति भावः ननु कार्य
मात्रे कालादृष्टादेः कारणत्वमित्यंगीकृत्य ब्रह्मज्ञा
नध्वंसेपि कालादृष्टादेः कारणत्वाभ्युपगमे मूलाज्ञा
नध्वंसरूपमोक्षेपि कालादेः कारणत्वं स्यात् कार्यत्वा
विशेषात् न चेष्टापत्तिः नान्यः पंथा इति श्रुतिविरोधा
दित्यत आह नान्यः पंथा इति अस्याः श्रुतेः ज्ञानमेकमे
व मोक्षसाधनमित्यत्र न तात्पर्यं किं तु मोक्षस्य ज्ञाना

३
सि॰ले॰
टी॰
७८

76

चरितं किमपि साधनं नास्तीत्यत्र नास्त्यर्थे अतो न श्रुति
विरोधश्चेत्यर्थः अत इति श्रुतिविरोधादिरूपबाधकाभा
वादित्यर्थः हृतिरूपस्य ब्रह्मज्ञानस्याविद्यादिनाशक
त्ववदेव स्वनाशकत्वमप्यस्तीत्युक्तमिदानीं हृतिरूपब्र
ह्मज्ञानस्याविद्यादिनाशकत्वं स्वनाशकत्वे वा नास्ति किं
तु तद्हृत्यारूढचैतन्यमेव तद्हृतिसहितसर्वनाशकमि
ति मतमाह केचित्विति ननु चैतन्यस्याज्ञानादिसाध
कत्वात्कथं तस्य नाशकत्वमत आह स्वरूपेणेति तत्र
दृष्टान्तं लोके न दर्शयति तृणादेरिति एषा ऽप्रत्यक्षासू
र्यदीप्तिः स्वरूपेण तृणादेः प्रकाशिकापि सूर्यकान्तम
णिमुपारूढा तृणादिकं दहतीति प्रत्यक्षसिद्धं तन्न्या
येनात्र चैतन्ये योजयेत् चैतन्यं स्वरूपेणाज्ञानादिप्रका
शकमपि हृतिविशेषसंसृष्टं सदज्ञानादेर्नाशकमिति
निश्चितत्वादेव ननु साधकस्य कथं बाधकत्वमित्यसं
भावनया प्रमाणसिद्धमर्थमुपेक्षेतेति लोकन्यायं
ननु मणिमारूढा सूर्यदीप्तिः मणिव्यतिरिक्तमेव तृणादि
कं दहति न तु मणिमपि तथा च हृत्यारूढं चैतन्यं हृति
व्यतिरिक्तमेवाज्ञानादिकं नाशयेन्न हृतिमपि तथा च
ब्रह्मज्ञानं कथं नश्येत् नाशकान्तराभावादिति शंका
याः समाधानं कथं लब्धमत आह एवं चेति चैतन्यस्य हृ
त्यारूढस्य नाशकत्वे प्रकाश्यप्रकाशयोरेव लोके नि
वर्त्यनिवर्तकभावदर्शनात् प्रकाशस्यापि सहकारि
विशेषवशेन नाशकत्वाविरोधाच्चेति युक्तिद्वयेन सि
द्धे सतीत्यर्थः उक्त··· न्नेति मूलमनात्मज्ञानेन सह

नाशयन्तीत्यर्थः प्रगल्भत इति भवतीत्यर्थः तन्नाश
इति चरमवृत्तिनाशा इत्यर्थः ॥

अथैतद्ब्रह्मज्ञानमज्ञानस्यैव निवर्तकं ज्ञा
नाज्ञानयोरेव साक्षाद्विरोधात् प्रपंचस्य
तूपादाननाशान्नाश इति प्रपंचान्तर्गतस्य
ब्रह्मज्ञानस्यापि तत एव नाशः न च प्रपंच
स्य ज्ञानानिवर्त्यत्वे मिथ्यात्वानुपपत्तिः प्रप
ञ्चनिवृत्तेः साक्षात्तज्ज्ञानजन्यत्वाभावेऽपि ज्ञा
नजन्याज्ञाननाशजन्यत्वान्न साक्षात्तु परंप
रया वा ज्ञानैकनिवर्त्यत्वं मिथ्यात्वमित्यंगी
कारात् एवं च तत्त्वसाक्षात्कारोदयेऽपि जी
वन्मुक्तस्य देहादिप्रतिभासमुपपद्यते प्रा
रब्धकर्मणा प्रतिबंधेन तत्त्वसाक्षात्कारोद
येऽपि प्रारब्धकर्मतत्कार्यदेहादिप्रतिभासा
नुवृत्त्युपादानाविद्यालेशानिवृत्त्युपपत्तेः
अज्ञानवत्प्रपंचस्यापि साक्षाद्ब्रह्मसाक्षात्का
रनिवर्त्यत्वेनाद्यमनुपपद्यते इति विरोधिनि ब्र
ह्मसाक्षात्कारे सति प्रारब्धकर्मणः स्वयमव
स्थानासंभवेनाविद्यालेशानिवृत्तिप्रतिबंध

३
सि॰ ले॰
टी॰
११

77

कृत्वा योगादिमाहुः इति श्रीशास्त्रसिद्धान्त
लेशसंग्रहे तृतीयः परिच्छेदः ३ ॥

अज्ञाननाश॰॰ ब्रह्मज्ञाननाशहेतुरिति मतं दर्शय
ति अन्येत्विति अज्ञानस्यैवेति उक्तं च पंचपादिकाया
ज्ञानमज्ञानस्यैव निवर्तकमिति साक्षादिति विरोध
प्रयोजकस्य समानविषयत्वादेरज्ञान एव संभवादि
त्यर्थः तत एवेति उपादाननाशादेवेत्यर्थः साक्षात्प
रंपरया वेति मूलाज्ञानमात्रस्य ज्ञानेन निवर्त्यतया
मिथ्यात्वसिद्धौ मूलाज्ञानातिरिक्तजडमात्रस्य तद
धीनतया स्वयं साक्षाज्ज्ञाननिवर्त्यत्वाभावेऽपि कृत्स्न
प्रपंचस्य मिथ्यात्वसिद्धिरप्रत्यूहेत्यपि मंतव्यं अस्य
मतस्य जीवन्मुक्तिशास्त्रानुगृहीतत्वं दर्शयति एवं
चेत्यादिना अज्ञानातिरिक्तस्य जडस्य ज्ञानेन सह
साक्षाद्विरोधाभावे सतीत्यर्थः ननु तत्त्वसाक्षात्कारे
ण ज्ञाननाशे सत्युपादानाभावात् देहादेरवस्थाना
संभवे सति कथं विद्योदये देहादिप्रतिभासः अ
त आह प्रारब्धेति तत्त्वसाक्षात्कारोदये सत्यज्ञानस्य
निःशेषेण निहतिप्रसक्तौ प्रारब्धकर्मकृतप्रतिबंध
वशादज्ञानलेशस्य निहतिर्न संभवति तल्लेशानुवृ
त्तौ च तत्त्वज्ञानानन्तरमपि प्रारब्धकर्मणः तत्कार्यस्य
देहादिप्रतिभासस्यापि अनुवृत्तिर्युज्यते देहाद्युपादा
नभूतस्याविद्यालेशस्यानुवृत्तेरित्यर्थः एवमनेजी

वन्धकत्वसिद्धिमाह अज्ञानवदिति जीवन्मुक्तस्य देहा
दिप्रतिभासइत्यर्थः विरोधिनीति अज्ञानस्येव प्रारब्ध
कर्मणोपि साक्षाद्विरोधिनीत्यर्थः श्रीकृष्णमनसा ध्या
त्वा श्रीकृष्णं संप्राप्यैव व्याख्यातोयं परिच्छेदः श्रीकृ
ष्णपरितुष्टये १ इति श्रीमत्परमहंसपरिव्राजकाचा
र्य श्रीमत्स्वयंप्रकाशानंदसरस्वतीदिव्य श्रीचरणार
विंदसंलग्नरजोभूतस्याच्युतकृष्णानंदतीर्थस्य कृतौ
शास्त्रसिद्धांतलेशसंग्रहव्याख्यायां श्रीकृष्णालंकारा
ख्यायां तृतीयः परिच्छेदः ॥ ३ ॥ संमाप्तम् ॥

७८

नं० ५३८८-घ

सिद्धान्तलेशसंग्रहः टीकासहितम् (वेदान्त)

पत्राणि (क) २२१ (ख) १०८ (ग) ७८ = ४०६

लेखकः श्रीमत्स्वयंप्रकाशानंदसरस्वती

शिष्यः श्रीबालमुकुन्दस्तस्य

शिष्यः श्रीविश्वनाथतीर्थः

किन्तु मूलकर्त्ता अप्पदीक्षितः

